॥ श्रीजिनाय नमः ॥

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ श्री रतिसार चरित्रं ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

सुरत

अन्वय तथा भाषांतर करनार तथा छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज

(अन्वय तथा भांषांतरना प्रसिद्ध कर्ताए सर्व हक स्वाधीन राख्या छे.)

संवत १९८४ सने १९२८ वीर संवत् २४५४

किंमत रु. ५-८-०

श्रीजैनभास्करोदय प्रिन्टींग प्रेसमां छाप्युं. जामनगर. ब्रांच नं. ३.

॥ श्री जिनाय नमः ॥

॥ श्रीचारित्रविजय गुरुभ्यो नमः ॥

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ अथ श्री रतिसारचरित्रं प्रारभ्यते ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय तथा भाषांतर करनार-पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

पात्रदानं हृदानन्दहेतुरत्र परत्र च । कृतिनो रतिसारस्य कुमारस्येव कल्पते ॥ १ ॥

अन्वयः—कृतिनः पात्रदानं अत्र च परत्र रतिसारस्य कुमारस्य इव हृत् आनंद हेतुः कल्पते. ॥ १ ॥

अर्थः-विचक्षण माणसे करेलुं सुपात्रदान आलोकमां अने परलोकमां पण रतिसारकुमारनीपेठे हृदयमां आनंदनाहेतुरूप थायछे.

तथाहि विद्यते माहिष्मतीति विदिता पुरी । यत्पौरैः पूर्यते लक्ष्म्या लोलत्वं दानलीलया. ॥ २ ॥

अन्वयः-तथाहि-माहिष्मती इति विदिता पुरी विद्यते, यत्पौरैः दानलीलया लक्ष्म्याः लोलत्वं पूर्यते. ॥ २ ॥

अर्थः-ते रतिसारकुमारनुं दृष्टांत कहे छे-माहीष्मतीनामनी मख्यात नगरी छे, के जेमां (वसनारा) लोकोए दाननी क्रीडाथी लक्ष्मीनुं चपलपणुं संपूर्ण करेलुं छे. ॥ २ ॥

सुभूम इति भूपोऽभूत्तत्र निश्छत्रितद्विषत् । यस्य दानश्रियः केलिकाननं कल्पपाद्पाः ॥ ३ ॥

अन्वयः—तत्र निश्छत्रितद्विषत् सुभूमः इति भूपः अभुत्, यस्य दानश्रियः कल्पपादपाः केलिकाननं. ॥ ३ ॥

अर्थः—ते नगरमां छत्ररहित करेल छे शत्रुओने जेणे, एवो सुभूमनामे राजा हतो, के जेनी दानरूपी लक्ष्मीने कल्पवृक्षो तो क्रीडा करवानां वनरूप थयां हतां ॥ ३ ॥

पुत्रः क्षितिपतेस्तस्य बभूव भुवनाद्भुतः । रतिसाराभिधः शुद्धकलाकमलिनीरविः ॥ ४ ॥

अन्वयः—तस्य क्षितिपतेः भुवनाद्भुतः, शुद्ध कला कमलिनी रविः रतिसाराभिधः पुत्रः बभूव. ॥ ४ ॥

अर्थः—ते राजाने जगतमां आश्चर्य उपजावनारो, तथा निर्मल कलाओरूपी कमलिनीने विकस्वर करवामां सूर्यसरखो रतिसारनामनो पुत्र हतो. ॥ ४ ॥

पतिव्रतेव रूपश्रीर्यस्य विश्वमनोहरा । नापे सुरैरपि ध्यानतूर्णपूर्णमनोरथैः ॥ ५ ॥

अन्वयः—विश्वमनोहरा यस्य रूपश्रीः पतिव्रता इव ध्यान तूर्ण पूर्ण मनोरथैः सुरैः अपि न अपि. ॥५॥

अर्थः—जगतना हृदयने हरनारी, एवी जेना रूपनी लक्ष्मीने (शोभाने) जाणे ते पतिव्रता होय नही? तेम इच्छा करतांज एकदम जेओना मनोरथो संपूर्ण थाय छे, एवा देवो पण प्राप्त करी शक्या नही. ॥ ५ ॥

**अदूषणैर्गुणैर्यस्य मुदितो मेदिनीपतिः । अदात्प्रसादतः स्वेच्छावित्तव्ययनवल्गितम् ॥ ६ ॥**

अन्वयः—यस्य अदूषणैः गुणैः मुदितः मेदिनीपतिः प्रसादतः स्वइच्छा वित्त व्ययन वल्गितं अदात् ॥ ६ ॥

अर्थः-जेना निर्दोष गुणोथी खुशी थयेला राजाए (तेने) महेरबानीदाखल पोतानी मरजी मुजब धन खरचवानी परवानगीआपीहती.

**स कदापि कलावद्भिर्वृतो रविरिवांशुभिः । विचिक्रीड पुरक्रोडे पौरदृक्पङ्कजप्रियः ॥ ७ ॥**

अन्वयः-कदापि अंशुभिः रविः इव कलावद्भिः वृतः, पौरदृक् पंकज प्रियः सः पुरक्रोडे विचिक्रीड. ॥ ७ ॥

अर्थः—कोइक दिवसे किरणोवडे सूर्यनीपेठे कलावानोथी वींटायेलो, तथा नागरिकोनां लोचनोरूपी कमलोने प्रिय थइ पडेलो ते रतिसारकुमार नगरनी अंदर क्रीडा करतो हतो. ॥ ७ ॥

**असावपश्यदुत्पश्यैर्वीक्ष्यमाणं विचक्षणैः । नरं कंचित्पताकाग्रजाग्रद्ग्रन्थिं चतुष्पथे ॥ ८ ॥**

अन्वयः—-असौ उत्पश्यैः विचक्षणैः वीक्ष्यमाणं, पताकाअग्रजाग्रत् ग्रंथिं कंचित् नरं चतुष्पथे अपश्यत्. ॥ ८ ॥

अर्थः-तेणे उंचु जोता एवा चतुरलोकोवडे जोवाता, तथा ( हाथमां पकडेली ) पताकाने छेडे बांधेली छे गांठ जेणे, एवा कोइएक माणसने चौटामां जोयो. ॥ ८ ॥

अथोचितचमत्कारे कुमारे परिपृच्छति । तस्य स्वरूपं चिद्रूपः कश्चिदेवं न्यवेदयत् ॥ ९ ॥

अन्वयः—अथ उचितचमत्कारे कुमारे परिपृच्छति कश्चित् चिद्रूपः एवं तस्य स्वरूपं न्यवेदयत्. ॥ ९ ॥

अर्थः—पछी योग्य छे आश्चर्य जेनुं एवा ते रतिसार कुमारे पूछवाथी कोइक जाणकारे आवी रीते ते माणसनो वृत्तांत जणाव्यो.

कुमार कोऽपि साकारस्तुङ्गमानः पुमानयम् । कुतोऽपि केतुमान्प्रातरापपात पुरान्तरम् ॥ १० ॥

अन्वयः—(हे) कुमार ! साकारः तुंगमानः कः अपि केतुमान् अयं पुमान् कुतः अपि प्रातः पुरांतरं आपपात ॥ १० ॥

अर्थः—हे कुमार! देहधारी उंचां अभिमानरूप कोइक धजाधारी आ पुरुष क्यांकथी प्रभातमांज ( आ ) नगरनी अंदर आवी पहोंच्यो छे. ॥ १० ॥

वीक्ष्य ग्रन्थिं ध्वजाग्रेऽस्य नागरैर्गुणसागरैः । इह वस्तु किमस्तीति स्पष्टं पृष्टोऽयमभ्यधात् ॥ ११ ॥

अन्वयः—अस्य ध्वजाग्रे ग्रंथिं वीक्ष्य गुणसागरैः नागरैः, इह किं वस्तु अस्ति? इति पृष्टः अयं स्पष्टं अभ्यधात्. ॥ ११ ॥

अर्थः—तेनी धजाने छेडे गांठ जोइने गुणोना महासागरसरखा नगरना लोकोए, आ ( तारी ) गांठमां शुं चीज छे? एम पूछवाथी तेणे खुल्लीरीते कह्युं के, ॥ ११ ॥

इह श्लोकस्त्रिलोकस्य हितोऽस्ति महितो बुधैः । विक्रीणे कार्यतो निष्कलक्षेणामूल्यमप्यमुम् ॥ १२ ॥

अन्वयः—इह त्रिलोकस्य हितः, बुधैः महितः श्लोकः अस्ति, कार्यतः अमूल्यं अपि अमुं निष्कलक्षेण विक्रीणे. ॥ १२ ॥

अर्थः-आ गांठमां त्रणे लोकने हितकारी, अने विद्वानोए पण पूजेलो ( एक ) श्लोक छे, ( अने मने ) प्रयोजन पडवाथी ( हुं ) अमूल्य एवा पण आ श्लोकने एक लाख सोनामोहोरो लइ वेंचुं छुं. ॥ १२ ॥

**इत्यस्य वचसाश्चर्यवशंवदहृदस्तदा । अमिलन्नमलप्रज्ञाः प्रज्ञाः पुरपुरःसराः ॥ ॥ १३ ॥**

अन्वयः-अस्य इति वचसा तदा आश्चर्यवशंवदहृदः अमलप्रज्ञाः प्रज्ञाः पुरपुरःसराः अमिलन् ॥ १३ ॥

अर्थः-तेनां एवीरीतनां वचनथी तेज वखते आश्चर्यने वश थयेलां छे हृदय जेमनां, तथा निर्मल बुद्धिवाळा, एवा नगरना डाह्या अग्रेसर लोको ( त्यां ) एकठा थया, ॥ १३ ॥

**ते भृशं तादृशश्लोकसमालोकसमुत्सुकाः । अमुं जगुः क्व गुप्तस्य मूल्यश्रीरस्तु वस्तुनः ॥ १४ ॥**

अन्वयः-भृशं तादृश श्लोक समालोक समुत्सुकाः ते अमुं जगुः गुप्तस्य वस्तुनः मूल्यश्रीः क्व अस्तु? ॥ १४॥

अर्थः-तेवी रीतना ते श्लोकने जोव ने अत्यंत उत्सुक थयेला ते लोको तेने कहेवा लाग्या के, (आवीरीते) छानी बांधीराखेली वस्तुनी किमतना पैसा ते क्यां रेढा पड्या छे? ॥ १४ ॥

**अथायमभ्यधाल्लभ्या न सभ्याः क्वचिदीदृशाः । छद्मैव प्रस्तुतं वस्तुलब्धौ येषां धनं घनम् ॥ १५ ॥**

अन्वयः—अथ अयं अभ्यधात्, इदृशाः सभ्याः क्वचित् न लभ्याः, येषां प्रस्तुतं छद्म एव वस्तुलब्धौ घनं धनं. ॥ १५ ॥

अर्थः—पछी आ पुरुषे (तेओने) कह्युं के, (वाह वाह ! ) आवा (तमारा जेवा) उमदां ग्राहको तो मने क्याय मलवाना नथी !!

के जेमनी पासे रहेली आवी कपट जाळज वस्तु मेळववा माटे पुष्कल धनरूप निवडे छे ! ॥ १५ ॥

**आस्वादमात्रवित्रस्तरोगां रोगवतेऽर्थिने । स्वादं परीक्षितुं दत्ते विक्रेता कः सुधां मुधा ॥ १६ ॥**

अन्वयः—अर्थिने रोगवते आस्वाद मात्र वित्रस्तरोगां सुधां स्वादं परीक्षितुं कः विक्रेता मुधा दत्ते. ? ॥ १६ ॥

अर्थः—(वळी) आजीजी करता एवा पण रोगीने, फक्त चाखवाथीज रोगने दूर करनारुं अमृत, तेना स्वादनी परीक्षा करवा माटे कयो वेचनार फोकट (मूल्य लीधा विना) आपी दे छे ? ॥ १६ ॥

**मूल्यं संसारसारस्य यद्वाच्यस्यैव याच्यते । श्लोकं दक्षाः परीक्षार्थं दर्शये तं कथं वृथा ॥ १७ ॥**

अन्वयः— हे) दक्षाः संसारसारस्य यद्वाच्यस्य एव मूल्यं याच्यते, तं श्लोकं परीक्षार्थं वृथा कथं दर्शये ? ॥ १७ ॥

अर्थः—(वळी) हे दक्षो ! संसारमां सारभूत एवा जे श्लोकना फक्त वांचननीज किमत लेवामां आवे छे, ते श्लोकने (तेनी) परीक्षा करवामाटे विनामूल्ये (तमोने) शी रीते बतावी शकुं ? ॥ १७ ॥

**भवद्भिर्विभवत्प्रज्ञैर्निभाल्यैव विभाव्यते । अर्थः श्लोकस्य भोः कस्य विक्रयः क्रियतां मया ॥१८ ।**

अन्वयः-भोः विभवत्प्रज्ञैः भवद्भिः निभाल्य एव श्लोकस्य अर्थः विभाव्यते, मया कस्य विक्रयः क्रियतां ? ॥ १८ ॥

अर्थः-अरे ! महाचालाक एवा तमो जोतांवेंतज श्लोकनो अर्थ तो जाणी जाओ एवा छो, तो पछी मारे (आ श्लोक) कोने वेचवो ?

**इत्यनेन कृता कामं यद्विदा कोविदावलिः । अस्ति श्लोकावलाकार्थमुपायध्यायिनी चिरात् ॥ १९ ॥**

अन्वयः-इति यद्विदा अनेन चिरात् कोविदाञ्जलिः श्लोकअवलोकनार्थं कामं उपायध्यायिनी कृता अस्ति. ॥ १९ ॥

अर्थः-एवी रीते तेओनी कपटक्रियाने जाणनारा एवा आ पुरुषे घणो वखत थयां पंडितोनी श्रेणिने (ते) श्लोक जोवामाटेनो उपाय शोधवानी चिंतामां खूब गरकाव करी नाख्या छे ॥ १९ ॥

इत्याकर्ण्य कुमारोऽन्तःसमारोपितविस्मयः । सुहृदां हृदयालूनामास्यं पश्यन्नदोऽवदत् ॥ २० ॥

अन्वयः-इति आकर्ण्य अंतः समारोपितविस्मयः कुमारः हृदयालूनां सुहृदां आस्यं पश्यन् अदः अवदत्. ॥ २० ॥

अर्थः—एम सांभळीने हृदयमां थयेल छे आश्चर्य जेने एवो ते रतिसारकुमार ( पोताना ) प्रिय मित्रोनां मुखतरफ जोतोथको एम बोल्यो के, ॥ २० ॥

अपि विद्यात्रयीहृद्यान्कुर्वती खर्वितोत्तरान् । अतुल्यमूल्या यस्योक्तिभङ्गिरप्यङ्ग रङ्गति ॥ २१ ॥

स विक्रीणाति यं श्लोकं लोकम्पृणगुणं भणन् । तं क्रीणन्हेमलक्षेण दक्षो विक्षोभमेति कः ॥२२॥युग्मम्॥

अन्वयः-विद्यात्रयीहृद्यान् अपि खर्वितोत्तरान् कुर्वती यस्य उक्तिभंगिः अपि अंग अतुल्यमूल्या रंगति, ॥ २१ ॥ सः लोकंपृणगुणं भणन् यं श्लोकं विक्रीणाति, तं हेमलक्षेण क्रीणन् कः दक्षः विक्षोभं एति? ॥२२॥ युग्मं ॥

अर्थः-त्रणे प्रकारनी विद्याने जाणनाराओने पण निरुत्तर करनारी एवी जेना वचननी युक्ति (चतुराइ) पण खरेखर अनुपम मूल्यवाळी जणाय छे, ॥ २१ ॥ तेवो आ माणस जे श्लोकने लोकोने हितकारी वर्णवतो थको वेचवा निकळ्यो छे, ते श्लोकने

एक लाख सोनामोहोरो किमत तरीके आपी खरीद करतां कयो डाह्यो माणस गभराटमां पडे ? (अचकाय ?) ॥२२॥ युग्मं ॥

**वदन्निति सुहृद्वृन्दैर्नन्दितो नृपनन्दनः । प्रीतः किंचित्परिक्रम्य श्लोकविक्रयिणं जगौ ॥ २३ ॥**

अन्वयः—इति वदन् सुहृद्वृंदैः नंदितः नृपनंदनः प्रीतः किंचित् परिक्रम्य श्लोकविक्रयिणं जगौ. ॥ २३ ॥

अर्थः—एम बोलतो, तथा मित्रोना समूहोथी प्रशंसा पामेलो एवो ते राजकुमार खुशी थयो थको जरा आगळ आवीने ते श्लोक वेचनार माणसने कहेवा लाग्यो के, ॥ २३ ॥

**गृहाण स्पृहया हेम सूक्तरत्नं वितीर्यताम् । पुनरस्य नरश्रेष्ठ कथ्यतां तथ्यमाकरः ॥ २४ ॥**

अन्वयः—हे नरश्रेष्ठ ! स्पृहया हेम गृहाण ? सूक्तरत्नं वितीर्यतां ? पुनः अस्य तथ्यं आकरः कथ्यतां ? ॥ २४ ॥

अर्थः—हे उत्तम पुरुष! तारी इच्छा मुजब (तुं) सुवर्ण ले ? अने आ श्लोकरूपी रत्न (मने) आप? परंतु आ श्लोकनी खरेखरी सत्य उत्पत्ति कही संभळाव? ॥ २४ ॥

**अथ प्रीतिसुधासिन्धुचञ्चद्वीचीयितस्मितः । कुमारमुखमार्तण्डकोकः श्लोकधनोऽभ्यधात् ॥ २५ ॥**

अन्वयः—अथ प्रीति सुधा सिंधु चंचत् वीचीयितस्मितः, कुमारमुखमार्तंड कोकः श्लोकधनः (सः) अभ्यधात् . ॥ २५ ॥

अर्थः—पछी हर्षरूपी अमृतसागरना चालतां मोजांओ सरखुं छे हास्य जेनुं, ( अर्थात् पोताने थयेला हर्षथी जरा हसतो ) अने ते राजकुमारना मुखरूपी सूर्यने ( जोइ ) कोक पक्षीनी पेठे ( आनंद पामतो ) तथा श्लोकरूपी धनवाळो ते पुरुष कहेवा

लाग्यो के, ॥ २१ ॥

**श्रृणु सूक्ताकरं श्रीमन्नस्ति श्रीमन्दिरं पुरी । श्रावस्तीति समाहूतपुरुहूतपुरस्तुतिः ॥ २६ ॥**

अन्वयः—( हे ) श्रीमन् ! सूक्ताकरं श्रृणु ? श्रीमंदिरं समाहूत पुरुहूत पुर स्तुतिः श्रावस्ती इति पुरी अस्ति. ॥ २६ ॥

अर्थः–हे श्रीमन् ! तमो आ श्लोकनी उत्पत्ति सांभळो ? लक्ष्मीना निवास सरखी, तथा इन्द्रनी नगरी अमरावतीए पण जेनी प्रशंसा करी छे, एवी श्रावस्ती नामनी नगरी छे. ॥ २६ ॥

**स्वर्द्धेर्मानमजानानः स्वस्य स्थाम्न इव द्विपः । तस्यामृद्धः प्रसिद्धोऽहं सुबन्धुर्नामतो मतः ॥ २७ ॥**

अन्वयः—तस्यां द्विपः इव स्वस्य स्थाम्नः, स्वऋद्धेः मानं अजानानः ऋद्धः, प्रसिद्धः सुबंधुः नामतः अहं मतः ॥ २७ ॥

अर्थः—ते नगरीमां हाथी जेम पोतानां बळने (जाणतो नथी) तेम पोतानी समृद्धिना प्रमाणने (पण) नही जाणतो धनथी भरेलो तथा प्रसिद्धि पामेलो सुबंधु नामनो हुं ( एक व्यापारी ) हतो. ॥ २७ ॥

**हयहेषितवेषेण बिभ्राणा भूषणक्कणान् । ननर्त नर्तकीव श्रीरश्रमं मम वेश्मनि ॥ २८ ॥**

अन्वयः–मम वेश्मनि हयहेषितवेषेण भूषण क्कणान् बिभ्राणा श्रीः नर्तकीव अश्रमं ननर्त. ॥ २८ ॥

अर्थः—मारे घेर घोडाओना हेषारवोना मिषथी आभूषणोना खणकारोने धारण करती एवी लक्ष्मीदेवी नटीनी पेठे (जरापण) थाक्या विना नाचती हती. ॥ २८ ॥

**सद्भाग्यव्यवसायाभ्यां पक्षिणीभिर्विभूतिभिः । पारावारस्य पारेऽपि चरन्तीभिरवर्धि मे ॥ २९ ॥**

अन्वतः—सद्भाग्यव्यवसायाभ्यां पक्षिणीभिः, पारावारस्य पारे अपि चरंतीभिः मे विभूतिभिः अवार्धि. ॥ २९ ॥

अर्थः—सद्भाग्य अने उद्यमवडे करीने (बे) पांखोवाळी थवाथी महासागरनी पेलेपार पण ( सुखे ) विहार करनारी मारी समृद्धि वधवा लागी हती. ॥ २९ ॥

**नरं कंचन रङ्कं च नृपतिं च न वेद्मि तम् । अदधादधमर्णत्वं यो मे नो मेदिनीतले ॥ ३० ॥**

अन्वयः—मेदिनीतले यः मे अधमर्णत्वं नो अदधात्, तं कंचन रंकं नरं, च नृपतिं च न वेद्मि. ॥ ३० ॥

अर्थः-( आ ) पृथ्वीतलपर जे मारुं करज धारण करतो न होय तेवा कोइ रंक पुरुषने, के राजाने पण ( हु ) जाणतो नथी. ( अर्थात् रंकथी मांडीने राजा सुधीना सर्व मनुष्यो मारा करजदार हता )

**चिरमित्यभवं भूपभव भूरिविभूतिभाक् । अहं दुहितृदौहित्रपुत्रपौत्रालिमालितः ॥ ३१ ॥**

अन्वयः—( हे ) भूपभव ! दुहितृ दौहित्र पुत्र पौत्र आलि मालितः अहं इति चिरं भूरि विभूतिभाक् अभवं ॥ ३१ ॥

अर्थः—हे राजकुमार ! दीकरीओ, दीकरीओना दीकराओ, पुत्रो तथा पुत्रोना पुत्रोनी पंक्तिथी शोभतो एवो हुं घणा काळ सुधी घणीज समृद्धिवाळो रह्यो. ॥ ३१ ॥

एकदा क्षणदापुच्छे स्वप्नेऽपश्यं वरस्त्रियम् । विभूषणगुणैर्भान्तीं निर्यान्तीं निजमन्दिरात् ॥ ३२ ॥

अन्वयः—एकदा क्षणदापुच्छे स्वप्ने विभूषणगुणैः भांतीं, निजमंदिरात् निर्यांतीं वरस्त्रियं अपश्यं ॥ ३२ ॥

अर्थः-हवे एक दिवसे रात्रिने अंते स्वप्नमां आभूषणो तथा गुणोवडे शोभिती थयेली, अने मारा घरमांथी (बहार) निकळी जती एवी ( कोइक ) उत्तम स्त्रीने में जोइ. ॥ ३२ ॥

यावद्ध्यायामि निद्रान्ते स्वान्ते दुःखप्रशान्तिकम् । तावन्मूर्तमिवाभाग्यं धूमोऽभूद्विभवौकसि ॥ ३३ ॥

अन्वयः—निद्रांते यावत् दुःखप्रशांतिकं ध्यायामि, तावत् मूर्तं अभाग्यं इव विभवओकसि धूमः अभूत्. ॥ ३३ ॥

अर्थः—(पछी) निद्रा उड्यावाद जेटलामां (ते दुःस्वप्नरूप) दुःखनी शांतिमाटे (कंइक) विचार करुं छुं, तेटलामां जाणे देहधारी (मारुं) अभाग्यज (प्रगट थयुं होय नही !) तेम धनभंडारमां धूमाडो प्रगट थयो. ॥ ३३ ॥

तत्कालमेव मे भाग्यभङ्गभङ्गिगरीयसाम् । तत्रोद्भूदभाग्यानां प्रताप इव पावकः ॥ ३४ ॥

अन्वयः—तत्कालं एव मे भाग्य भंग भगि गरीयसां अभाग्यानां प्रताप इव तत्र पावकः उदभूत्. ॥३४॥

अर्थः-तेज वखते मारां सुभाग्योना विनाशनी गोठवण करवामांज सज्ज थइ गयेलां, एवां मारां दुर्भाग्योना प्रताप सरखो त्यां अग्नि उछळवा लाग्यो. ॥ ३४ ॥

वित्तालिनिःस्पृहश्चित्तादुत्तीर्णस्वजनव्रजः । निःसृतोऽहं तदागारात्संसारादिव निर्ममः ॥ ३५ ॥

अन्वयः-तदा निर्ममः संसारात् इव वित्तालिनिःस्पृह', चित्तात् उत्तीर्णस्वजनव्रजः अहं आगारात् निःसृतः ॥ ३५ ॥

अर्थः-ते वखते ममता विनानो मुनि जेम संसारमांथी ( निकळी जाय ) तेम धननी श्रेणिनी पण स्पृहा नही करनारो, तथा हृदयमांथी पण नीकळी गयेल छे स्वजनोनो समूह जेने एवो हुं घरमांथी बहार नीकळी गयो. ॥ ३५ ॥

तदा तु यद्यदाकृष्टं दह्यमानं धनं जनैः । छलिनस्तत्तदादाय पलायांचक्रिरे रयात् ॥ ३६ ॥

अन्वयः-तु तदा यत् यत् दह्यमान धनं जनैः आकृष्टं, तत् तत् छलिनः आदाय रयात् पलायांचक्रिरे. ॥ ३६ ॥

अर्थः-वळी ते वखते जे जे बळतु द्रव्य लोकोए (बहार) खेंची कहाडयुं, ते ते द्रव्यने लुंटाराओ लइने (त्यांथी) एकदम पलायन थइ गया. ॥ ३६ ॥

मदीयाभाग्यमङ्गल्यदीपे तस्मिन्प्रदीपने । प्रपतद्भिः पतङ्गानां भङ्गिरङ्गीकृता हयैः ॥ ३७ ॥

अन्वयः-मदीय अभाग्य मंगल्यदीपे तस्मिन् प्रदीपने प्रपतद्भिः हयैः पतंगानां भंगिः अंगीकृता. ॥ ३७ ॥

अर्थः-मारा दुर्भाग्यना मंगलदीवा सरखी ते आगमां पडता एवा ( मारा ) घोडाओए पतंगीयांओनी रीति स्वीकारी लीधी. (अर्थात् सघळा घोडाओ पण बळी मूआ.) ॥ ३७ ॥

पदार्थदाहदुःखोर्मिव्यथया मूर्छिते तदा । ओको विमुच्य लोकोऽभूत्प्रतिकारपरो मयि ॥ ३८ ॥

अन्वयः-तदा पदार्थ दाह दुःख ऊर्मि व्यथया मयि मूर्छिते लोकः ओकः विमुच्य प्रतिकारपरः अभूत्. ॥ ३८ ॥

अर्थः-(वळी) ते वखते वस्तुओ बळीजवाथी थयेला दुःखना मोजांओनी पीडाथी हुं ( ज्यारे ) मूर्छित थइ पड्यो, ( त्यारे ) लोको (मारुं बळतुं) घर छोडीने मारो उपाय करवामां तत्पर थया. ॥ ३८ ॥

**यावच्चिच्छेद मे मूर्छां जनस्तावद्विभावसुः । निन्ये निःशेषमप्येष वेश्म भस्मावशेषताम् ॥ ३९ ॥**

अन्वयः—यावत् जनः मे मूर्छां चिच्छेद, तावत् एषः विभावसुः निःशेषं अपि वेश्म भस्मअवशेषतां निन्ये. ॥ ३९ ॥

अर्थः—(पछी) जेटलामां लोकोए मारी मूर्छा उतारी, तेटलामां ते अग्निए (मारुं) आखुंये घर बाळीने भस्म करी नाख्युं. ।३९।

**सद्मतो निःसृताशेषस्वजनं मुक्तमूर्छनम् । दग्धसर्वस्वमप्याहुर्मां जनाः पुण्यभाजनम् ॥ ४० ॥**

अन्वयः—दग्धसर्वस्वं अपि, सद्मतः निःसृत अशेषस्वजनं, मुक्तमूर्छनं जनाः मां पुण्यभाजनं आहुः ॥ ४० ॥

अर्थः—(मारुं) सर्वस्व बळी गया छतां पण, घरमांथी (सलामत) निकळी आव्या छे सघळा स्वजनो जेना तथा गयेली छे मूर्छा जेनी, एवा मने लोको भाग्यशाली कहेवा लाग्या !॥ ४० ॥

**तप्तं स्वर्णादि पिण्डस्थं देयमूल्यपदे तदा । एत्य क्रयाणवाणिज्यकारिभिर्जगृहे गृहात् ॥ ४१ ॥**

अन्वयः—तदा तप्तं पिंडस्थं स्वर्णादि क्रयाणवाणिज्यकारिभिः एत्य देयमूल्यपदे गृहात् जगृहे. ॥४१॥

अर्थः—(वळी) ते वखते (आगमां) ओगळीने ढाळीया रूप थयेलुं मारुं सुवर्णआदिक करीयाणाना व्यापारीओए आवीने ( मारी पासेना तेओना ) लेणापेटे घरमांथी लेइ लीधुं. ॥ ४१ ॥

लभ्याक्षरेषु दग्धेषु विदग्धैरधमर्णकैः । दत्तं नोत्तरमप्युच्चैर्याच्यमाने धनोच्चये ॥ ४२ ॥

अन्वयः—लभ्यअक्षरेषु दग्धेषु विदग्धैः अधमर्णकैः धनोच्चये उच्चैः याच्यमाने उत्तरं अपि न दत्तं. ॥ ४२ ॥

अर्थः—(मारां) लेणा धनना नामानां चोपडाओ बळी जवाथी लुच्चा देणदारोए तो (में मारुं) धन बहुबहु माग्या छतां ते संबंधि [ मने ] उत्तर पण आप्यो नही. ॥ ४२ ॥

निध्यायामि निधानानि यावत्तावदहिव्रजः । व्यलोक्यत स्वकाभाग्यलताकन्दलवृन्दवत् ॥ ४३ ॥

अन्वयः—यावत् निधानानि निध्यायामि, तावत् स्वक अभाग्यलता कंदलवृंदवत् अहिव्रजः व्यलोक्यत. ॥ ४३ ॥

अर्थः—(पछी) जेवामां ( में दाटेलां ) निधानो खोलवा मांड्यां, तेवामां मारां दुर्भाग्यरूपी वेलडीना मूळीयांनां समूहसरखो सर्पोनो समूह (तेमां) जोवामां आव्यो. ॥ ४३ ॥

दिगन्तगतवाणिज्यवित्तप्राप्तिप्रतीक्षणम् । धनिभ्यो धनमादाय स्वकुटुम्बमजीवयम् ॥ ४४ ॥

अन्वयः—दिगंत गत वाणिज्य वित्त प्राप्ति प्रतीक्षणं धनिभ्यः धनं आदाय स्वकुटुंबं अजीवयं. ॥ ४४ ॥

अर्थः—(पछी) मारा देशावरी व्यापारमांथी धन मळवानी राह जोतांथकां धनवानो पासेथी ( उधार ) धन लेइने (तेथी) में मारां कुटुंबनो निर्वाह करवा मांड्यो. ॥ ४४ ॥

**किं तु मद्दिवसप्रान्ते मद्भाग्यतमोमये । सर्वे मम वणिक्पुत्रा मार्गेऽगृह्यन्त तस्करैः ॥ ४५ ॥**

अन्वयः—किंतु मद्भाग्यतमोमये मद्दिवसप्रांते मम सर्वे वणिक्पुत्राः मार्गे तस्करैः अगृह्यन्त. ॥ ४५ ॥

अर्थः—परंतु मारां दुर्भाग्यरूपी अंधकारथी व्यापेला एवा मारा पडता दिवसमां मारा ( ते ) सघळा वाणोतरोने मार्गमां चोरोए पकडी (लुंटी) लीधा ॥ ४५ ॥

**मद्भाग्यविप्रयोगाग्निकीलालिव्याकुला इव । पोतभाजस्तु पाथोधौ ममज्जुर्मम सम्पदः ॥ ४६ ॥**

अन्वयः—मद् भाग्य विप्रयोग अग्नि कीला आलि व्याकुलाः इव मम पोतभाजः संपदः तु पयोधौ ममज्जुः. ॥ ४६ ॥

अर्थः—(वळी) मारा सद्भाग्यना वियोगरूपी अग्निनी ज्वालाओनी श्रेणिथी जाणे (तपीने) व्याकुल थयेली होय नहीं! तेम मारी वहाणोमां रहेली समृद्धि पण महासागरमां डुबी गइ. ॥ ४६ ॥

**एतद्वार्ताश्रुतेरार्तामन्तर्वृत्तिं वहन्नहम् । अवापं न रतिं क्वापि बिभ्यदिभ्यगणादृणी ॥ ४७ ॥**

अन्वयः—एतद् वार्ता श्रुतेः आर्ता वृत्तिं अंतः वहन् ऋणी इभ्यगणात् बिभ्यत् अहं क्व अपि रतिं न अवापं ॥ ४७ ॥

अर्थः—आवा समाचार सांभळवाथी अतिदुःखदायक अवस्थाने हृदयमां धारण करतो थको, तथा करजदार थइ जवाथी ( ते लेणीयात ) शाहुकारोना समूहथी डरतो एवो हुं क्यांय पण शांति न पाम्यो. ॥ ४७ ॥

किं देयमुत्तमर्णानामुत्तरं याचतामिति । भृशं देशान्तरायाहमुत्साहमसृजं निशि ॥ ४८ ॥

अन्वयः—याचतां अधमर्णानां उत्तरं किं देयं ? इति अहं निशि देशांतराय भृशं उत्साहं असृजं ॥ ४८ ॥

अर्थः-हवे आ मागनारा लेणीयातोने उत्तर शुं देवो ? एम में ( चिंतामांने चिंतामां ) रात्रिए परदेशमां नीकळी जवा घणो उत्साह कर्यो. ॥ ४८ ॥

दृशाश्रुमिश्रया वीक्ष्य पूर्णेन्दुवदनां चिरम् । निद्राणां प्रेयसीं पृष्ट्वा दैन्यगद्गदया गिरा ॥ ४९ ॥

दृश्यानि पुनरीदृंशि क्वेति साश्रु दृशं मुहुः । क्षिपन्मुखेषु सुप्तानां शिशूनां मुग्धकान्तिषु ॥ ५० ॥

दुःखौघशम्बलो बाहुसहायः पदवाहनः । निशीथे निःसृतो मन्दं मन्दं मन्दिरतस्ततः ॥ ५१ ॥

अन्वयः—पूर्णइंदुवदनां निद्राणां प्रेयसीं अश्रुमिश्रया दृशा चिरं वीक्ष्य, दैन्यगद्गदया गिरा पृष्ट्रवा, ॥४९॥ पुनः ईदृंशि क्व दृश्यानि ? इति सुप्तानां शिशूनां मुग्धकांतिषु मुखेषु मुहुः साश्रु दृशं क्षिपन् ॥ ५० ॥ दुःखओघशंबलः, बाहुसहायः, पदवाहनः निशीथे ततः मंदिरतः मंदंमंद निःसृतः ॥ ५१ ॥ त्रिभिर्विशेषकं ॥

अर्थः-संपूर्ण चंद्रसरखा मुखवाळी तथा निद्रामां पडेली, एवी मारी स्त्रीने आंसुभरेली आंखथी घणो वखत जोइने, तथा (पछी) दीनता भरेली गद्गदवाणीथी (तेणीने) पूछीने, ॥ ४९ ॥ फरीने आवां क्यां देखावानां छे? एम विचारी सुतेलां बाळकोनां निश्चिंत कांतिवाळां मुखोपर वारंवार आंसुवाळी आंखने फेंकतो ॥ ५० ॥ दुःखना समूहरूपी भातांवाळो, हाथोनीज सहायतावाळो, तथा पगरूपी वाहनवाळो एवो हुं मध्यरात्रिए ते घरमांथी धीमेधीमे (बहार) निकळ्यो. ॥ ५१ ॥ त्रिभिर्विशेषकं ॥

अथाशु गतिचातुर्यात्पुर्या बहिरहं गतः । कुमार सुकुमारत्वान्मेदुरं खेदमासदम् ॥ ५२ ॥

अन्वयः-अथ गतिचातुर्यात् अहं आशु पुर्याः बहिः गतः, हे कुमार! सुकुमारत्वात् मेदुरं खेदं आसदं ॥ ५२ ॥

अर्थः-पछी चालवानी चतुराइथी हुं तरत नगरनी बहार गयो, (परंतु) हे राजकुमार! सुकुमाळ होवाथी (मने) घणो थाक लाग्यो.

अन्वेषद्भ्यो धनिभ्योऽथ भीतः प्रीतिं मृतौ वहन् । झम्पां दातुं पुरीलीलाशैलमौलिं गतः शनैः ॥ ५३ ॥

अन्वयः—अथ अन्वेषद्भ्यः धनिभ्यः भीतः, मृतौ प्रीतिं वहन्, झंपां दातुं पुरीलीलाशैलमौलिं शनैः गतः ॥ ५३ ॥

अर्थः—पछी (मने) शोधनारा (ल्हेणदार) धनवानोथी डरेलो, तथा तेथी मृत्युमां प्रेम राखतो एवो हुं झंपापात करवामाटे नगरीना क्रीडा पर्वतना शिखर पर धीमे रहीने चड्यो. ॥ ५३ ॥

दुःखानि सह देहेन तूर्णं चूर्णयितुं मयि । झम्पार्थं प्रस्थमारूढे कुतोऽप्युक्तिरभूदिति ॥ ५४ ॥

अन्वयः—देहेन सह दुःखानि चूर्णयितुं झंपार्थं मयि प्रस्थं आरूढे कुतः अपि इति उक्तिः अभूत्. ॥ ५४ ॥

अर्थः-(आ) शरीरनी साथे दुःखोना पण चूरेचूरा करवाने झंपापात खावामाटे (जेवामां) हुं खडकपर चड्यो, (तेवामां) क्यांकथी आवा प्रकारनी वाणी (प्रगट) थइ. ॥ ५४ ॥

**मा मानवं भवं हन्त चिन्तामणिमिवार्भकः । परिक्षेपीर्मुधा मूढ प्रौढभाग्यभरार्जितम् ॥ ५५ ॥**

अन्वयः-हंत ! मूढ ! अर्भकः चिंतामणिं इव, प्रौढभाग्यभरअर्जितं मानवं भवं मुधा मा परिक्षेपीः ॥ ५५ ॥

अर्थः-अरे मूर्ख ! बाळक जेम चिंतामणिरत्नने फेंकी दीये, तेम महान् भाग्योवडे संपादन करेला (आ) मनुष्यभवने तुं फोकट गुमाव नही ! ॥ ५५ ॥

**इत्याकर्ण्य क्षिपन्दिक्षु चक्षुरप्रेक्ष्य कंचन । पुनर्जातोऽस्मि पातोत्कस्तदा वागित्यभूत्पुनः ॥ ५६ ॥**

अन्वयः-इति आकर्ण्य दिक्षु चक्षुः क्षिपन्, कंचन अप्रेक्ष्य पुनः पातउत्कः जातः अस्मि, तदा पुनः इति वाक् अभूत्. ॥५६॥

अर्थः—एम सांभळीने दिशाओतरफ नजर करतां, कोइने पण न जोवाथी, फरीने झंपापातमाटे हुं उत्सुक थयो, त्यारे वळी पाछी आवी रीतनी वाणी थइ. ॥ ५६ ॥

**खेदभेदधिया प्राणप्रहाणं मुग्ध मा विधाः । स्फीतशीतभिदे कल्पशालं ज्वालयतीह कः ॥ ५७ ॥**

अन्वयः—हे मुग्ध ! खेदभेदधिया प्राणप्रहाणं मा विधाः ! इह स्फीतशीतभिदे कल्पशालं कः ज्वालयति. ! ॥ ५७ ॥

अर्थः—हे मूर्ख ! दुःखना नाशनी बुद्धिथी (तुं) आपघात म कर ! (केमके) आ जगतमां घणी ठंडी मटाडवामाटे कल्पवृक्षने

कोण वाळे ? ॥ ५७ ॥

इति श्रुत्वार्पयन्दिक्षु पञ्चषाणि पदान्यहम् । कंचिदप्रेक्ष्य झम्पार्थी जातश्चाभूच्च वागियम् ॥ ५८ ॥

अन्वयः—इति श्रुत्वा अहं दिक्षु पंचषाणि पदानि अर्पयन् कंचित् अप्रेक्ष्य झंपार्थी जातः, च इयं वाक् अभूत्. ॥ ५८ ॥

अर्थः—एम सांभळीने हुं दिशाओतरफ पांच छ पगलां चाल्यो. (परंतु त्यां) कोइने पण न जोवाथी (पाछो) झम्पापातमाटे तैयार थयो, (एवामां पाछी) आवी रीतनी वाणी थइ. ॥ ५८ ॥

दुःखद्वेषेण किं मूर्ख निजं त्यजसि जीवितम् । रेणुवैरेण पीयूषच्छटां किरति कः क्षितौ ॥ ५९ ॥

अन्वयः—(हे) मूर्ख ! दुःखद्वेषेण निजं जीवितं किं त्यजसि ? रेणुवैरेण क्षितौ पीयूषच्छटां कः किरति. ? ॥ ५९ ॥

अर्थः—हे मूर्ख ! दुःखना कंटाळाथी (तुं) पोतानुं जीवन केम तजी दे छे ? (केमके) धूळथी कंटाळीने पृथ्वीपर अमृतनो छंटकाव कोण करे ? ॥ ५९ ॥

तामुक्तिमवगण्यैव तुङ्गतः शैलशृङ्गतः । झम्पामहमदां नाम शृण्वन्मा मेति भाषितम् ॥ ६० ॥

अन्वयः—तां उक्तिं अवगण्य एव, मा मा इति भाषितं शृण्वन् अहं नाम तुंगतः शैलशृंगतः झंपां अदां. ॥ ६० ॥

अर्थः–ते वाणीनी दरकार कर्या विनाज “ मा मा ” एवुं वचन सांभळतां (छतां पण) में तो (ते) पर्वतना उंचां शिखरपरथी झंपापात दीधो. ॥ ६० ॥

पातसंवेगसंजातमहावातधुतस्ततः । मूर्छामहं महीदेशसदेशगमनोऽगमम् ॥ ६१ ॥

अन्वयः-ततः पात संवेग संजात महावात धुतः, मही देश सदेश गमनः अहं मूर्छा अगमं ॥ ६१ ॥

अर्थः-पछी पडवाना वेगथी उत्पन्न थयेला महान् वायुए हडसेलेलो, तथा पृथ्वीना भाग तरफ छे गति जेनी एवो हुं मूर्छित थइ पड्यो. ॥ ६१ ॥

अथोन्मीलितदृक्तस्य शैलस्यैवोपरि स्थितम् । अपश्यमहमात्मानं मुनिमेकं च कंचन ॥ ६२ ॥

अन्वयः—अथ उन्मीलितदृक् अहं तस्य एव शैलस्य उपरि स्थितं आत्मानं, च कंचन एकं मुनिं अपश्यं ॥ ६२ ॥

अर्थः-पछी (मारी) आंखो उघडवाथी में तेज पर्वत पर रहेला एवा मने पोताने, तथा कोइ एक मुनिने जोया. ॥ ६२ ॥

किं स्वप्नः किं मतिभ्रान्तिरसाविति वितर्किणम् । विस्मयस्थमथोवाच स मामसमवाग्मुनिः ॥ ६३ ॥

अन्वयः-अथ किं असौ स्वप्नः ? किं मतिभ्रांतिः ? इति वितर्किणं, विस्मयस्थं मां असमवाग् मुनिः उवाच. ॥ ६३ ॥

अर्थः-पछी शुं आ ते स्वप्न छे ? के शुं मतिनो भ्रम छे ? एवो तर्क करता, तथा आश्चर्यमां पडेला एवा मने अतुल्य वाणीवाळा (ते) मुनिए कह्युं के, ॥ ६३ ॥

मया मुहुर्निषिद्धोऽपि मर्तुं धावसि किं मुधा । दुःखानां कौषधं मृत्युरात्मनः सहचारिणाम् ॥ ६४ ॥

अन्वयः—मया मुहुः निषिद्धः अपि मुधा मर्तुं किं धावसि ? आत्मनः सहचारिणां दुःखानां औषधं मृत्युः क्व ? ॥ ६४ ॥

अर्थः—में वारंवार निवार्या छतां पण (तुं) फोकट मरवामाटे केम दोडे छे? केमके, आत्मानी साथेज चालनारां एवां दुःखोनुं औषध मृत्यु क्यांये (सांभळ्युं छे?) ॥ ६४ ॥

इत्युक्त्वा मयि मीमांसासंमुखे स मुनीश्वरः । विगलन्मन्मनःशोकं श्लोकं जल्पन्खमुद्ययौ ॥ ६५ ॥

अन्वयः—इति उक्त्वा मयि मीमांसासंमुखे स मुनीश्वरः विगलत् मत् मनःशोकं श्लोकं जल्पन् खं उद्ययौ. ॥ ६५ ॥

अर्थः-एवी रीतनां (ते मुनिनां) वचनथी जेवो हुं विचारमां गरकाव थइ गयो, तेवामां ते मुनिराज मारा हृदयना शोकने मटाडनारा एवा (एक) श्लोकने बोलताथका आकाशमां उडी गया. ॥ ६५ ॥

ततः क्षणं तनूकान्तिपुनरुक्तारुणोदये । गते तस्मिन्नदृश्यत्वमहमित्थमचिन्तयम् ॥ ६६ ॥

अन्वयः—ततः क्षणं तनू कांतिपुनरुक्त अरुणोदये तस्मिन् अदृश्यत्वं गते अहं इत्थं अचिंतयं. ॥ ६६ ॥

अर्थः-पछी क्षणवार शरीरना तेजथी फरीने करेल छे अरुणनो उदय जेणे, एवा ते मुनिराज ज्यारे अदृश्य थइ गया, त्यारे में एम विचार्युं के, ॥ ६६ ॥

नूनं कोऽप्येष संसारतारणश्चारणो मुनिः । रात्रावत्राचले कायोत्सर्गं मत्सुकृतैर्दधौ ॥ ६७ ॥

अन्वयः—नूनं मत्सुकृतैः संसारतारणः एषः कः अपि चारणः मुनिः रात्रौ अत्र अचले कायोत्सर्गं दधौ. ॥ ॥ ६७ ॥

अर्थः-खरेखर मारां पुण्योथीज संसारमांथी तारनारा आ कोइक चारणमुनि रात्रिए आ पर्वतपर कायोत्सर्गध्यानमां रह्या हता.।६७।

अनेनैव दयार्द्रेण पतन्नद्रेरहं धृतः । कृतश्च श्लोकदानेन सदानेन सुनिर्वृतः ॥ ६८ ॥

अन्वयः–दया आर्द्रेण अनेन एव अद्रेः पतन् अहं धृतः, च श्लोकदानेन अनेन सदा सुनिर्वृतः कृतः. ॥ ६८ ॥

अर्थः–दयाथी भींजायेला एवा आ मुनिएज पर्वतपरथी पडता एवा मने (अधर) झीली लीधो, तथा श्लोकना दानथी तेमणे मने हमेशने माटे शांत कर्यो. ॥ ६८ ॥

इति ध्यात्वा धरां नत्वा मुनेस्तस्य क्रमाङ्किताम् । तच्छ्लोकध्यानपीयूषपानच्छिन्नखिदाभरः ॥ ६९ ॥

सुप्तेष्वेव मनुष्येषु स्वेषु शेषे निशाक्षणे । मन्देतरतरैराशु पदैः सदनमासदम् ॥ ७० ॥ युग्मं ॥

अन्वयः–इति ध्यात्वा तस्य मुनेः क्रमांकितां धरां नत्वा, तत् श्लोक ध्यान पीयूष पान च्छिन्नखिदाभरः ॥ ६९ ॥ (अहं) स्वेषु मनुष्येषु सुप्तेषु एव निशाक्षणे शेषे मंदेतरतरैः पदैः आशु सदनं आसदं. ॥ ७० ॥ युग्मं ॥

अर्थः–एम विचारीने ते मुनिराजना चरणोथी अंकित थयेली (ते) भूमिकाने नमीने, ते श्लोकना चिंतवनरूपी अमृतना पानथी नष्ट थयेल छे खेदनो समूह जेनो ॥ ६९ ॥ एवो हुं मारा स्वजनो हजु सूतां हतां त्यांज रात्रिनो थोडो भाग बाकी हतो त्यारे वधारे उतावळे पगले तुरत घेर आव्यो. ॥ ७० ॥ युग्मं ॥

मुनीन्द्रालोकनश्लोकलाभौ मनसि भावयन् । अजीगणं गुणायाहं विपदं सम्पदः पदे ॥ ७१ ॥

अन्वयः—मुनींद्र आलोकन श्लोकलाभौ मनसि भावयन् अहं संपदः पदे विपदं गुणाय अजीगणं. ॥ ७१ ॥

अर्थः—(ते) मुनिमहाराजनां दर्शनने तथा श्लोकना लाभने मनमां विचारतो थको हुं संपत्तिने स्थाने आवेली विपदाने पण गुणकारी गणवा लाग्यो. ॥ ७१ ॥

**मां क्षीणाशेषलक्ष्मीकं मत्वा दाक्षिण्यदीक्षितैः । कदाचिदपि नायाचि लभ्यमिभ्यजनैर्धनम् ॥ ७२ ॥**

अन्वयः—मां क्षीण अशेषलक्ष्मीकं मत्वा दाक्षिण्यदीक्षितैः इभ्यजनैः लभ्यं धनं कदाचित् अपि न अयाचि. ॥ ७२ ॥

अर्थः—मने नष्ट थयेली समस्त लक्ष्मीवाळो जाणीने दाक्षिणताथी उदार मनवाळा एवा ते शाहुकारोए (मारी पासे) लेणुं निकळतुं द्रव्य कोइ पण दिवसे (पाछुं) माग्युं नही. ॥ ७२ ॥

**किंचित्कैश्चित्त्रपावद्भिरधमर्णैर्मम स्वयम् । दत्तं वित्तं कुटुम्बस्य बभूव कशिपुश्रिये ॥ ७३ ॥**

अन्वयः—कैश्चित् मम अधमर्णैः त्रपावद्भिः स्वयं दत्तं किंचित् वित्तं कुटुंबस्य कशिपुश्रिये बभूव. ॥ ७३ ॥

अर्थः—केटलाक मारा करजदारोए लज्जाने वश थइ पोतानी मेळे आवीने आपेलुं कंइक द्रव्य मारा कुटुंबना अन्नवस्त्रआदिकरूप भरणपोषणमाटे उपयोगी थयुं. ॥ ७३ ॥

**इत्यहं यद्भविष्यः सन्प्रियामपि विपद्गताम् । चक्रे श्लोकस्य तस्यार्थसामर्थ्येन प्रमोदिनीम् ॥ ७४ ॥**

अन्वयः—इति यद्भविष्यः सन् अहं विपद्गतां प्रियां अपि तस्य श्लोकस्य अर्थसामर्थ्येन प्रमोदिनीं चक्रे. ॥ ७४ ॥

अर्थः-एवीरीते "जे थनार हशे ते थशे" एवा विचारवाळो थयो थको हुं मारी दुःखणी स्त्रीने पण ते श्लोकनो अर्थ समजावीने आनंदित करवा लाग्यो. ॥ ७४ ॥

**साम्प्रतं मत्प्रियायास्तु सोदरः परिणेष्यते । सागदद्गद्गदोक्त्या मां तदुत्सवगमोत्सुका ॥ ७५ ॥**

अन्वयः-तु सांप्रतं मत्प्रियायाः सोदरः परिणेष्यते, तदुत्सवगमोत्सुका सा गद्गदोक्त्या मां अगदत्. ॥ ७५ ॥

अर्थः-हवे हालमां मारी (ते) स्त्रीनो भाइ परणवानो छे, तेना उत्सवमां जवाने उत्सुक थयेली एवी ते गद्गद्कंठे मने कहेवा लागी के,

**न भूषणानि भूरीणि चीवराणि वराणि न । नाध्वयोग्यानि युग्यानि दानीयानि धनानिच ॥ ७६ ॥**

अन्वयः-भूषणानि भूरीणि न, चीवराणि वराणि न, अध्वयोग्यानि युग्यानि न, च दानीयानि धनानि न. ॥ ७६ ॥

अर्थः-( हे स्वामी! मारेमाटे ) आभूषणो पण घणां नथी, वस्त्रो पण सारां नथी, रस्ते जवामाटे योग्य वाहनो नथी, अने वापरवामाटे धन पण नथी. ॥ ७६ ॥

**स्फारशृङ्गारसारासु दानीयाद्भुतभूतिषु । रंस्ये प्रधानयानासु सोदरासु किमीदृशी ॥ ७७ ॥**

अन्वयः-ईदृशी ( अहं ) स्फारशृंगारसारासु, दानीयाद्भुतभूतिषु, प्रधानयानासु सोदरासु किं रंस्ये? ॥ ७७ ॥

अर्थः-एवी रीतनी आ हुं (त्यां) अति उमदा शृंगारोथी शोभिती थयेलो, वापरवामाटेना अढळक धनवाळी, तथा (बेसवामाटेना) उत्तम वाहनोवाळी एवी (मारी) बहेनोनी वच्चे केम शोभी निकळुं? ॥ ७७ ॥

आत्मानमपि विक्रीयाधिकं किंचित्ततोऽपि वा । मानं मे पाहि मानो हि स्वात्मनोऽप्यधिकः सताम् ॥७८॥

अन्वयः—आत्मानं अपि, वा ततः अपि किंचित् अधिकं विक्रीय मे मानं पाहि? हि मानः सतां आत्मनः अपि अधिकः ॥७८॥

अर्थः—माटे आत्माने, अथवा तेथी पण कंइंक अधिक वस्तुने वेचीने पण मारुं मान राखो? केमके मान छे ते सज्जनोने आत्माथी पण अधिक छे. ॥ ७८ ॥

न मानः पूर्यते चेत्तन्मरणं शरणं मम । मन्यन्ते मानिनो मानमात्मनोऽपि हि दुस्त्यजम् ॥ ७९ ॥

अन्वयः—चेत् मानः न पूर्यते, तत् मम मरणं शरणं, हि मानिनः मानं आत्मनः अपि दुस्त्यजं मन्यंते ॥ ७९ ॥

अर्थः—जो (मारुं) मान न संचवाय, तो मारे मृत्युनुंज शरण लेवुं पडशे, केमके मानी माणसो मानने आत्माथी पण अधिक मानेछे.

इत्याग्रहमहं तस्या हन्त श्याममुखस्तदा । चिरं विचार्य चित्तेन किंकार्यत्वजडोऽभवम् ॥ ८० ॥

अन्वयः—इति तस्याः आग्रहं चिरं चित्तेन विचार्य तदा श्याममुखः अहं हंत किंकार्यत्वजडः अभवं ॥ ८० ॥

अर्थः—एवीरीतना तेणीना आग्रहने घणा वखत सुधी मनमां विचारीने ते वखते झंखवाणा मुखवाळो एवो हुं, अरेरे! हवे मारे शुं करवुं? (एवी चिंताथी) जडज बनी गयो ॥ ८० ॥

वस्तु पश्यामि नो गेहे विना देहेन किंचन । मूल्यं कर्मकृतामेव प्राप्यं तद्विक्रये पुनः ॥ ८१ ॥

अन्वयः—देहेन विना गेहे किंचन वस्तु नो पश्यामि, तद्विक्रये पुनः कर्मकृतां एव मूल्यं प्राप्यं. ॥ ८१ ॥

अर्थः—शरीरविना घरमां कंइ पण वस्तु हुं जोतो नथी, अने ते शरीरना वेंचाणथी तो (फक्त) नोकरीरूपज मूल्य मळवानुं छे.

तत्किं कुर्वे क्व गच्छामीत्युद्यद्दुःखहृदा तदा । स श्लोकः सस्मरे दुःखस्मरणीयतया मया ॥ ८२ ॥

अन्वयः—तत् किं कुर्वे? क्व गच्छमि? इति उद्यत् दुःखहृदा मया तदा दुःखसरणीयतया सः श्लोकः सस्मरे. ॥ ८२ ॥

अर्थः—माटे हुं शुं करुं? अने क्यां जाउं? एम जेना हृदयमां दुःख उत्पन्न थयुं छे, एवो जे हुं तेने ते वखते दुःखना स्मरणथी ते श्लोक याद आवी गयो. ॥ ८२

ततः कदाग्रहग्रस्तमहिलामोहिताशयः । कृत्यतत्त्वं स्वसत्त्वं च तृणयन्धनतृष्णया ॥ ८३ ॥

तं मातृवदविक्रेयमपि श्लोकमिहाप्यहम् । इत्यर्धोक्तेऽश्रुधारालदृगेष न्यग्मुखोऽभवत् ॥ ८४ ॥ युग्मम् ॥

अन्वयः—ततः कदाग्रह ग्रस्त महिला मोहित आशयः धनतृष्णया कृत्यतत्त्वं च स्वसत्त्वं तृणयन् ॥ ८३ ॥ मातृवत् अविक्रेयं अपि तं श्लोकं अहं अपि इह, इति अर्धोक्ते अश्रुधारालदृक् एषः न्यग्मुखः अभवत्. ॥ ८४ ॥ युग्मं ॥

अर्थः—पछी (ए रीते) हठ लेइ बेठेली स्त्रीथी मोहित थयेल आशयवाळो (हुं) द्रव्यनी तृष्णाथी कार्यना स्वरूपने तथा मारी हिम्मतने (पण) तृणसमान गणतो थको ॥ ८३ ॥ मातानीपेठे नही वेचवालायक एवा पण ते श्लोकने हुं पण अहीं, एटलुं अर्धुं वाक्य बोल्याबाद आंखोमां अश्रुधारावाळो ते सुबंधु नीचा मुखवाळो थयो. ॥ ८४ ॥ युग्मं ॥

ततस्तं ग्रन्थिमुद्ग्रन्थ्य तदङ्गुल्यग्रसंज्ञया । कुमारः स्वयमादाय स्वकरे श्लोकपत्रिकाम् ॥ ८५ ॥

**क्षणमात्रं ततो गात्रं स्तम्भपात्रं सृजन्नसौ । किंचित्तदैव तत्स्वादमास्वाद्योच्चैरदोऽवदत् ॥८६॥युग्मम्॥**

अन्वयः—ततः कुमारः तत् अंगुल्यग्रसंज्ञया तं ग्रंथिं स्वयं उद्ग्रथ्य श्लोकपत्रिकां स्वकरे आदाय ॥ ८५ ॥ ततः क्षणमात्रं स्तंभपात्रं गात्रं सृजन् तदा एव किंचित् तत्स्वादं आस्वाद्य असौ उच्चैः अदः अवदत्. ॥ ८६ ॥ युग्मं ॥

अर्थः—पछी ते रतिसारकुमारे तेनी आंगलीना अग्रभागनी संज्ञाथी ते गांठने पोतेज उखेडीने, तथा ते श्लोकनो कागळ पोताना हाथमां लइने, ॥ ८५ ॥ अने पछी क्षणवार स्तंभनीपेठे शरीरने निश्चल करी, तेज वखते कंइक तेनो स्वाद चाखीने तेणे म्होटा स्वरथी एम कह्युं के, ॥ ८६ ॥ युग्मं ॥

**द्रागिन्द्रियमयीं धीराः श्रवणे सृजत स्रजम् । अस्यैष श्लोकराजस्य प्रवेशो भवतीह यत् ॥ ८७ ॥**

अन्वयः—(हे) धीराः! श्रवणे इंद्रियमयीं स्रजं द्राक् सृजत? यत् इह अस्य श्लोकराजस्य एषः प्रवेशः भवति. ॥ ८७ ॥

अर्थः—हे धैर्यवंत मित्रो! तमो कर्णपर सर्व इंद्रियोनी एकाग्रतारूप मालाने धारण करो? केमके तेमां आ श्लोकरूपी राजानो प्रवेश थाय छे. ॥ ८७ ॥

**कार्यः सम्पदि नानन्दः पूर्वपुण्यभिदे हि सा । नैवापदि विषादश्च सा हि प्राक्पापपिष्टये ॥ ८८ ॥**

अन्वयः—संपदि आनंदः न कार्यः, हि सा पूर्वपुण्यभिदे, च आपदि विषादः न, हि सा प्राक्पापपिष्टये. ॥ ८८ ॥

अर्थः—समृद्धि वखते हर्ष न करवो, केमके ते समृद्धि पूर्वे करेलां पुण्योनो विनाश करनारी छे. वळी विपत्ति वखते शोक न

करवो, केमके ते विपत्ति पूर्वना पापोनो नाश करनारी छे. ॥ ८८ ॥

इति श्लोकामृतं पीत्वा प्रीत्या नृत्यभृतामिव । श्रुतीनामाश्रयैरापि कम्पः केषां न मौलिभिः ॥ ८९ ॥

अन्वयः-इति श्लोकअमृतं पीत्वा मीत्या नृत्यभृतां इव श्रुतीनां आश्रयैः केषां मौलिभिः कंपः न आपि? ॥ ८९ ॥

अर्थः-एवी रीते ते श्लोकरूपी अमृत पीने आनंदथी नृत्य करनाराओनी पेठे कर्णोना आश्रयरूप एवां कोनां मस्तको कंपवा न लाग्यां? (अर्थात् सर्व लोको हर्षथी मस्तक कंपाववा लाग्या. ) ॥ ८९ ॥

प्रीतिगौरवगौरेषु तदा पौरेषु दुःखिनम् । भूपभूरभ्यधाद्वाग्भिः सुबन्धुं मधुबन्धुभिः ॥ ९० ॥

अन्वयः-तदा पौरेषु प्रीतिगौरवगौरेषु भूपभूः मधुबंधुभिः वाग्भिः दुखिनं सुबंधु अभ्यधात् ॥ ९० ॥

अर्थः-ते वखते नगरना लोको ते सुबंधुने प्रेम अने सन्माननी नजरे ( जोवा लाग्या, ) अने राजकुमारे पण मधसरखां मधुर वचनोथी ते दुःखी सुबंधुने कह्युं के, ॥ ९० ॥

नूनं त्वमसि मे पूर्वजन्मबन्धुर्यतस्त्वया । सूक्तपीयूषपानस्य भागेनास्मि न वञ्चितः ॥ ९१ ॥

अन्वयः—नूनं त्वं मे पूर्वजन्मबंधुः असि, यतः त्वया सूक्त पीयूषपानस्य भागेन वंचितः न अस्मि. ॥ ९१ ॥

अर्थः—खरेखर तुं मारो पूर्वजन्मनो भाइ छो, केमके तें आ श्लोकरूपी अमृतपाननो (मने) भाग आपवामां संकोच कर्यो नही.

धनं हरिकरिस्वर्णरत्नाद्यमिह माद्यति । विद्यते यत्र कुत्रापि स्पृहा तव गृहाण तत् ॥ ९२ ॥

अन्वयः—इह हरि करि स्वर्ण रत्नाद्यं धनं माद्यति, यत्र कुत्र अपि तव स्पृहा विद्यते, तत् गृहाण! ॥ ९२ ॥

अर्थः—अहीं ( मारी पासे ) घोडा, हाथी, सुवर्ण तथा रत्न आदिक ( घणुं ) धन विद्यमान छे, तेमांथी जे कांइ पण (लेवानी) तारी इच्छा होय, ते तुं ग्रहण कर! ॥ ९२ ॥

इत्युदित्वा ससंमानममुं प्रैषीन्नृपाङ्गजः । दत्वा दुकूलकल्याणरत्नवारणधोरणीः ॥ ९३ ॥

अन्वयः-इति उदित्वा नृपांगजः अमुं दुकूल कल्याण रत्न वारणधोरणीः दत्वा ससंमानं प्रैषीत्. ॥ ९३ ॥

अर्थः-एम कही ते राजकुमारे ते सुबंधुने रेशमी वस्त्रो, सुवर्ण, रत्नो तथा हाथीओनी श्रेणि आपीने सन्मान पूर्वक त्यांथी विदाय कर्यो.

तन्वन्दानानि दीनेषु गुणलीनेषु विस्मितः । ततो भूशक्रभूश्चक्रे श्लोकप्रावेशिकोत्सवम् ॥ ९४ ॥

अन्वयः-ततः भूशक्रभूः विस्मतः गुणलीनेषु दीनेषु दानानि तन्वन् श्लोक मावेशिकउत्सवं चक्रे. ॥ ९४ ॥

अर्थः-पछी (ते) राजकुमारे आश्चर्य पामतां थकां गुणवान दीनजनोने दान आपी ते श्लोकनो मवेशमहोत्सव कर्यो. ॥ ९४ ॥

निर्गम्य दिनमुन्निद्रकवीन्द्रकुलकेलिभिः । असौ नक्तं नृदेवस्य सेवार्थं संमदी ययौ ॥ ९५ ॥

अन्वयः-संमदी असौ उन्निद्रकवींद्रकुलकेलिभिः दिनं निर्गम्य नक्तं नृदेवस्य सेवार्थं ययौ. ॥ ९५ ॥

अर्थः-हर्षित थयेलो आ राजकुमार हुशीयार कविओना समूहो साथेना विनोदमां दिवस वीताडीने रात्रिए राजानी ( पोताना

पितानी ) सेवामां हाजर थयो. ॥ ९१ ॥

क्षणेऽत्र क्षोणिनेतारमेत्य व्ययनियोगिना । अवाच्यत चमत्कुर्वच्चित्तो वित्तोच्चयव्ययः ॥ ९६ ॥

अन्वयः-अत्र क्षणे व्ययनियोगिना एत्य चमत्कुर्वच्चित्तः वित्तोच्चयव्ययः क्षोणिनेतारं अवाच्यत. ॥ ९६ ॥

अर्थः-ते वखते खजानचीए आवीने मनमां आश्चर्य करावे एवो ( कुमारे करेलो ) धनना समूहनो व्यय राजापासे जाहेर कर्यो.

अथ क्रोधादिलाधारः कुमारमिदमूचिवान्। विभवं विभुताप्राणान्मुधा मुग्ध किमुज्झसि ॥९७ ॥

अन्वयः—अथ इलाधारः क्रोधात् कुमारं इदं ऊचिवान्, (हे) मुग्ध ! विभुताप्राणान् विभवं मुधा किं उज्झसि ? ॥ ९७ ॥

अर्थः—त्यारे राजाए क्रोधथी कुमारने कह्युं के, अरे ! मूर्ख ! ( आपणी ) म्होटाइना प्राणरूप एवां द्रव्यने तुं नाहक शा माटे उडावी दे छे ? ॥ ९७ ॥

आकरः परमः काव्यमणीनामनणीयसाम् । न स्यात्कशिपुमात्रस्य दानतः क्वानतः कविः ॥ ९८ ॥

अन्वयः-अनणीयसां काव्यमणीनां परमः आकरः कविः कशिपुमात्रस्य दानतः क्व आनतः न स्यात् ? ॥ ९८ ॥

अर्थः-महान् काव्योरूपी रत्नोनी म्होटी खाणरूप महाकवि ( पण ) फक्त अन्नवस्त्रना दानथी क्यां नमतो नथी आवी पडतो ?

तत्किमेष तदुन्मेषमात्रगात्रव्यवस्थितिः । श्लोकः कनकलक्षस्य क्षयादङ्गीकृतस्त्वया ॥ ९९ ॥

अन्वयः—तत् तत् उन्मेषमात्र गात्र व्यवस्थितिः एषः श्लोकः कनकलक्षस्य क्षयात् त्वया किं अंगीकृतः ? ॥ ९९ ॥

अर्थः—माटे फक्त तेनी आंखना पलकारा जेटली स्थितिवाळो ( अर्थात् आंख उघाडीयें त्यां तो जे वंचाइ संभळाइ जाय एवडो ) आ श्लोक लाख सोनामोहोरो खरचीने तें शामाटे लीधो ? ॥ ९९ ॥

**बीजं लोकद्वयानन्दकारिणोः कामधर्मयोः । तृणवत्त्यजति व्यक्तबोधनः को धनव्रजम् ॥ १०० ॥**

अन्वयः—लोकद्वयआनंदकारिणोः कामधर्मयोः बीजं धनव्रजं कः व्यक्तबोधनः तृणवत् त्यजति ? ॥ १०० ॥

अर्थः—आ लोक अने परलोक, एम बन्ने लोकमां आनंद करावनारा एवा काम अने धर्मना बीजसरखा धनना समूहने कयो चतुर माणस घासनी पेठे उडावी दे ? ॥ १०० ॥

**कलाविक्रमबुद्धीनामसाध्यमपि साधयेत् । यत्तद्वित्तमवज्ञानरूपे कूपेऽपि कः क्षिपेत् ॥ १०१ ॥**

अन्वयः–कला विक्रम बुद्धीनां अपि असाध्यं यत् साधयेत्, तत् वित्तं अपि अवज्ञानरूपे कूपे कः क्षिपेत् ? ॥ १०१ ॥

अर्थः–कला, पराक्रम, तथा बुद्धिवडे पण जे साधी शकाय नही एवुं कार्य पण जे साधी शके छे, ते धनने पण अज्ञानरूपी कुवामां कोण फेंकी दे ? ॥ १०१ ॥

**द्रविणैः कृपणोऽप्येति सेव्यतां महतामपि । सेव्यः स्वर्णाद्रिरुन्निद्रैः किं सदैव न दैवतैः ॥ १०२ ॥**

अन्वयः—कृपणः अपि द्रविणैः महतां अपि सेव्यतां एति, उन्निद्रैः दैवतैः स्वर्णाद्रिः किं सदैव न सेव्यः ? ॥ १०२ ॥

अर्थः—लोभीष्ट पण (तेना) धनवडे करीने महान् पुरुषोथी पण सेवाय छे, केमके समर्थ एवा देवोथी पण मेरु पर्वत शुं हमेशां सेवातो नथी ? ॥ १०२ ॥

गुणी रक्तोऽपि मुच्येत क्षीणश्रीराश्रितैरपि । त्यजन्ति निशि निःश्रीकानलिनो नलिनोत्करान् ॥ १०३ ॥

अन्वयः-रक्तः अपि क्षीणश्रीः गुणी आश्रितैः अपि मुच्येत, निशि निःश्रीकान् नलिनोत्करान् अलिनः त्यजंति. ॥ १०३ ॥

अर्थः—व्हाला एवा पण निर्धन थयेला गुणी माणसने ( तेना ) आश्रीतो पण छोडी जायछे, केमके रात्रिए शोभारहित थयेला (बीडाइ गयेला) कमळोना समूहोने भमराओ तजी दे छे. ॥ १०३ ॥

ध्यात्वेत्यर्जयितुं वित्तं न स्वं कः संशये क्षिपेत् । अबालस्त्वमिवोत्तालः क इति व्ययति श्रियम् ।१०४।

अन्वयः-इति ध्यात्वा वित्तं अर्जयितुं स्वं कः संशये न क्षिपेत् ? त्वं इव उत्तालः कः अबालः इति श्रियं व्ययति? ॥ १०४ ॥

अर्थः—एम विचारीने धन मेळववामाटे पोताना आत्माने कोण मुश्केलीमां मूकतो नथी ? तथा तारीपेठे उतावळो थइने कयो समजु माणस आवी रीते धन उडाडे छे ? ॥ १०४ ॥

अथ पुंस्कोकिलालापकल्पामयमकल्पयत् । कुमारः पुण्यकान्तारसहकारतरुर्गिरम् ॥ १०५ ॥

अन्वयः—अथ पुण्य कांतार सहकारतरुः अयं कुमारः पुंस्कोकिल आलाप कल्पां गिरं अकल्पयत्. ॥ १०५ ॥

अर्थः—पछी पुण्यरूपी वनमां आम्रवृक्षसरखो आ रतिसार कुमार कोयलना (मधुर) टहुकार सरखी वाणी बोलवा लाग्यो के,

**शतशः सत्सु विद्वत्सु सत्काव्याभिगमः कुतः । वज्राकरेऽपि सद्वज्रं निष्पुण्यैः क्वापि नाप्यते ॥ १०६ ॥**

अन्वयः-शतशः विद्वत्सु सत्सु सत्काव्य अभिगमः कुतः? वज्राकरे अपि निष्पुण्यैः सद्वज्रं क्व अपि न आप्यते. ॥ १०६ ॥

अर्थः-सैंकडोगमे विद्वानो होवा छतां पण उत्तम काव्यनी प्राप्ति (ज्ञान) क्यां (सेहेली) पडी छे? केमके हीरानी खाणमां (गया) छतां पण पुण्यरहित माणसोने निर्दोष उमदो हीरो क्यांय पण मळी शकतो नथी. ॥ १०६ ॥

**श्रद्धा धर्मस्य कामस्य प्रीतिरुत्पत्तिकारणम् । लोला तत्कर्मणि श्रीस्तु दासी कस्तत्र रज्यति ॥ १०७ ॥**

अन्वयः—धर्मस्य श्रद्धा, कामस्य प्रीतिः उत्पत्तिकारणं, तत्कर्मणि श्रीः तु लोला दासी, तत्र कः रज्यति? ॥ १०७ ॥

अर्थ.—धर्मनी उत्पत्तिनुं कारण तो श्रद्धा छे, अने कामनी उत्पत्तिनुं कारण तो प्रीति छे. ते बन्ने कार्योमां लक्ष्मी तो ( एक ) चपल दासीसरखी छे, माटे ते दासीमां कोण ललचाय? ॥ १०७ ॥

**लीलयैव कलाशौर्यबुध्धयः साधयन्ति यम् । तमर्थं तदसाध्येऽपि साधकं कः सुधीर्दिशेत् ॥ १०८ ॥**

अन्वयः—कला शौर्य बुद्धयः यं लीलया एव साधयंति, तं अर्थं कः सुधीः तत् असाध्ये अपि साधकं दिशेत्? ॥ १०८ ॥

अर्थः—कळा, पराक्रम अने बुद्धि जे धनने फक्त क्रीडामात्रमांज मेळवी शके छे, एवां ते धनने कयो उत्तम बुद्धिवान माणस तेथी न सधाय एवां पण कार्यमाटे साधकतरीके उपदेशे? ॥ १०८ ॥

अज्ञानकूपश्चिद्रूपैरर्थ एवोपदिश्यते । अशक्यं क्रष्टुमात्मानमत्र कस्तृष्णया क्षिपेत् ॥ १०९ ॥

अन्वयः—चिद्रूपैः अर्थः एव अज्ञानकूपः उपदिश्यते, क्रष्टुं अशक्यं आत्मानं तृष्णया कः अत्र क्षिपेत्? ॥ १०९ ॥

अर्थः—(वळी) ज्ञानीओए धननेज अज्ञाननो कुओ कहेलो छे, (के जेमांथी) पाछो कहाडवो अशक्य थइ पडे, एवा (पोताना) आत्माने लालचु बनी कोण तेमां फेंके? ॥ १०९ ॥

निर्ग्रन्थोऽपि विरक्तोऽपि निर्गुणोऽपि यतिः सताम् । सेव्यः स्याद्येन तज्ज्ञानं यतन्तेऽर्जयितुं बुधाः ॥११०॥

अन्वयः-निर्ग्रंथः अपि, विरक्तः अपि, निर्गुणः अपि यतिः सतां सेव्यः स्यात्, येन तद्ज्ञानं अर्जयितुं बुधाः यतंते. ॥११०॥

अर्थः-निर्धन होवा छतां, विरक्त होवा छतां, तथा निर्गुणी होवा छतां पण मुनिराज सज्जनोने सेववा लायक थाय छे, केमके तेनुं ज्ञान मेळववामाटे विद्वानो (पण) प्रयत्न करे छे. ॥ ११० ॥

इत्यनादरणीयैः स्वैरसंख्यैरपि गृह्यते । सतामादरणीयश्चेज्ज्ञानलेशोऽपि लभ्यते ॥ १११ ॥

अन्वयः—इति अनादरणीयैः असंख्यै स्वैः अपि सतां आदरणीयः ज्ञानलेशः अपि चेत् लभ्यते, गृह्यते. ॥ १११ ॥

अर्थः-माटे एवी रीते अनादर करवालायक एवां असंख्य द्रव्यवडे पण सज्जनोने लेवालायक ज्ञाननो लेशमात्र पण जो मळतो होय, तोपण लेवो जोइए. ॥ १११ ॥

एवमुत्तरमुद्दामं ददाने नन्दने नृपः । कामं काममपि नोवाच वाचं रोषातिरूक्षदृक् ॥ ११२ ॥

अन्वयः-एवं नंदने उद्दामं उत्तरं ददाने रोष अतिरूक्षदृक् नृपः कामं कां अपि वाचं न उवाच. ॥ ११२ ॥

अर्थः-एवीरीते पुत्रे सचोट उत्तर देवाथी क्रोधथी अत्यंत तुच्छकार दर्शावनारी आंखोवाळो ते राजा सहेज कंइपण वचन बोल्यो नही. ॥ ११२ ॥

अथोत्तस्थौ कुमारोऽयं भूवल्लभसभान्तरात् । देशान्तरगतिध्यानतत्परस्तत्पराभवात् ॥ ११३ ॥

अन्वयः-अथ तत्पराभवात् देशांतरगतिध्यानतत्परः अयं कुमारः भूवल्लभसभांतरात् उत्तस्थौ. ॥ ११३ ॥

अर्थः—हवे तेवी रीतनां ( पोताना ) अपमानथी परदेशमां निकळी जवाना विचारमां तत्पर थयेलो ते रतिसारकुमार राजानी सभामांथी उठी निकळ्यो. ॥ ११३ ॥

गुप्तः सुप्तं जनं मुक्त्वा पुरान्निशि विनिःसृतः । कुमारो वारिजव्यूहमिव व्योम्नो विभाविभुः ॥११४॥

अन्वयः—निशि सुप्तं वारिज व्यूहं मुक्त्वा विभाविभुः व्योम्नः इव कुमारः गुप्तः (सुप्तं) जनं मुक्त्वा पुरात् विनिःसृतः ॥११४॥

अर्थ-रात्रिए बीडाइ गयेलां कमलोना समूहने छोडीने सूर्य जेम आकाशमांथी ( चाल्यो जाय ) तेम आ रतिसार कुमार गुप्तपणे निद्राधीन थयेला लोकोने छोडीने नगरथी (बहार) निकळी गयो. ॥ ११४ ॥

खुरलीखेलनाभ्यासादजातक्रमणश्रमः । अलं चलन्नलङ्घिष्ट महीमेष महीयसीम् ॥ ११५ ॥

अन्वयः--खुरली खेलन अभ्यासात् अजात क्रमण श्रमः एषः चलन् अलं महीयसीं महीं अलंघिष्ट. ॥ ११५ ॥

अर्थः—कसरतनी क्रीडाना अभ्यासथी नथी लागेल चालवानो थाक जेने, एवो आ राजकुमार चालतो थको सुखेसुखे घणी पृथ्वी ओळंगी गयो. ॥ ११५ ॥

श्वापदाः स्वापकालेऽपि महारण्ये महस्विनः । ज्वलदग्निधिया नासन्नासन्नास्तस्य कुत्रचित् ॥ ११६ ॥

अन्वयः—महारण्ये तस्य महस्विनः स्वापकाले अपि ज्वलदग्निधिया श्वापदाः कुत्रचित् आसन्नाः न आसन्. ॥ ११६ ॥

अर्थः-म्होटां (भयानक) जंगलमां ते तेजस्वी कुमारना निद्रासमये पण बळता अग्निनी बुद्धिथी जंगली हिंसक प्राणीओ क्यांयें (तेनी) नजीक (पण) आव्या नही. ॥ ११६ ॥

ईदृग्नरा न रामत्वं वहन्ते कोऽप्ययं सुरः । हेलया खेलतीत्येनं तस्करा न पराभवन् ॥ ११७ ॥

अन्वयः—नराः ईदृग् रामत्वं न वहंते, अयं कः अपि सुरः हेलया खेलति, इति एनं तस्कराः न पराभवन्. ॥ ११७ ॥

अर्थः—माणसो (तो) आवां शोभनिकपणाने धारण करता नथी, (माटे) आ कोइक देव आनंदथी (स्वेच्छाये) क्रीडा करी रह्यो छे, एम विचारी तेने चोरोए पण हेरान कर्यो नही. ॥ ११७ ॥

इति सत्त्ववतां धुर्यस्तुर्येऽहनि नृपाङ्गजः । धराहारो निराहारः श्रावस्तीं नगरीमगात् ॥ ११८ ॥

अन्वयः-इति सत्त्ववतां धुर्यः धराहारः नृपांगजः निराहारः तुर्ये अहनि श्रावस्तीं नगरीं अगात्. ॥ ११८ ॥

अर्थः-एवी रीते हिम्मतवानोमां अग्रेसर, तथा पृथ्वीना अलंकारसरखो ते रतिसार कुमार भोजनरहित चोथे दिवसे श्रावस्ती नगरीमां आवी पहोंच्यो. ॥ ११८ ॥

मध्यंदिने दिनेशस्य कान्तिभिः क्लान्तिमागतः । श्रान्तस्तत्र विशश्राम कामस्यायतने ततः ॥ ११९ ॥

अन्वयः-ततः मध्यंदिने दिनेशस्य कांतिभिः क्लांतिं आगतः, श्रांतः (सः) तत्र कामस्य आयतने विशश्राम. ॥ ११९ ॥

अर्थः-पछी मध्याह्नकाळे सूर्यना तापथी कंटाळीने थाकी गयेलो ते राजकुमार त्यां कामदेवना मंदिरमां विश्राम लेवा बेठो. ।११९।

कोऽप्युज्ज्वलज्वलद्धामा सामान्यो न पुमानयम् । इति ध्यानवशादेव देवपूजिकया रयात् ॥ १२० ॥

आनीय शुचिपानीयकरकं नरकुञ्जरः । सफलीक्रियतां वीर नीरमित्यभ्यधायि सः ॥ १२१ ॥ युग्मम् ॥

अन्वयः-उज्ज्वल ज्वलद्धामा अयं कः अपि सामान्यः पुमान् न, इति ध्यानवशात् एव देवपूजिकया रयात् ॥ १२० ॥ शुचिपानीयकरकं आनीय, (हे) वीर ! नीरं सफलीक्रियतां ? इति सः नरकुंजरः अभ्यधायि. ॥ १२१ ॥ युग्मं ॥

अर्थः--चळकता उज्ज्वल तेजवाळो आ कोइक साधारण पुरुष नथी, एवा विचारथीज (ते) देवनी पूजारीये तुरत ॥ १२० ॥ निर्मलजलथी भरेलो लोटो लावीने, हे वीरपुरुष ! आ जलने (तमो) सफल करो ? एम ते उत्तम पुरुषने कह्युं. ॥ १२१ ॥ युग्मं ॥

ता माधुरीधुरीणाः स वनरीणः पपावपः । प्रीतो भवभ्रमिश्रान्त इव तीर्थेशदेशनाः ॥ १२२ ॥

अन्वयः-भव भ्रमि श्रांतः तीर्थेशदेशनाः इव, वनरीणः सः प्रीतः ताः माधुरीधुरीणाः अपः पपौ. ॥ १२२ ॥

अर्थः-संसारना भ्रमणथी थाकी गयेलो ( भव्य प्राणी ) जेम श्रीतीर्थंकरप्रभुनी देशनानुं पान करे, तेम वनमां भमवाथी थाकी गयेला ते रतिसारकुमारे खुशी थइने ते अति मधुर जल पीधुं. ॥ १२२ ॥

तदा संहर्षवाचालपिकीजालकुहूपमम् । रवं श्रुत्वा किमत्रेति तत्रेमां पृच्छति स्म सः ॥ १२३ ॥

अन्वयः—तदा तत्र संहर्ष वाचाल पिकी जाल कुहूपमं रवं श्रुत्वा अत्र किं? इति सः इमां पृच्छतिस्म. ॥ १२३ ॥

अर्थः—ते वखते त्यां हर्षथी वाचाल थयेली कोकिलाओना समूहना टउकारव सरखो अवाज सांभळीने " अहीं शुं छे ? " एम ते राजकुमारे तेणीने पूछयुं, ॥ १२३ ॥

सा जगौ राजगौराणां यशसां विनिवेशनम् । नृपः कृप इतीहास्ति रिपुहास्तिककेसरी ॥ १२४ ॥

अन्वयः—सा जगौ, राजगौराणां यशसां विनिवेशनं, रिपुहास्तिककेसरी कृपः इति इह नृपः अस्ति. ॥ १२४ ॥

अर्थः—तेणीए कह्युं के, महान् राजाओना यशना स्थान सरखो, अने शत्रुओरूपी हाथीओना समूहने ( जीतवामां ) सिंह सरखो " कृप " एवा नामनो अहीं राजा छे. ॥ १२४ ॥

तस्य कान्त्यधिकन्यासा कन्या सारङ्गशावदृक् । सौभाग्यमञ्जरीत्यस्ति सौभाग्यतरुमञ्जरी ॥ १२५ ॥

अन्वयः—तस्य कांति अधिकन्यासा, सारंग शावदृक्, सौभाग्यतरुमंजरी सौभाग्यमंजरी इति कन्या अस्ति. ॥ १२५ ॥

अर्थः—ते राजानी कांतिना म्होटा भंडारसरखी, तथा हरिणना बाळकसरखी आंखोवाळी, अने सौभाग्यरूपी वृक्षनी मांजर सरखी " सौभाग्यमंजरी " एवा नामनी पुत्री छे. ॥ १२५ ॥

**मुधा सुधाभुजां चक्षुरनिमेषत्वभूरभूत् । सा रम्यरूपपीयूषकूपिका न न्यरूपि यैः ॥ १२६ ॥**

अन्वयः—रम्य रूप पीयूष कूपिका सा यैः न न्यरूपि, सुधाभुजां चक्षुः मुधा अनिमेषत्वभूः अभूत् ॥ १२६ ॥

अर्थः—मनोहर रूप रूपी अमृतनी कूपिकासरखी एवी ते राजकन्याने जे देवोए जोइ नथी, एवा ते देवोनी आंख (पण) फोकटज निर्निमेषपणाना स्थानरूप थयेली (जाणवी.) ॥ १२६ ॥

**सर्वस्वं पुण्यरूपस्य कन्यारत्नमिदं महत् । बाल्येन यामिकेनेव यौवनायार्पितं यतः ॥ १२७ ॥**

अन्वयः—यतः पुण्य रूपस्य सर्वस्वं इदं महत् कन्यारत्नं यामिकेन इव बाल्येन यौवनाय अर्पितं. ॥ १२७ ॥

अर्थः—केमके निर्मलरूपनी सर्व मिल्कतसरखुं आ कन्यारूपी अमूल्य रत्न चोकीदारसरखी बाल्यअवस्थाये (हवे) यौवनवयने सोंपी दीधुं छे. (अर्थात् ते रत्नसरखी कन्या बाल्यपणुं तजीने यौवनवयने प्राप्त थयेली छे.) ॥ १२७ ॥

**धीराख्यमन्त्रिधन्याख्यश्रेष्ठिकन्ये शुभे उभे । तस्याः सख्यौ कलाहृद्ये विद्येते तुल्ययौवने ॥ १२८ ॥**

अन्वयः—शुभे, कलाहृद्ये, तुल्ययौवने उभे धीराख्य मंत्रि धन्याख्य श्रेष्ठिकन्ये तस्याः सख्यौ विद्येते. ॥ १२८ ॥

अर्थः—मनोहर, सर्व कलासंपन्न, तथा सरखा यौवनवाळी धीरनामना मंत्रीनी, तथा धन्यनामना शेठनी, एम ते कन्याओ ते राजकुमारीनी सखीओ छे. ॥ १२८ ॥

ध्यायन्राजसुतारूपे न्यायं घौणाक्षरं विधिः । शिल्पिसिद्धिपरीक्षार्थमिव ते व्यधिताद्भुते ॥ १२९ ॥

अन्वयः—राजसुतारूपे धौणाक्षरं न्यायं ध्यायन् विधिः शिल्पि सिद्धि परीक्षार्थं इव अद्भुते ते व्यधित ॥ १२९ ॥

अर्थः—ते राजपुत्रीना रूपमां घूणाक्षरन्यायने विचारता एवा ब्रह्माए शिल्पशास्त्रीओनी सिद्धिनी परीक्षामाटे जाणें होय नही? तेम ते बन्ने अद्भुत कन्याओने (पण) बनावी छे. ॥ १२९ ॥

प्रियंवदासुताराख्ये सख्यौ ते सर्वकर्मसु । तां कदाचिन्न मुञ्चेते रतिकान्ती इव श्रियम् ॥ १३० ॥

अन्वयः—प्रियंवदा सुताराख्ये सर्व कर्मसु सख्यौ ते, रतिकांती श्रियं इव तां कदाचित् न मुंचेते. ॥ १३० ॥

अर्थः—प्रियंवदा अने सुतारा नामनी, तथा सर्व कार्योमां साथे रहेनारी, एवी ते बन्ने कन्याओ, रति अने कांति जेम लक्ष्मीने तजे नही, तेम ते राजकुमारीने तजती नथी. ॥ १३० ॥

त्रैलोक्यरमणीरूपसम्पदामिव देवताः । तिस्रोऽपि कौशलं प्रापुः सकलासु कलासु ताः ॥ १३१ ॥

अन्वयः—त्रैलोक्य रमणी रूप संपदां देवताः इव ताः तिस्रः अपि सकलासु कलासु कौशलं प्रापुः. ॥१३१ ॥

अर्थः—त्रणे लोकोनी स्त्रीओना रूपनी संपत्तिनी जाणे (अधिष्टायिका) देवीओ होय नही? एवी ते त्रणे कन्याओए सर्व कला-

ओमां निपुणता मेळवी. ॥ १३१ ॥

श्रीतनूजस्य पूजार्थमायान्त्यन्वहमत्र ताः । तत्परीवारनारीणां रवः सम्यग्निशाम्यते ॥ १३२ ॥

अन्वयः--श्रीतनूजस्य पूजार्थं ताः अत्र अन्वहं आयांति, तत्परीवारनारीणां रवः सम्यग् निशाम्यते. ॥ १३२ ॥

अर्थः--कामदेवनी पूजामाटे ते कन्याओ अहीं हमेशां आवे छे, तेओना परीवारनी स्त्रीओनो (आ) शब्द सारीरीते संभळाय छे.

इत्यस्यां विकसद्वाचि साचिचञ्चद्विलोचनाः । व्यलोक्यन्त कुमारेण योषितस्तोषितस्मराः ॥ १३३ ॥

अन्वयः—इति अस्यां विकसत्वाचि साचिचंचद्विलोचनाः, तोषितस्मराः योषितः कुमारेण व्यलोक्यंत. ॥ १३३ ॥

अर्थः—एवी रीते ते पूजारी वात करती हती, एवामां तीर्छुं जोती चळकती आंखोवाळी, तथा (पूजीने) खुशी करेल छे कामदेवने जेओए, एवी ते स्त्रीओने ते रतिसारकुमारे जोइ. ॥ १३३ ॥

तिस्रो नरविमानस्थास्तासु प्रैक्ष्यन्त कन्यकाः । तेनानङ्गक्षितीशस्य प्रत्यक्षा इव शक्तयः ॥ १३४ ॥

अन्वयः—तेन तासु अनंग क्षिति ईशस्य प्रत्यक्षाः शक्तयः इव तिस्रः कन्यकाः नरविमानस्थाः प्रैक्ष्यंत. ॥ १३४ ॥

अर्थः—(पछी) ते स्त्रीओमां ते राजकुमारे कामदेवरूपी राजानी जाणे प्रत्यक्ष शक्तिओ होय नही ? एवी त्रण कन्याओने पालखीमां बेठेली दीठी ॥ १३४ ॥

यूनां मनोवनोत्सङ्ग ज्वलयन्कनकोज्ज्वलः । चक्राम कामदावाग्निरिवैष स्त्रीजनः शनैः ॥ १३५ ॥

अन्वयः—यूनां मनः वन उत्संगं ज्वलयन्, कनकोज्ज्वलः, कामदावाग्निः इव एषः स्त्रीजनः शनैः चक्राम. ॥ १३५ ॥

अर्थः—युवानोना मनरूपी वनना मध्यभागने बाळतो, तथा सुवर्णसरखो तेजस्वी जाणे कामदेवनो दावाग्नि होय नही ? एवी ते स्त्रीओ धीमेथी चालवा लागी. ॥ १३५ ॥

दीपयद्भिर्नृसन्दोहहृदि मोहमयीं निशाम् । भासमाना निशानाथसमानांशुभिराननैः ॥ १३६ ॥
विवेककुसुमे लीनं सतां भृङ्गायितं मनः । कर्षद्भिर्नयनाम्भोजैर्भूषयन्तीर्भवार्णवम् ॥ १३७ ॥
मन्दयद्भिर्मुनीन्द्राणामपि जात्युज्ज्वलं यशः । शरीरधामभिः कामदीपिकाभिरिवाद्भुताः ॥ १३८ ॥
तिस्रोऽपि शनकैः कन्याः समीपं समुपेयुषीः । ददर्श च कुमारस्ता मारस्य च वशं गतः ॥१३९॥ च–क.

अन्वयः—नृसंदोहहृदि मोहमयीं निशां दपयद्भिः, निशानाथसमान अंशुभिः आननैः भासमानाः, ॥ १३६ ॥ विवेक कुसुमे भृंगायितं लीनं सतां मनः कर्षद्भिः नयनअंभोजैः भवार्णवं भूषयंतीः ॥ १३७ ॥ मुनींद्राणां जात्युज्ज्वलं अपि यशः मंदयद्भिः, कामदीपिकाभिः इव शरीरधामभिः अद्भुताः, ॥ १३८ ॥ शनकैः समीपं समुपेयुषीः ताः तिस्रः अपि कन्याः कुमारः ददर्श, च मारस्य वशं गतः ॥ १३९ ॥ चतुर्भिः कलापकं ॥

अर्थः–पुरुषोना समूहना हृदयमां मोहमय रात्रिने प्रकाशतां, तथा चंद्रसरखां किरणोवाळां, एवां मुखोवडे देदीप्यमान थयेली, ।१३६।

विवेकरूपी पुष्पमां भमरानीपेठे आसक्त थयेलां सज्जनोना मननुं पण आकर्षण करनारां चक्षुओरूपी कमलोवडे संसारसागरने शोभावती, ॥१३७॥ तथा मुनिराजोना स्वाभाविक निर्मल यशने पण मंद करनारां, अने कामदेवनी दीवीसरखां शरीरना तेजथी अद्भुत थयेली, ॥ १३८ ॥ तथा धीमेधीमे पासे आवती, एवी ते त्रणे कन्याओने कुमारे जोइ, (अने तेथी ते) कामने वश थइ गयो. ॥ १३९ ॥ चतुर्भिः कलापकं ॥

तं च चञ्चत्प्रभाचक्रं नरशक्रं निरीक्ष्य ताः । मिथोऽपि वचनं चारुस्मितसूचितमूचिरे ॥ १४० ॥

अन्वयः—च चंचत्प्रभाचक्रं नरशक्रं तं निरीक्ष्य ताः, मिथः अपि चारुस्मितसूचितं वचः ऊचिरे. ॥ १४० ॥

अर्थः—पछी चळकती कांतिना समूहवाळा, अने मनुष्योमां इंद्रसरखा, एवा ते रतिसारकुमारने जोइने तेओ परस्पर मनोहर हास्यथी सूचित थयेलुं वचन बोलवा लागी. ॥ १४० ॥

अस्मद्भक्तिगुणक्रीतः प्रीतः श्रीतनयः किमु । प्रासादान्निर्गतो मार्गत्यस्मन्मार्गमयं स्वयम् ॥ १४१ ॥

अन्वयः—अस्मद्भक्ति गुण क्रीतः, प्रीतः अयं श्रीतनयः किमु स्वयं प्रासादात् निर्गतः अस्मन्मार्गं मार्गति ? ॥ १४१ ॥

अर्थः—आपणी भक्तिना गुणोथी खरीदायेलो, तथा खुशी थयेलो आ कामदेव शुं पोतेज मंदिरमांथी (बहार) निकळीने आपणो मार्ग रोकीने उभो छे ? ॥ १४१ ॥

कर्तुं कश्चिदसौ कामसेवां देवाग्रिमः किमु । अभ्यायाद्वल्लभालाभलोभलोलुपधीरिह ॥ १४२ ॥

अन्वयः—वल्लभा लाभ लोभ लोलुपधीः असौ कश्चित् देवाग्रिमः किमु इह कामसेवां कर्तुं अभ्यायात् ? ॥ १४२ ॥

अर्थः—स्त्री मेळववाना लोभमां आसक्त बुद्धिवाळो आ कोइक म्होटो देव शुं अहीं कामदेवनी पूजा करवाने आव्यो छे ?

अस्मभ्यं वा वरं दातुकामः कामः कमप्यमुम् । स्वतोऽप्यधिकधामानमानयन्मानवं नवम् ॥ १४३ ॥

अन्वयः—वा अस्मभ्यं वरं दातुकामः कामः स्वतः अपि अधिकधामानं अमुं कं अपि नवं मानवं आनयत्. ॥ १४३ ॥

अर्थः—अथवा आपणने भर्तार मेळवी आपवानी इच्छावाळो (आ) कामदेव पोताथी पण अधिक तेजवाळा आ कोइक नवा मनुष्यने (अहीं) लाव्यो छे. ॥ १४३ ॥

इत्युक्तियुक्तिभाजस्तास्तस्मिँल्लीनदृशो भृशम् । उत्तेरुः कन्यका धन्यंमन्या नरविमानतः ॥ १४४ ॥ च. क.

अन्वयः—इति उक्तियुक्तिभाजः, तस्मिन् भृशं लीनदृशः ताः कन्यकाः धन्यंमन्याः नरविमानतः उत्तेरुः ॥ १४४ ॥

अर्थः—एवी रीतनां वचनोनी युक्तिओवाळी, तथा ते राजकुमारमां अत्यंत आसक्त थयेली छे आंखो जेमनी, एवी ते त्रणे कन्याओ पोताने धन्य मानतीथकी पालखीमांथी उतरी. ॥ १४४ ॥ चतुर्भिः कलापकं ॥

मुहुः पिहितमप्यङ्गं पिदधत्योंऽशुकेन ताः । स्खलन्मृदुपदन्यासाः प्रासादक्रोडमासदन् ॥ १४५ ॥

अन्वयः—पिहितं अंगं अपि मुहुः अंशुकेन पिदधत्यः, स्खलत् मृदु पदन्यासाः ताः प्रासादक्रोडं आसदन्. ॥ १४५ ॥

अर्थः—आच्छादित करेलां शरीरने पण वारंवार वस्त्रथी ढांकती, तथा अचकातां अचकातां मंद पगलांओथी चालती एवी ते कन्याओ ते मंदिरना मध्यभागमां आवी. ॥ १४५ ॥

दिदृक्षवो मुखं तस्य ह्रिया वीक्षितुमक्षमाः । नेत्रकोणावलोकस्य व्यधुः प्रारम्भमङ्गलम् ॥ १४६ ॥

अन्वयः—तस्य मुखं दिदृक्षवः, ह्रिया वीक्षितुं अक्षमाः नेत्रकोणावलोकस्य प्रारंभमंगलं व्यधुः ॥ १४६ ॥

अर्थः—तेनुं मुख जोवानी इच्छावाळी (छतां) लज्जाथी जोवाने असमर्थ थयेली एवी ( ते त्रणे कन्याओए ) आंखोना छेडाओ वडे जोवानुं प्रथम मंगल आदर्युं. ॥ १४६ ॥

भवद्भ्यां भासुरं रूपमीदृशं शुश्रुवे क्वचित् । इति प्रष्टुमिवाभ्यर्णं कर्णयोस्तद्दृशोऽगमन् ॥ १४७ ॥

अन्वयः—भवद्भ्यां ईदृशं भासुरं रूपं क्वचित् शुश्रुवे? इति प्रष्टुं इव तद्दृशः कर्णयोः अभ्यर्णं अगमन्. ॥ १४७ ॥

अर्थः-तमोए आवुं तेजस्वी रूप क्यांयें सांभळ्युं छे? एम पूछवा माटे जाणे होय नही? तेम तेओनी आंखो कर्णोनी पासे गइ.

भावाभिन्नां कुमारः स्वे तत्प्रवेशोत्सवे हृदि । ददौ दृशं भृशं नीलोत्पलस्रक्तोरणोपमाम् ॥ १४८ ॥

अन्वयः—कुमारः स्वे हृदि तत्प्रवेशोत्सवे भृशं भावअभिन्नां नीलोत्पल स्रक् तोरण उपमां दृशं ददौ. ॥ १४८ ॥

अर्थः—(पछी) ते रतिसारकुमार (पण) पोताना हृदयमां (थयेला) तेओना प्रवेशमहोत्सव वखते भावथी अत्यंत अभिन्न (अर्थात्

ते कन्याओना मनोभाव जेवीज,) तथा नीलकमलनी माळाना तोरणजेवी दृष्टि (तेओतरफ) करवा लाग्यो. ॥ १४८ ॥

विलङ्घ्य दृक्पथं तस्य कथंचिदपि ता ययुः । तदधीनहृदो मीनकेतनायतनान्तरम् ॥ १४९ ॥

अन्वयः—तदधीनहृदः ताः कथंचित् अपि तस्य दृक्पथं विलंघ्य मीनकेतन आयतन आंतरं ययुः. ॥ १४९ ॥

अर्थः—ते कुमारने स्वाधीन थयेलुं छे हृदय जेओनुं एवी ते कन्याओ महामुशीबते तेनी नजर वटावीने कामदेवना मंदिरना अंदरना भागमां गइ. ॥ १४९ ॥

विरहस्य भियान्योन्यं रहस्य(ऽ)थ रहस्यवत् । सा मन्दमिदमाचख्यौ सख्यौ प्रति नृपाङ्गजा ॥ १५० ॥

अन्वयः—अथ अन्योन्यं विरहस्य भिया सा नृपांगजा रहसि रहस्यवत् सख्यौ प्रति इदं मंदं आचख्यौ. ॥ १५० ॥

अर्थः—पछी परस्पर विरह थवाना डरथी ते राजकुमारीए एकांतमां तत्वनीपेठे ते बन्ने सखीओने आवीरीते धीमेथी कह्युं. ।१५०।

कदापि प्रगुणप्रेमगुणबन्धनिबन्धनम् । न नो मनोऽपि सम्भिन्नं डिम्भतारम्भतोऽप्यभूत् ॥ १५१ ॥

अन्वयः—प्रगुण प्रेम गुण बंधनिबंधनं नः मनः डिंभता आरंभतः अपि कदापि संभिन्नं न अभूत्. ॥ १५१ ॥

अर्थः—अत्यंत प्रीतिगुणथी (दोरीथी) बंधननुं कारणभूत एवुं आपणु मन छेक बाल्यपणाथी पण कोइ दिवसे जूदुं पड्युं नथी.

पतिभ्यः पितृभिर्दत्ता भिन्नेभ्यो भिन्नजातिभिः । कथमाश्लथयिष्यामो वयस्यत्र वयस्यताम् ॥ १५२ ॥

अन्वयः-अत्र वयसि भिन्नजातिभिः पितृभिः भिन्नेभ्यः पतिभ्यः दत्ताः (वयं) वयस्यतां कथं आश्लथयिष्यामः ? ॥ १५२ ॥

अर्थः—(वळी) आ युवानीमां (हवे) जूदी जूदी जातवाळा आपणा मातापिता (आपणने) जूदा जूदा पतिओने आपशे, (तो पछी आपणे ) आपणी आ मित्राइने शीरीते ओछी करी शकशुं ? ॥ १५२ ॥

अवियोगनियोगस्त्वद्यदि वां हृदि वाञ्छितः । एकश्चक्षुःसुधासेकस्तदयं दयितोऽस्तु नः ॥ १५३ ॥

अन्वयः-तत् यदि अवियोगनियोगः वां हृदि वांछितः, तत् चक्षुःसुधासेकः अयं एकः नः दयितः अस्तु. ॥ १५३ ॥

अर्थः-माटे जो आपणा अविरहनो निश्चय तमारा मनमां (तमोए) इच्छयो होय, तो (आपणी) आंखोमां अमृत सींचनार आ एक (राजकुमार) आपण सर्वेनो स्वामी थाओ ? ॥ १५३ ॥

असमक्षं समस्तानां जनानां रजनाविह । वियोगपातभीत्याद्य क्रियतेऽस्य करग्रहः ॥ १५४ ॥

अन्वयः-समस्तानां जनानां असमक्षं वियोगपातभीत्या अद्य रजनौ इह अस्य करग्रहः क्रियते. ॥ १५४ ॥

अर्थः—सर्व लोकोनी गेरहाजरीमांज, तथा वियोग आवी पडवानी बीकथी आजे रात्रिए अहींज आ राजकुमारनुं आपणें पाणिग्रहण करीयें. ॥ १५४ ॥

एवमुक्त्वाऽऽत्तमौनायामेते दत्तः किमुत्तरम् । इत्याकुलहृदि क्ष्मापपुत्र्यां प्राह प्रियंवदा ॥ १५५ ॥

अन्वयः—एवं उक्त्वा, एते किं उत्तरं दत्तः, इति आकुल हृदि क्ष्मापपुत्र्यां आत्तमौनायां प्रियंवदा प्राह. ॥ १५५ ॥

अर्थः-एम कहीने, (हवे) आ बन्ने सखीओ शुं उत्तर आपे छे? एम अधीरां मनवाळी ते राजपुत्री मौन रह्याबाद प्रियंवदा बोली के

**यत्त्वयोक्तं तदेवासीन्न देवि यदि मे हृदि । तत्त्वत्सख्यनिदानाय प्रेयसे श्रेयसे शपे ॥ १५६ ॥**

अन्वयः-(हे) देवि ! त्वत्सख्यनिदानाय श्रेयसे प्रेयसे यत् त्वया उक्तं, तत् एव यदि मे हृदि न आसीत्, तत् शपे. ।१५६।

अर्थः—हे सखी ! तारी मित्राइना निश्चलपणा माटे कल्याणकारी एवा ते भर्तारसंबंधि जे तें कह्युं, तेज ( विचार ) जो मारा हृदयमां (पण) न होय, तो ते माटे हुं सोगन खाउं छुं. (अर्थात् तेवोज विचार मारा मनमां पण छे.) ॥ १५६ ॥

**इत्यस्या वचनस्यैव प्रतिशब्द इवाभवत् । शब्दस्तदा सुताराया वदनोदरकन्दरे ॥ १५७ ॥**

अन्वयः-इति अस्याः एव वचनस्य प्रतिशब्दः इव तदा सुतारायाः वदनोदर कंदरे शब्दः अभवत् ॥ १५७ ॥

अर्थः-एवीरीतना तेणीनाज वचननो जाणे पडघो पडतो होय नही ? तेम ते वखते सुताराना मुख रूपी उंडी गुफामां पण तेज शब्द थयो. (अर्थात् सुताराए पण तेवोज उत्तर आप्यो.) ॥१५७॥

**इत्थं मिथः कथासारसुधासारपरिप्लुतैः । मनोभिर्निर्मलैरेताः श्रीतनूजमपूजयन् ॥ १५८ ॥**

अन्वयः—इत्थं मिथः कथासार सुधासार परिप्लुतैः निर्मलैः मनोभिः एताः श्रीतनूजं अपूजयन्. ॥ १५८ ॥

अर्थः—एवीरीते परस्पर वार्तालापरूपी अमृतना सारथी भींजायेलां निर्मल मनवडे तेओए कामदेवनी पूजा करी. ॥ १५८ ॥

**अथागत्य बहिः कामस्तुतिप्रस्तुतिकैतवात् । इमाः कुमारमुद्दिश्य जगुर्मञ्जुगुणा गिरम् ॥ १५९ ॥**

अन्वयः--अथ बहिः आगत्य कामस्तुतिमस्तुतिकैतवात् इमाः कुमारं उद्दिश्य मंजुगुणां गिरं जगुः. ॥ १५९ ॥

अर्थः—पछी बहार आवीने ते कामदेवनी स्तुति करवाना मिषथी तेओ ते रतिसार कुमारने उद्देशीने ( अन्योक्तिना ) मनोहर णवाळी वाणी बोलवा लागी के, ॥ १५९ ॥

**अस्मन्मनः स्थिरं नाथ यथा त्वयि तथा त्वया । मात्राधिके प्रसादेऽत्र स्थिरीभाव्यमहर्निशम् ॥१६०॥**

अन्वयः—(हे) नाथ ! यथा त्वयि अस्मत् मनः स्थिरं, तथा त्वया मात्राधिके अत्र प्रसादे अहर्निशं स्थिरी भाव्यं. ॥१६०॥

अर्थः--हे स्वामी ! जेम तमारामां अमारुं मन स्थिर थयु छे, तेम तमारे अमारापर मात्राधिक एटले कंइक वधारे कृपा करवामां (पक्षे--एक कानो छे अधिक जेमां, एवा आ प्रसाद एटले प्रासादमां-आ कामदेवना मंदिरमांज) रात दहाडो स्थिर रहेवुं. १६०

**इत्युक्तियुक्तिभिस्तासां कुमारः स्वं व्यचारयत् । क्षपायामपि तत्रैव प्रासादे स्थापितं कृती ॥ १६१ ॥**

अन्वयः--तासां इति उक्तियुक्तिभिः कृती कुमारः क्षपायां अपि तत्र एव प्रासादे स्वं स्थापितं व्यचारयत्. ॥ १६१ ॥

अर्थः--तेओनां एवीरीतनां अन्योक्तिनी युक्तिवाळां वचनोवडे करीने ते चतुर रतिसारकुमारे रात्रिए पण त्यां कामदेवना मंदिरमांज पोताने रहेवानो विचार कर्यो. ॥ १६१ ॥

**ताश्चेलुरथ चक्षूंषि क्षिपन्त्यः पृष्ठतो मुहुः । स्मरार्चाचारुतादीपसत्ताद्यालोकनच्छलात् ॥ १६२ ॥**

अन्वयः--अथ ताः स्मर अर्चा चारुता दीपसत्तादि आलोकनच्छलात् मुहुः पृष्ठतो चक्षूंषि क्षिपंन्त्यः चेलुः. ॥ १६२ ॥

अर्थः--पछी ते कन्याओ कामदेवनी पूजानुं मनोहरपणुं, तथा दीपकनी हयातिआदिक जोवाना मिषथी वारंवार पाछळनां भागमां नजर करतीथकी (पाछुं जोतीथकी) चालवा लागी. ॥ १६२ ॥

दीप्तस्मरानलज्वालापक्वै रागरसैस्ततः । कुमारं चित्रवच्चित्तफलके न्यस्य ता ययुः॥ १६३ ॥

अन्वयः-ततः ताः दीप्तस्मर अनल ज्वालापक्वैः रागरसैः चित्तफलके कुमारं चित्रवत् न्यस्य ययुः ॥ १६३ ॥

अर्थः--पछी ते कन्याओ प्रगटी निकळेला एवा कामदेवरूपी अग्निनी ज्वालाथी पकावेला (पाका) रागना रसोवडे ( पोताना ) हृदयरूपी पट्टपर ते रतिसारकुमारने चित्रनीपेठे स्थापन करीने (चीतरीने) गइ. ॥ १६३ ॥

अधिकं दधदौज्ज्वल्यं तापायैवाभवत्तदा । तासां मारश्च हारश्च कुमारश्च हृदि स्थितः ॥ १६४ ॥

अन्वयः---तदा तासां हृदिस्थितः मारः, च हारः. च कुमारः च अधिकं औज्ज्वल्यं दधत् तापाय एव अभवत्. ॥१६४॥

अर्थः—ते वखते ते कन्याओना हृदयमां रहेला काम, तथा हार अने कुमार पण अधिक तेजने धारण करताथका ( तेओने ) ताप उपजावनाराज थया. ॥ १६४ ॥

भक्तेऽसौ कामदः कामं काम इत्युक्तिभागथ । कुमाराय ददौ शेषान्मोदकान्देवपूजिका ॥ १६५ ॥

अन्वयः—अथ असौ कामः भक्ते कामं कामदः, इति उक्तिभाक् देवपूजिका कुमाराय शेषान् मोदकान् ददौ. ॥ १६५ ॥

अर्थः—पछी आ कामदेव ( पोताना ) भक्तोने स्वभावथीज इच्छित वस्तु आपनारो छे, एम बोलती एवी ते देवपूजारीए ते

राजकुमारने शेषना लाडु आप्या. ॥ १६५ ॥

तदा कृततदाहारः कुमारः शुशुभेः शुभैः । पुष्पेषुशेषताम्बूलपुष्पावलिविलेपनैः ॥ १६६ ॥

अन्वयः—तदा कृततदाहारः कुमारः शुभैः पुष्पेषु शेष तांबूल पुष्प आवलि विलेपनैः शुशुभे. ॥ १६६ ॥

अर्थः—ते वखते करेल छे ते मोदकोनुं भोजन जेणे एवो ते कुमार कामदेवनी शेषारूप ( मळेलां ) मनोहर तांबूल, पुष्पमाला, तथा (चंदनआदिकना) विलेपनवडे शोभवा लाग्यो. ॥ १६६ ॥

अथ तस्य च तासां च दृक्प्रभादण्डमण्डलैः । भानुर्नुन्न इव प्राप प्रत्यग्गिरिशिरस्तटीम् ॥ १६७ ॥

अन्वयः—अथ तस्य च तासां दृक्प्रभा दंड मंडलैः नुन्नः इव भानुः प्रत्यग् गिरि शिरः तटीं प्राप. ॥ १६७ ॥

अर्थः—पछी ते कुमारनी तथा ते कुमारिकाओनी आंखोनी कांतिरूपी दंडोना समूहथी जाणे हडसेल्यो होय नही? तेम सूर्य (पण) पश्चिमाचलना शिखरप्रदेशमां गयो. ॥ १६७ ॥

तेषां हृदि तदोद्दामः कामतापः स कोऽप्यभूत् । यज्जितेनेव सूरेण गतं दूरेण लज्जया ॥ १६८ ॥

अन्वयः—तदा तेषां हृदि सः कः अपि उद्दामः कामतापः अभूत्, यत् जितेन इव सूरेण लज्जया दूरेण गतं. ॥१६८॥

अर्थः—ते वखते तेओना हृदयमां ते कोइ (एवा प्रकारनो) प्रचंड कामताप उत्पन्न थयो के, जेनाथी जाणे पराभव पाम्यो होय

नही ? तेम सूर्य शरमनो मार्यो दूर चाल्यो गयो. ॥ १६८ ॥

**बिभ्रदभ्रंलिहीभावं संध्याभ्रपटलच्छलात् । तेषां भृशं निशारम्भे जजृम्भे रागसागरः ॥ १६९ ॥**

अन्वयः--निशा आरंभे संध्या अभ्र पटलच्छलात् अभ्रंलिहीभावं बिभ्रत् तेषां रागसागरः भृशं जजृंभे. ॥ १६९ ॥

अर्थः—(पछी) रात्रिना प्रारंभवखते संध्याकाळना (लालरंगनां) वादळांओना समूहना मिषथी छेक आकाशसुधी पहोंचेलो तेओनो रागरूपी महासागर घणोज उछळवा लाग्यो. ॥ १६९ ॥

**तदङ्गज्वलितानङ्गदावपावकजन्मभिः । अपूरि भूरिभिर्धूमैरिव ध्वान्तभरैर्नभः ॥ १७० ॥**

अन्वयः—तत् अंग ज्वलित अनंग दावपावक जन्मभिः भूरिभिः धूमैः इव ध्वांतभरैः नभः अपूरि. ॥ १७० ॥

अर्थः—तेओना शरीरमां प्रगटीनिकळेला कामरूपी दावानलथी उत्पन्न थयेला एवा जाणे घणा धूमाडाथी होय नही ? तेम अंधकारना समूहवडे आकाश भराइ गयुं. ॥ १७० ॥

**इति क्रमान्निशीथिन्यां निशीथसमयस्पृशि । पौरेषु परितो निद्रामुद्रितेन्द्रियवृत्तिषु ॥ १७१ ॥**

**भूषिताभरणाः पाणिग्रहोपकरणान्विताः । तास्तिस्रोऽपि ययुर्मीनकेतनस्य निकेतनम् ॥ १७२ ॥ युग्मम् ॥**

अन्वयः-इति क्रमात् निशीथ समय स्पृशि निशीथिन्यां, परितः पौरेषु निद्रा मुद्रित इन्द्रिय वृत्तिषु ॥१७१॥ भूषित आभरणाः

पाणिग्रह उपकरण अन्विताः ताः तिस्रः अपि मीनकेतनस्य निकेतनं ययुः. ॥ १७२ ॥ युग्मं ॥

अर्थः—एवीरीते अनुक्रमे मध्यरात्रिना समयवाळी रात्रि होते छते, अने चोतरफथी नगरना लोको (पण) निद्राथी बंध पडेल छे इन्द्रियोना व्यापार जेओना एवा होते छते ॥ १७१ ॥ आभूषणवडे शृंगारित थयेली, अने विवाहना साधनोथी युक्त थयेली ते त्रणे कन्याओ (त्यां) कामदेवना मंदिरमां आवी. ॥ १७२ ॥ युग्मं॥

आगमिष्यन्ति ता नो वा भविष्यति न वात्र सः । इत्याकुलहृदोऽन्योन्यं तेऽमिलन्संमदास्पदम् ॥ १७३ ॥

अन्वयः—ताः आगमिष्यंति वा नो ? सः अत्र भविष्यति वा न ? इति अन्योन्यं आकुलहृदः ते संमदास्पदं अमिलन्. ॥१७३॥

अर्थः–ते कन्याओ (अहीं) आवशे के नही ? अने ते पुरुष अहीं हशे के नही ? एम परस्पर संशयातुर मनवाळा तेओ सर्वे आनंद पामताथका (त्यां) मळया. ॥ १७३ ॥

तैर्हृष्टैरथ तत्कालज्वालितज्वलनच्छलात् । दीप्यमानो बहिश्चक्रे हृदयाद्विरहो महान् ॥ १७४ ॥

अन्वयः–अथ हृष्टैः तैः तत्कालज्वालित ज्वलन च्छलात् दीप्यमानः महान् विरहः हृदयात् बहिः चक्रे. ॥ १७४ ॥

अर्थः—पछी हर्ष पामेला एवा तेओए तेज समये प्रगटावेला अग्निना मिषथी सळगी उठेला महान् विरहने ( पोतपोताना ) हृदयमांथी बहार कहाड्यो. ॥ १७४ ॥

भवाम्भोनिधिडिण्डीरभरविभ्रमभृत्प्रभे । चीवरे पीवरप्रेमप्रकर्षास्तेऽथ पर्यधुः ॥ १७५ ॥

अन्वयः—अथ पीवर प्रेम प्रकर्षाः ते भव अंभोनिधि डिंडीर भर विभ्रमभृत् प्रमे चीवरे पर्यधुः. ॥ १७५ ॥

अर्थः—पछी अत्यंत प्रेमना उभरावाळा एवा तेओ सर्वेए संसाररूपी महासागरना फीणना समूहना भ्रमवाळी कांतिवाळां (श्वेतरंगनां) वस्त्रो पहेर्यां. ॥ १७५ ॥

अमन्दमोदैर्मदनफलान्यथ करेषु तैः । कन्दर्पलतिकाकन्दबन्धुराणि बबन्धिरे ॥ १७६ ॥

अन्वयः—अथ अमंद मोदैः तैः कंदर्प लतिका कंद बंधुराणि मदनफलानि करेषु बबंधिरे ॥ १७६ ॥

अर्थः—पछी अत्यंत आनंद पामेला एवा तेओए कामलताना बीजसरखा मनोहर मींढोळ हाथे बांध्या. ॥ १७६ ॥

अथ ताः प्रथितोत्साहः करे जग्राह कन्यकाः । विप्रयोगपयोराशौ निमज्जन्तीर्नृपाङ्गजः ॥ १७७ ॥

अन्वयः—अथ प्रथित उत्साहः नृपांगजः विप्रयोग पयोराशौ निमज्जंतीः ताः कन्यकाः करे जग्राह. ॥ १७७ ॥

अर्थः—पछी विस्तार पामेल छे उत्साह जेनो एवा ते राजकुमारे वियोगरूपी महासागरमां डुबती, एवी ते (त्रणे) कन्याओने (पोताना) हाथमां ग्रहण करी. (अर्थात् हस्तमेलाप कर्यो.) ॥१७७ ॥

तेषां जिह्वासुधावल्लिपुष्पाण्यथ मिथः कथाः । जग्मुर्मधुमुचश्चारुवर्णाः कर्णावतंसताम् ॥ १७८ ॥

अन्वयः—अथ जिह्वा सुधा वल्लि पुष्पाणि, मधुमुचः, चारुवर्णाः, तेषां मिथः कथाः कर्णावतंसतां जग्मुः. ॥ १७८ ॥

अर्थः-पछी जिह्वारूपी अमृतवल्लिना पुष्पो सरखी, अमृत झरनारी, अने मनोहर वर्णन (अक्षरोवाळी,) एवी तेओनी परस्परनी वातो कर्णोमां आभूषणरूप थइ पडी. ॥ १७८ ॥

**ततः प्रभातमिश्रायां तमिस्रायां निजं निजम् । ता निकेतं गताः स्वापं कुमुदिन्य इवासदन् ॥१७९॥**

अन्वयः—ततः प्रभात मिश्रायां तमिस्रायां ताः निजं निजं निकेतं गताः, कुमुदिन्यः इव स्वापं आसदन् ॥ १७९ ॥

अर्थः-पछी प्रभातयुक्त रात्रि होते छते (अर्थात् परोढीये) ते त्रणे कन्याओ पोतपोताने घेर गइ, तथा कुमुदिनीओनी पेठे निद्रवश थइ.

**एष्यद्रविभयान्निद्रा नलिनेभ्यः पलायिता । विशश्राम कुमारस्य तदा नेत्रारविन्दयोः ॥ १८० ॥**

अन्वयः—तदा एष्यत् रवि भयात् नलिनेभ्यः पलायिता निद्रा कुमारस्य नेत्र अरविंदयोः विशश्राम ॥ १८० ॥

अर्थः–ते वखते आवनारा सूर्यना डरथी ( सूर्यविकाशी ) कमलोमांथी नाशी छूटेली निद्रा ते रतिसार कुमारना चक्षुओरूपी चंद्रविकाशी कमलोमां विश्राम लेवा लागी. (अर्थात् ते निद्रावश थयो) ॥ १८० ॥

**द्राग्दृष्टनष्टया स्पष्टं संध्यया सुधियो वपुः । सत्वरं गत्वरं मत्वा धर्मतत्त्वान्यधुस्तदा ॥ १८१ ॥**

अन्वयः-तदा सुधियः द्राक्दृष्ट नष्टया संध्यया वपुः सत्वरं गत्वरं मत्वा धर्मतत्त्वानि अधुः. ॥ १८१ ॥

अर्थः—ते वखते उत्तम बुद्धिवाळा (तत्त्वज्ञानीओ) जोतजोतामां तुरत नष्ट थयेली संध्याना (उदाहरणथी) शरीरने (पण एरीते)

एकदम विनश्वर जाणीने धर्मतत्वोनुं स्मरण करवा लाग्या. ॥ १८१ ॥

वीक्ष्यैव कुमुदे लक्ष्मीं क्षणात्क्षीणां विचक्षणाः । श्रियश्चलत्वं जानन्तो दानं तोषहृदो ददुः ॥ १८२ ॥

अन्वयः–विचक्षणाः कुमुदे लक्ष्मीं क्षणात् क्षीणां वीक्ष्य एव श्रियं चलत्वं जानंतः तोषहृदः दानं ददुः. ॥ १८२ ॥

अर्थः–डाह्या माणसो (चंद्र विकाशी) कुमुदमां रहेली लक्ष्मीने (शोभाने) क्षणवारमांज क्षीण थयेली जोइनेज लक्ष्मीनुं चपलपणुं जाणताथका मनमां संतोष मानी दान देवा लाग्या. ॥ १८२ ॥

संयोगं विप्रयोगान्तं दृढयन् कोकदर्शनात् । सत्सु साधुजनः सम्यग्विदधे धर्मदेशनाम् ॥ १८३ ॥

अन्वयः—कोकदर्शनात् संयोगं विप्रयोग अंतं सत्सु सम्यग् दृढयन् साधुजनः धर्मदेशनां विदधे. ॥ १८३ ॥

अर्थः—कोकपक्षीना दृष्टांतथी संयोग वियोगना अंतवाळो छे, ( अर्थात् संयोगने अंते वियोग छे ) एम सज्जनोना (हृदयमां) खूब दृढ करताथका मुनिओ धर्मनो उपदेश देवा लाग्या. ॥१८३॥

सुतस्यापि समेति श्रीर्ममेव समये स्वयम् । तस्यै मा क्लिश्यतामब्जमितीवाख्यदलिस्वनैः ॥ १८४ ॥

अन्वयः–मम इव सुप्तस्य अपि समये श्रीः स्वयं समेति, तस्यै मा क्लिश्यतां ? इति इव अब्जं अलिस्वनैः आख्यत् . ॥ १८४ ॥

अर्थः—मारीपेठे निद्राधीन (निरुद्यमी) थयेला माणसने पण अवसरे लक्ष्मी पोतानी मेळेज आवी मळे छे, माटे ते मेळववाने

कष्ट सहन न करो ? एम जाणे कमल भमराओना शब्दोवडे (लोकोने) कहेतुं होय नहि ? (तेम जाणवा लाग्युं.) ॥ १८४ ॥

पवित्रितधरित्रीकः पादन्यासैरिवांशुमान् । आकर्षत्तिमिराद्विश्वं दुःकृतादिव तीर्थकृत् ॥ १८५ ॥

अन्वयः-तीर्थकृत् दुःकृतात् इव, पादन्यासैः इव पवित्रित धरित्रीकः अंशुमान् विश्वं तिमिरभरात् आकर्षत्. ॥ १८५ ॥

अर्थः--तीर्थंकरप्रभु पापमांथी जेम (जगतनो उद्धार करे ) तेम जाणे किरणोना ( पक्षे-चरणोना ) स्थापनथी पवित्र करेल छे पृथ्वी जेणे, एवो सूर्य जगतने अंधकारना समूहमांथी खेंची कहाडवा लाग्यो. ॥ १८५ ॥

अथ सुप्तां विवाहश्रीचिह्नां सौभाग्यमञ्जरीम् । वीक्ष्य क्षितिपतेराख्यत्कञ्चुकी चकितस्तदा ॥ १८६ ॥

अन्वयः—अथ सुप्तां विवाहश्रीचिह्नां सौभाग्यमंजरीं वीक्ष्य चकितः कंचुकी तदा क्षितिपतेः आख्यत्. ॥ १८६ ॥

अर्थः—पछी निद्राधीन थयेली, तथा विवाहना शृंगारना चिह्नवाळी, एवी ते सौभाग्यमंजरीने जोइने आश्चर्य पामेला कंचुकीए (राजाना जनानखानाना रक्षक नाजरे) तेज वखते (ते हकीकत) राजाने जाहेर करी. ॥ १८६ ॥

केनापि निशि कन्ये नौ व्यूढे इति पतिः क्षितेः । एत्य तत्र क्षणे मन्त्रिश्रेष्ठिभ्यां व्यज्ञपि स्वयम् ॥ १८७ ॥

अन्वयः—तत्र क्षणे मंत्रिश्रेष्ठिभ्यां स्वयं तत्र एत्य क्षितेः पतिः इति व्यज्ञपि, निशि केन अपि नौ कन्ये व्यूढे. ॥ १८७ ॥

अर्थः—तेज वखते मंत्री तथा शेठे पोते त्यां आवी राजाने एम जणाव्युं के, रात्रिए कोइक पण अमारी बन्नेनी कन्याओने पण परणेलो छे. ॥ १८७ ॥

इहेदृग्निबिडं केन विडम्बनमिदं कृतम् । इति कोपाकुले भूपे कोऽप्येत्य पुरुषोऽवदत् ॥ १८८ ॥

अन्वयः—इह इदं ईदृग् निबिडं विडंबनं केन कृतं ? इति भूपे कोपाकूले कः अपि पुरुषः एत्य अवदत्. १८८

अर्थः–अहीं आ आवुं आवडुं बधुं (भयंकर) साहस कोणे कर्युं ? एम क्रोधातुर थयेला राजाने कोईक पुरुषे आवी कह्युं के, ।१८८।

स्वामिन् कश्चन कन्दर्पायतनेऽनुपमः पुमान् । हृद्यश्रीर्विद्यते सद्यःपाणिग्रहणवेषभाक् ॥ १८९ ॥

अन्वयः—(हे) स्वमिन् ! कंदर्प आयतते अनुपमः, अयश्रीः, सद्यः पाणिग्रहण वेषभाक् कश्चन पुमान् विद्यते. ॥ १८९ ॥

अर्थः–हे स्वामी! कामदेवना मंदिरमां अनुपम, मनोहर शोभावाळो, तथा विवाहयोग्य ताजाज पोषाकवाळो कोइक पुरुष विद्यमान छे.

इत्याकर्ण्य तलारक्षमिलारक्षः क्रुधादिशत् । आगसां सागरो मङ्क्षु स बध्ध्वाऽऽनीयतामिति ॥१९०॥

अन्वयः—इति आकर्ण्य इलारक्षः क्रुधा तलारक्ष इति आदिशत्, आगसां सागरः सः बध्ध्वा मंक्षु आनीयतां ? ॥ १९० ॥

अर्थः—एम सांभळी राजाए क्रोधाथी कोटवाळाने एवो हुकम कर्यो के, अपराधोना महासागरसरखा ते पुरुषने बांधीने तुरत (अहीं) लावो ? ॥ १९० ॥

अथ गत्वा तलारक्षस्तं दक्षो वीक्ष्य दोर्भृतम् । तूर्णमेत्य भयापूर्णः क्ष्माभुजङ्गं व्यजिज्ञपत् ॥ १९१ ॥

अन्वयः—अथ दक्षः तलारक्षः गत्वा, तं दोर्भृतं वीक्ष्य, भय आपूर्णः तूर्णं एत्य क्ष्माभुजंगं व्यजिज्ञपत्. ॥ १९१ ॥

अर्थः-पछी (ते) चतुर कोटवाळे (त्यां) जइ, तथा तेने बळवान जोइने भयभीत थइ, तुरत आवी राजाने कह्युं के, ॥ १९१ ॥

**अस्ति विस्तीर्णदृक्पाततृणीकृतजगत्त्रयः । तत्र स्वामिन्पुमान् कोऽपि द्वादशार्कनिभप्रभः ॥ १९२ ॥**

अन्वयः-(हे) स्वामिन्! तत्र विस्तीर्ण दृक् पात तृणी कृत जगत्त्रयः, द्वादश अर्कनिभ प्रभः कः अपि पुमान् अस्ति. ॥

अर्थः-हे स्वामी! त्यां तो विशाळ दृष्टि फेंकवाथी तृण समान गणेल छे, त्रणे जगतने जेणे एवो, तथा बार सूर्यो जेवी छे कांति जेनी एवो कोइक पुरुष छे. ॥ १९२ ॥

**रूपं निरुपमं तस्य निरूप्य निरुपाधिकम् । स्त्रीत्वाय स्पृहयत्येव देवानामपि मानसम् ॥ १९३ ॥**

अन्वयः--तस्य निरुपमं निरुपाधिकं रूपं निरूप्य देवानां अपि मानसं स्त्रीत्वाय एव स्पृहयति. ॥ १९३ ॥

अर्थः-तेनुं अनुपम तथा निर्दोष रूप जोइने देवोनुं पण मन स्त्रीपणानीज इच्छा करे एम छे. ॥ १९३ ॥

**मन्ये तादृग्दृगुल्लासस्तादृग्रुक्तादृगाकृतिः । अपीन्द्रमनसा मान्यो न सामान्योऽस्ति कोऽप्यसौ ॥ १९४ ॥**

अन्वयः-मन्ये, तादृग् दृग् उल्लासः, तादृक् रुक्, तादृक् आकृतिः, इंद्रमनसा अपि मान्यः, असौ कः अपि सामान्यः न अस्ति.

अर्थः--( हुं तो एम ) मानुं छुं के, तेवा प्रकारनो आंखोने आनंद आपनारो, तेवी कांतिवाळो, अने तेवी आकृतिवाळो, तथा इंद्रना हृदयमां पण सन्मान मेळववाने योग्य थयेलो आ कोइक पण साधारण पुरुष ( तो ) नथी. ॥ १९४ ॥

तदेकमपि सोद्रेकपत्तिव्यूहोऽप्यहं न हि । अमुं धर्तुं समर्थोऽग्निकणं तृणगणो यथा ॥ १९५ ॥

अन्वयः--तत् तृणगणः यथा अग्निकणं, (तथा) सोद्रेकपत्तिव्यूहः अपि अहं हि अमुं एकं अपि धर्तुं समर्थः न. ॥ १९५ ॥

अर्थः--माटे घासनो समूह जेम अग्निना तणखाने (पकडी शके नही) तेम उत्साहयुक्त सैनिकोना समूहवाळो, एवो पण हुं खरेखर तेने एकने पण पकडवाने समर्थ नथी. ॥ १९५ ॥

इत्युक्तिविकटामर्षस्तत्कर्षणकृते नृपः । प्रैषीद्वीररसानन्यं सेनान्यं सेनया रयात् ॥ १९६ ॥

अन्वयः—इति उक्ति विकट आमर्षः नृपः तत्कर्षणकृते वीररस अनन्यं सेनान्यं रयात् सेनया प्रैषीत्. ॥ १९६ ॥

अर्थः--एवीरीतनां वचनथी अति थयो छे द्वेष जेने एवा ते राजाए तेने पकडी लाववामाटे अतुल्य वीररसवाळा ( अति बहादूर) सेनापतिने तुरत सैन्यसहित मोकल्यो. ॥ १९६ ॥

अथो रथेभपत्त्यश्वसेनाभिर्नाभिवद्वृतः । तरसा सरसोत्तालश्चचाल करवालभृत् ॥ १९७ ॥

अन्वयः--अथो रथ इभ पत्ति अश्व सेनाभिः नाभिवत् वृतः, सरस उत्तालः, करवालभृत् (सः) तरसा चचाल. ॥ १९७ ॥

अर्थः—पछी रथ, हाथी, पाळा, तथा घोडाओना सैन्यवडे नाभिनीपेठे घेरायेलो, तथा वीररसथी गर्जना करतो, अने तलवारने धारण करतो ते सेनापति तुरत चालवा लाग्यो. ॥ १९७ ॥

राज्ञा सैन्यं त्वयि प्रैषि कथितेऽपि जनैरिति । तदा तस्य न रोमापि नरोत्तंसस्य कम्पितम् ॥ १९८ ॥

अन्वयः—राज्ञा त्वयि सैन्यं प्रेषि, इति जनैः कथिते अपि, तस्य नरोत्तंसस्य तदा रोम अपि न कंपितं. ॥ १९८ ॥

अर्थः—राजाए ( तो तने पकडवामाटे ) तारापर ( आ ) लश्कर मोकल्युं छे, एम लोकोए कह्या छतां पण ते बहादूर पुरुषनुं तो रुंवाडुं पण फरक्युं नही. ॥ १९८ ॥

**बिभ्रद्भिरधिकं दर्पं कन्दर्पायतनं ततः ॥ अवेष्ट्यत चमूशूरैः क्रूरैरात्मेव कर्मभिः ॥ १९९ ॥**

अन्वयः—ततः अधिकं दर्पं बिभ्रद्भिः क्रूरैः कर्मभिः आत्मा इव चमूशूरैः कंदर्प आयतनं अवेष्ट्यत. ॥ १९९ ॥

अर्थः–पछी अधिक गर्वने धारण करता, तथा निर्दय एवां कर्मो जेम आत्माने घेरे, तेम ते सैन्यना शूरवीर सुभटोए (ते) कामदेवनुं मंदिर घेरी लीधुं. ॥ १९९ ॥

**उच्चनीचस्फुरच्छीर्षैः शूरैः शोणमुखै रुषा । कुमारो मुहुरालोकि कृकलासैरिवांशुमान् ॥ २०० ॥**

अन्वयः–कृकलासैः अंशुमान् इव, उच्च नीच स्फुरत् शीर्षैः, रुषा शोणमुखैः शूरैः मुहुः कुमारः आलोकि. ॥ २०० ॥

अर्थः–(पछी) काकीडा जेम सूर्यने जुए, तेम उंचां नीचां थतां छे मस्तको जेमनां, तथा क्रोधथी लाल मुखोवाळा ते सुभटो वारंवार (ते) रतिसार कुमारने जोवा लाग्या. ॥ २०० ॥

**एवमालोक्य सेनानीर्गृह्यतां गृह्यतामयम् । इति कोपानलज्वालां वाग्मालामुदलालयत् ॥ २०१ ॥**

अन्वयः–एवं आलोक्य सेनानीः अयं गृह्यतां गृह्यतां? इति कोपानलज्वालां वाग्मालां उदलालयत् . ॥ २०१ ॥

अर्थः--एम जोइने ते सेनापति " आने पकडो पकडो ! एवीरीतनी क्रोधरूपी अग्निनी ज्वाला सरखी वाणी उछाळवा लाग्यो, ( मोटे स्वरे बोलवा लाग्यो. ) ॥ २०१ ॥

**इत्युक्त्या तस्य कल्पान्तवातवेगिनि धावति । वीरवारे कुमारेण मेरुणेव न चुक्षुभे ॥ २०२ ॥**

अन्वयः-इति उक्त्या कल्पांत वात वेगिनि तस्य वीरवारे धावति मेरुणा इव कुमारेण न चुक्षुभे ॥ २०२ ॥

अर्थः-एम (सेनापतिए) कहेवाथी कल्पांतकाळना वायु सरखा वेगथी तेना सुभटोना समूहे धसारो कर्या छतां पण मेरुपर्वतनी पेठे ते रतिसारकुमार क्षोभ पाम्यो नहि. ॥ २०२ ॥

**स्थानत्यागे प्रियारागे भयभागे च तत्र सः । तं श्लोकं संस्मरन्भिन्नं न मनः क्वचन व्यधात् ॥ २०३ ॥**

अन्वयः-स्थानत्यागे, प्रियारागे, च भयभागे सः तत्र तं श्लोकं संसरन् क्वचन मनः भिन्नं न व्यधात्. ॥ २०३ ॥

अर्थः—(वळी पोताना) स्थानना त्यागसमये, स्त्रीओना प्रेमसमये, तथा (आ) भयसमये, (पण) ते रतिसार कुमार त्यां ते श्लोकने याद करतोथको कोइरीते मनभंग थयो नही. (अर्थात् खेद पाम्यो नही. ) ॥ २०३ ॥

**ते तु दैन्यमुचः सैन्यभटाः सर्वेऽपि गर्विताः । कुमाराय क्रुधावन्तो धावन्तो दधुरन्धताम् ॥ २०४ ॥**

अन्वयः-दैन्यमुचः गर्विताः क्रुधावंतः सर्वे अपि सैन्यभटाः कुमाराय धावंतः अंधतां दधुः ॥ २०४ ॥

अर्थः-आळस तजीने अभिमान तथा क्रोधवाळा लश्करना (ते) सघळा सुभटो कुमारपर हल्लो करताथका अंधपणाने धारण करवा लाग्या.

ततः स्वमपि हस्ताग्रमपश्यन्तोऽन्धदृष्टयः । पुरो यत्रापि तत्रापि स्खलनाद्पतन्त ते ॥ २०५ ॥

अन्वयः-ततः स्वं हस्तअग्रं अपि अपश्यंतः अंधदृष्टयः ते पुरः यत्र अपि तत्र अपि स्खलनात् अपतंत. ॥ २०५ ॥

अर्थः-पछी पोताना हाथना अग्र भागने पण नही देखता अंध आंखोवाळा ते सुभटो आगळ ज्यां त्यां अथडावाथी पडवा लाग्या.

भृशं विसंस्थुलां धीरा द्धतः परितो गतिम् । अन्धा मिथोऽप्ययुध्यन्त संमुखीनैर्द्विषद्धिया ॥ २०६ ॥

अन्वयः—धीराः परितः भृशं विसंस्थुलां गतिं दधतः, अंधाः मिथः अपि द्विषद्धिया संमुखीनैः अयुध्यंत. ॥ २०६ ॥

अर्थः—ते सुभटो सर्व बाजुएथी अत्यंत अथडाती गतिने धारण करताथका अंध होवाथी मांहोंमांहें पण शत्रुनी बुद्धिथी सामे भटकाता सुभटोसाथे लडवा लाग्या. ॥ ॥ २०६ ॥

किं रे कन्यास्त्वया व्यूढा मूढेनेत्युद्धतोक्तिभिः । ताडितोऽश्मपुमान्कैश्चित्प्राप्तः स्मरसुरौकसि ॥२०७॥

अन्वयः-रे ! त्वया मूढेन कन्याः किं व्यूढाः ? इति उद्धत उक्तिभिः कैश्चित् स्मरौकसि प्राप्तः अश्मपुमान् ताडितः. ॥२०७॥

अर्थः—अरे ! मूर्ख ! तुं ( ते ) कन्याओने केम परण्यो ? एवां उद्धत वचनो बोलता केटलाक सुभटो ( तो ) ते कामदेवना मंदिरमां रेहेला पत्थरना पुतळाने मारवा लाग्या. ॥ २०७ ॥

तत्रावलंम्बितं प्राप्य पाणिस्पर्शेन चामरम् । कुमारकेशबुद्ध्यान्ये‌ऽच्छिदन्दुर्वाक्यदुर्धराः ॥ २०८ ॥

अन्वयः—दुर्वाक्य दुर्धराः अन्ये पाणि स्पर्शेन तत्र अवलंबितं चामरं प्राप्य कुमारकेशबुध्ध्या अच्छिदन् . ॥ २०८ ॥

अर्थः—(वळी मुखमांथी ) अश्लील वचनो बोलता बीजा सुभटो हाथना स्पर्शथी त्यां टींगाडेलुं चामर मळी आववाथी, तेने कुमारना केश जाणीने कापवा लाग्या. ॥२०८॥

केऽपि कोपाकुलाः प्राप्य प्रौढाश्मकरिणः करम् । चक्रुषुर्दन्तदष्टोष्ठाः कुमारेन्द्रभुजभ्रमात् ॥ २०९ ॥

अन्वयः—कोपाकुलाः के अपि प्रौढ अश्म करिणः करं प्राप्य कुमार इन्द्र भुजभ्रमात् दंत दष्ट ओष्ठाः चक्रुषुः. ॥ २०९ ॥

अर्थः—क्रोधातुर थयेला केटलाक सुभटो तो (त्यां रहेला ) म्होटा पत्थरना हाथीनी सुंढ मळवाथी, तेने कुमारनो हाथ जाणीने दांतोवडे होठ पीसता थका खेंचवा लाग्या. ॥ २०९ ॥

इत्यनेकविधोद्दामसंग्राममयकौतुकः । चमूवारः कुमारस्य चकार नयनोत्सवम् ॥ २१० ॥

अन्वयः-इति अनेकविध उद्दाम संग्राममय कौतुकः चमूवारः कुमारस्य नयन उत्सवं चकार. ॥ २१० ॥

अर्थः—एवीरीते अनेक प्रकारना महान् संग्रामरूपी आश्चर्यवाळो (ते) सैन्यनो समूह कुमारनी आंखोने रमुज कराववा लाग्यो.

एवं श्रुत्वा चमूचित्रमूचिवान्सचिवं नृपः । पुमानसावसामान्यः सन्मान्यानीयतामिति ॥ २११ ॥

अन्वयः—एवं चमूचित्रं श्रुत्वा नृपः सचिवं ऊचिवान् , असौ पुमान् असामान्यः, इति सन्मान्य आनीयतां ? ॥ २११ ॥

अर्थः-एवीरीतनुं सैन्यसंबंधी आश्चर्य सांभळीने राजाए मंत्रीने कह्युं के, आ पुरुष (कोइक) असाधारण माणस छे, माटे तेनुं स-

न्मान करी (तेने अहीं लावो !) ॥ २११ ॥

अथ गत्वा त्वरावेशराजिना राजवाजिना । नास्मिन्वीरे विरोद्धव्यमित्यूचे सचिवश्चमूम् ॥ २१२ ॥

अन्वयः-अथ सचिवः त्वरा आवेश राजिना राजवाजिना गत्वा अस्मिन् वीरे न विरोद्धव्यं इति चमूं ऊचे. ॥ २१२ ॥

अर्थः—पछी ते मंत्रिए उतावळी चालथी शोभता एवा राजाना घोडा पर ( बेशी त्यां ) जइ, (हवे) आ वीरपुरुष साथे युद्ध करवानुं नथी, एम सैन्यने हुकम कर्यो. ॥ २१२ ॥

ईदृग्मन्त्रिगिरा शान्तमनसः पृतनाजनाः । सद्यो हृद्यदृशः स्वस्मिन्मत्वा युद्धं ललज्जिरे ॥ २१३ ॥

अन्वयः—ईदृग् मंत्रि गिरा शांतमनसः पृतनाजनाः, सद्यः हृद्यदृशः स्वस्मिन् युद्धं मत्वा ललज्जिरे. ॥ २१३ ॥

अर्थः--एवी रीतना मंत्रिना वचनथी शांत हृदयवाळा सैनिको तुरतज अंधापारहित थया, तथा पोतपोतावच्चे करेलुं युद्ध जाणीने शरमावा लाग्या, ॥ २१३ ॥

सचिवस्तु विमुच्याश्वं गतः स्मरमरुद्गृहम् । अग्रेकुमारमारूढविनयां वाचमाचरत् ॥ २२४ ॥

अन्वयः-सचिवः तु अश्वं विमुच्य स्मरमरुत् गृहं गतः, अग्रे कुमारं आरूढ विनयां वाचं आचरत्. ॥२१४॥

अर्थः-(पछी) मंत्री तो घोडापरथी उतरीने कामदेवना मंदिरमां गयो, तथा ते कुमार आगळ विनययुक्त वचन बोलवा लाग्यो के,

धीरचूडामणे वीर गम्भीरगुणनीरधे । त्वन्मुखेन्दौ नृपश्चक्षुश्चकोरयितुमिच्छति ॥ २१५ ॥

अन्वयः—(हे) धीरचूडामणे ! वीर ! गंभीर गुण नीरधे ! नृपः त्वत्मुख इंदौ चक्षुः चकोरयितुं इच्छति. ॥ २१५ ॥

अर्थः—हे धैर्यवंतोमां मुकुट सरखा, हे शूरवीर ! तथा हे गंभीर गुणोना महासागरसरखा ! राजा तमारा मुखरूपी चंद्रनी आगळ (पोतानां) चक्षुने चकोररूप करवाने इच्छे छे. (अर्थात् तमोने मळी आनंद पामवा इच्छे छे.) ॥ २१५ ॥

**उत्थानमेव भूमीपसमीपगतये ततः । विततार कुमारस्तद्गिरामुत्तरमुत्तरम् ॥ २१६ ॥**

अन्वयः—ततः कुमारः भूमीप समीप गमने उत्थानं एव त द्गिरां उत्तरं उत्तरं विततार. ॥ २१६ ॥

अर्थः—पछी ते रतिसार कुमारे तो राजापासे जवामाटे उभाथवारूपज ते मंत्रिना वचननो श्रेष्ठ उत्तर आप्यो. (अर्थात् बीजो कंइ उत्तर दीधाविना चालवाज मांडयुं.) ॥२१६॥

**रथेन प्रथितेनाथ मन्त्रिनाथनिदेशतः । अगादगारं जगतीभुजङ्गस्य महाभुजः ॥ २१७ ॥**

अन्वयः—अथ मंत्रिनाथनिदेशतः प्रथितेन रथेन महाभुजः (सः) जगतीभुजंगस्य अगारं अगात्. ॥ २१७ ॥

अर्थः—पछी ते मंत्रीश्वरना कहेवाथी (एक) विशाल रथमां (बेसीने) ते महापराक्रमी कुमार राजानी सभामां गयो. ॥ २१७ ॥

**क्षमाजानिस्तमायान्तं सभान्तर्भान्तमंशुभिः । उपमानामनध्यायं निध्याय ध्यायति स्म सः ॥ २१८ ॥**

अन्वयः—सः क्षमाजानिः अंशुभिः भांतं, उपमानां अनध्यायं तं सभांतः आयांतं निध्याय ध्यायतिस्म. ॥ २१८ ॥

अर्थः-(पछी) ते राजा किरणोवडे (तेजवडे) दीपता, तथा अनुपम एवा ते रतिसारकुमारने सभामां आवतो जोइने विचारवा लाग्योके,

स धन्यः स सतां मान्यः पश्येद्यः सकृदप्यमुम् । बन्धुः श्रीबन्धुरो येषामेष तेषां तु किं ब्रुवे ॥ २१९ ॥

अन्वयः—यः सकृत् अपि अमुं पश्येत्, सः धन्यः, सतां मान्यः, श्रीबंधुरः एषः येषां बंधुः, तेषां तु किं ब्रुवे ? ॥ २१९ ॥

अर्थः—जे (कोइ) एकवार पण आ पुरुषने जुए, तेने (पण) भाग्यशाली तथा सज्जनोमां श्रेष्ट जाणवो, (त्यारे) मनोहर शोभावाळो आ जेओनो बंधु छे, तेओनी तो वातज शुं कहेवी ? ॥ २१९ ॥

तासां तु सफलं जन्म दूरे तासामनिर्वृतिः । प्रेम यासामसौ कामः सौहृदेन हृदेच्छति ॥ २२० ॥

अन्वयः—असौ कामः सौहृदेन हृदा यासां प्रेम इच्छति. तासां तु जन्म सफलं, तासां अनिर्वृतिः दूरे. ॥ २२० ॥

अर्थः—आ कामदेवसरखो ( कुमार ) मित्राइवाळा हृदयवडे करीने जे कन्याओना प्रेमने इच्छे छे, तेओनो तो जन्मज सफल (थयेलो जाणवो) अने तेओनो असंतोष तो दूरज (गयो जाणवो.) ॥ २२० ॥

ईदृग्ध्यानसुधापानरसमानसमानमत् । इलातलमिलन्मौलिः कुमारः कामुकं भुवः ॥ २२१ ॥

अन्वयः—ईदृग् ध्यान सुधापान रस मानसं भुवः कामुकं कुमारः इला तल मिलत् मौलिः आनमत्. ॥ २२१ ॥

अर्थः—एवी रीतना विचाररूपी अमृतपानना रसमां लागेलुं छे मन जेनुं एवा ते राजाने ते रतिसार कुमारे पृथ्वीपीठपर मस्तक लगाडीने नमन कर्युं. ॥ २२१ ॥

ततः प्रीतिं परां बिभ्रदभ्युत्थाय धराधवः । दूरादुल्लासयन्पाणी वाणीमेतामुवाच तम् ॥ २२२ ॥

अन्वयः—ततः परां प्रीतिं बिभ्रत् धराधवः अभ्युत्थाय दूरात् पाणी उल्लासयन् तं एतां वाणीं उवाच ॥ २२२ ॥

अर्थः—पछी अति प्रेमने धारण करतो ते राजा सामो उभो थइने, तथा दूरथीज बन्ने हाथ उंचा करी तेने आवी रीतनुं वचन कहेवा लाग्यो. ॥ २२२ ॥

गुणमालिन्समालिङ्ग ममाङ्गानि समुत्सुकः। इमान्यमृतपानेन हसन्तु रसनेन्द्रियम् ॥ २२३ ॥

अन्वयः—(हे) गुणमालिन् ! समुत्सुकः मम अंगानि समालिंग ? इमानि अमृतपानेन रसनेंद्रियं हसंतु. ॥ २२३ ॥

अर्थः—हे गुणोथी शोभता राजकुमार ! तुं हर्षित थइ (एकदम) मारां अंगोने भेटी पड ? (के जेथी) ते अंगो अमृतपान करीने जीह्वाइंद्रियनी भले हांसी करे. ॥ २२३ ॥

अथार्पितपरीरम्भं दोर्भ्यां संभाव्य भूविभुः। निवेश्य गुणसंकेतस्थानमंके तमभ्यधात् ॥ २२४ ॥

अन्वयः—अथ दोर्भ्यां अर्पित परीरंभं, गुण संकेत स्थानं तं संभाव्य, अंके निवेश्य भूविभुः अभ्यधात्. ॥ २२४ ॥

अर्थः—पछी बे हाथोवडे आपेल छे आलिंगन जेणे, तथा गुणोने मळवाना संकेतस्थान सरखा एवा ते कुमारनुं सन्मान करीने, तथा तेने (पोताना) खोळामां बेसाडीने राजाए कह्युं के, ॥ २२४ ॥

प्रवीर भवता हीरप्रतिवीरगुणैर्गुणैः। को वंशः सर्ववंशानामवतंसः कृतिन्कृतः ॥ २२५ ॥

अन्वयः—(हे) प्रवीर ! हे कृतिन् ! हीरप्रतिवीरगुणैः गुणैः भवता कः वंशः सर्ववंशानां अवतंसः कृतः ? ॥ २२५ ॥

अर्थः—हे शूरवीर ! हे सुज्ञ ! हीराना प्रतिस्पर्धी (तेजस्वी) छे गुणो जेना, एवा गुणोवडे तमोए कयो वंश सर्ववंशोना मुकुटरूप कर्यो छे ? ॥ २२५ ॥

**स्वाभिधेयसुधासिक्तैरक्षरैरभिषिञ्चसि । भवदुःखाग्नितप्तानि सज्जनानां मनांसि कैः ॥ २२६ ॥**

अन्वयः—स्वअभिधेय सुधा सिक्तैः कैः अक्षरैः भवदुःख अग्नि तप्तानि सज्जनानां मनांसि अभिषिंचसि ? ॥ २२६ ॥

अर्थः—तमारा नामरूपी अमृतथी सींचायेला, एवा कया अक्षरोवडे संसारसंबंधि दुःखरूपी अग्निथी तपेलां सज्जनोनां हृदयोनो (तमो) अभिषेक करो छो ? (अर्थात् तमारुं नाम शुं छे) ? ॥ २२६ ॥

**कैरस्मद्वसुधाभाग्यैराकृष्टेन त्वयाधुना । अकारि स्ववियोगेन खेदिनी मेदिनी च का ॥ २२७ ॥**

अन्वयः—च कैः अस्मद् वसुधा भाग्यैः आकृष्टेन त्वया अधुना स्ववियोगेन का मेदिनी खेदिनी अकारि ? ॥ २२७ ॥

अर्थः—वळी अमारी (आ) पृथ्वीना कोइक भाग्यवडे खेंचाइने आवेला एवा तमोए हमणा तमारा वियोगथी कइ पृथ्वीने शोकातुर करी छे ? (अर्थात् तमो क्यांना रहेवासी छो) ? ॥ २२७ ॥

**ईदृक्षवेषसंभाव्यस्तव पाणिग्रहोत्सवः । कस्याः सफलयामास जीवितं जन्म वर्ष्म च ॥ २२८ ॥**

अन्वयः—च ईदृक्ष वेष संभाव्यः तव पाणिग्रह उत्सवः कस्याः जीवितं, जन्म, च वर्ष्म सफलयामास. ॥२२८॥

अर्थः—वळी (तमारा) आवा वेषथी जे हकीकतनुं अनुमान थइ शके छे, एवा तमारा लग्नना महोत्सवे कइ स्त्रीनुं जीवन, जन्म

तथा शरीर सफल कर्युं छे? (अर्थात् कइ स्त्रीसाथे तमारां लग्न थयां छे) ? ॥ २२८ ॥

दृक्प्रियेऽपि त्वयि प्रापुर्मद्बलानि किमन्धताम् । उलूकमण्डलानीव भासुरे वासरेश्वरे ॥ २२९ ॥

अन्वयः--वासर ईश्वरे भासुरे उलूक मंडलानि इव, दृक् प्रिये अपि त्वयि मद्बलानि अंधतां किं प्रापुः ? ॥ २२९ ॥

अर्थः--सूर्य प्रकाशित होते छते घुवडोना समूहोनीपेठे, आंखोने आनंदकारी एवा पण तमारीसामे मारां लश्करो अंधपणुं केम पाम्यां ? ॥ २२९ ॥

इत्युक्ते भूभुजाचख्यौ कुमारश्चरितं निजम् । क्रुद्धसैन्यान्धताहेतुं न वेद्मीति जगाद सः ॥ २३० ॥

अन्वयः--भूभुजा इति उक्ते कुमारः निजं चरितं आचख्यौ, क्रुद्ध सैन्य अंधता हेतुं न वेद्मि इति सः जगाद. ॥ २३० ॥

अर्थः--राजाए एम कहेवाथी (ते) रतिसारकुमारे पोतानुं चरित्र कही संभळाव्युं. परंतु क्रोध पामेला सैन्यना अंधपणानुं कारण हुं जाणतो नथी, एम तेणे कह्युं. ॥ २३० ॥

अथ धात्रीशमन्त्रीशश्रेष्ठिश्रेष्ठैरतन्यत । प्रमोदप्रीणितं पुत्रीपाणिग्रहमहामहः ॥ २४१ ॥

अन्वयः—अथ धात्रीश मंत्रीश श्रेष्ठिश्रेष्ठैः प्रमोद प्रीणितं पुत्रीपाणिग्रह महामहः अतन्यत. ॥ २३१ ॥

अर्थः—पछी (ते) राजा, मंत्रीश्वर तथा महोटा शेठे आनंदथी खुशी थइने ( ते रतिसारकुमार साथे पोतपोतानी ) पुत्रीओना लग्ननो महोटो महोत्सव कर्यो. ॥ २३१ ॥

श्लोकाप्तिबन्धुताप्रीतिबन्धुरेण सुबन्धुना । तदुक्तिश्रवणादेत्य कुमाराय ददे मदः ॥ २३२ ॥

अन्वयः-श्लोक आप्ति बंधुता प्रीति बंधुरेण सुबंधुना तदुक्ति श्रवणात् एत्य कुमाराय मदः ददे. ॥ २३२ ॥

अर्थः-श्लोक आपवाथी भ्रातृभावना प्रेमवडे शोभता एवा (ते) सुबंधुए (पण) आ वृत्तांत सांभळवाथी (त्यां) आवी ते रतिसार कुमारने आनंद पमाड्यो. ॥२३२॥

कुमारस्य प्रसादेन धनं धात्रीश मेऽधुना । इति विज्ञपनात्तेन विशेषात्तोषितो नृपः ॥ २३३ ॥

अन्वयः--(हे) धात्रीश ! कुमारस्य प्रसादेन मे अधुना धनं, इति विज्ञपनात् तेन नृपः विशेषात् तोषितः. ॥ २३३ ॥

अर्थः--(हे) राजन् ! आ रतिसारकुमारनी कृपाथी मारीपासे आ वखते धन थयेलुं छे, एम कहीने तेणे राजाने विशेष प्रकारे खुशी कर्यो. ॥ २३३ ॥

कुमारेण समं प्रीतिवार्ताभृतमिलाभृतम् । एत्यापराह्णकालेऽथ वनपालो व्यजिज्ञपत् ॥ २३४ ॥

अन्वयः--अथ अपराह्णकाले कुमारेण समं प्रीतिवार्ताभृतं इलाभृतं एत्य वनपालः व्यजिज्ञपत्. ॥ २३४ ॥

अर्थः--पछी पाछले पहोरे कुमारनी साथे प्रेमवार्ता करता एवा ते राजापासे आवीने वनपाले कह्युं के, ॥ २३४ ॥

स्वामिन् कोऽप्यद्य दक्षौघवारणश्चारणो मुनिः । उत्तीर्य व्योमतोऽकार्षीत्कायोत्सर्गं वनेऽधुना ॥ २३५ ॥

अन्वयः--(हे) स्वामिन् ! अत्र दक्ष ओघ वारणः कः अपि चारणः मुनिः व्योमतः उत्तीर्य अधुना वने कायोत्सर्गं अकार्षीत्.
अर्थः—हे स्वामी ! आजे चतुर माणसोना समूहमां हाथीसरखा कोइक चारणमुनिए आकाशमांथी उतरीने हमणा वननी अंदर कायोत्सर्ग कर्यो छे. ॥ २३५ ॥

इत्यभिश्रुत्य सत्कृत्य वनीशमवनीशिता । ययौ समं कुमारेण मुनेरुत्कण्ठया वने ॥ २३६ ॥

अन्वयः—इति अभिश्रुत्य, वनीशं सत्कृत्य अवनी ईशिता कुमारेण समं मुनेः उत्कंठया वने ययौ. ॥ २३६ ॥
अर्थः-एम सांभळी वनपालनो सत्कार करी (ते) राजा रतिसार कुमारनी साथे ते मुनिराजने (वांदवानी) इच्छाथी वनमां गयो.

नमस्यतो नरेशादीन् भव्यान्संभावयन्नथ । ज्ञानत्रयमयः कायोत्सर्गमप्यमुचन्मुनिः ॥ २३७ ॥

अन्वयः----अथ नमस्यतः नरेशादीन् भव्यान् संभावयन् ज्ञानत्रयमयः मुनिः कायोत्सर्गं अपि अमुचत्. ॥ २३७ ॥
अर्थः-पछी नमता एवा ते राजाआदिकोने भव्य मनुष्यो जाणता, अने त्रण ज्ञानवाळा ते मुनिराजे कायोत्सर्ग ध्याननो पण त्याग कर्यो.

देशनां भवकान्तारतापनिर्वापनोचिताम् । व्यधान्मुक्तिपुरद्वारसुधासिन्धुं यतिस्ततः ॥ २४८ ॥

अन्वयः—ततः यतिः भव कांतार ताप निर्वापन उचितां, मुक्ति पुर द्वार सुधा सिंधुं देशनां व्यधात् ॥ २३८ ॥
अर्थः—पछी ते मुनिराजे संसररूपी वनना तापने दूर करवाने लायक, तथा मुक्तिरूपी नगरीना दरवाजापासे रहेला अमृतना महासागरसरखी धर्मदेशना आपी. ॥ २३८ ॥

सुबन्धोः स्वस्य च प्राच्यं कर्मवैचित्र्यकारणम् । भवं भूपभवोऽपृच्छद्देशनान्ते नतो यतिम् ॥ २३९॥

अन्वयः—सुबंधोः स्वस्य च कर्म वैचित्र्य कारणं प्राच्यं भवं भूपभवः देशनांते यतिं नतः अपृच्छत् ॥ २३९ ॥

अर्थः-(पछी) ते सुबंधुना तथा पोताना कर्मोनी विचित्रताना कारणरूप एवुं पूर्व भवनुं (वृत्तांत) ते रतिसार कुमारे देशनाने अंते (ते) मुनिराजने नमीने पूछयुं. ॥ २३९ ॥

मुनीन्दुरपि दन्तांशुच्छलप्रचलदञ्चलाम् । आन्दोलयत लोलायां दोलायामिव भारतीम् ॥ २४०॥

अन्वयः-मुनि इंदुः अपि दंत अंशु च्छल प्रचलत् अंचलां भारतीं दोलायां इव लोलायां आंदोलयत. ॥ २४० ॥

अर्थः-( त्यारे ) ते मुनिराज पण दांतोना किरणोना मिषथी चपळ थया छे, छेडा जेना एवी सरस्वतीने हींडोलाखाट सरखी (पोतानी) जीह्वापर हींचोळवा लाग्या, (अर्थात् बोल्या.) ॥ २४० ॥

श्रीहस्तिपुरमित्यस्ति भुवस्तिलकवत्पुरम् । सेव्यन्ते कृतकीर्त्यम्बुमज्जनैर्यज्जनैः श्रियः ॥ २४१ ॥

अन्वयः-भुवः तिलकवत् श्रीहस्तिपुरं इति पुरं अस्ति, कृत कीर्ति अंबु मज्जनैः यज्जनैः श्रियः सेव्यंते. ॥ २४१ ॥

अर्थः-पृथ्वीना तिलकसरखुं श्रीहस्तिपुर नामनुं नगर छे. करेल छे कीर्तिरूपी जलमां स्नान जेओए एवा ते नगरीना लोको लक्ष्मीदेवीनी पूजा करे छे. ( अर्थात् घणुं लक्ष्मीदान आपी कीर्ति मेळवे छे ) ॥ २४१ ॥

तत्रासीदहितत्रासी सुमित्र इति भूपतिः । यत्प्रतापप्रतानिन्या निन्ये भानुः प्रसूनताम् ॥२४२॥

अन्वयः-तत्र अहितत्रासी सुमित्रः इति भूपतिः आसीत्, यत् प्रताप प्रतानिन्या भानुः प्रसूनतां निन्ये. ॥ २४२ ॥

अर्थः-ते नगरमां शत्रुओने त्रास आपनारो "सुमित्र" एवा नामनो राजा हतो, के जे राजाना प्रतापरूपी वेलडीए सूर्यने तो (पोताना) पुष्परूप बनाव्यो हतो ॥ २४२ ॥

तस्य सूनुरभूद्विश्वसेनाख्यो विश्वभूषणम् । यः कलानां गुणानां च शङ्के सङ्केतकेतनम् ॥ २४३ ॥

अन्वयः—तस्य विश्व विभूषणं विश्वसेन आख्यः सूनुः अभूत्, यः कलानां गुणानां च संकेतकेतनं शंके. ॥ २४३ ॥

अर्थः—ते राजानो जगतना अलंकार सरखो विश्वसेन नामे पुत्र हतो, के जे कलाओ तथा गुणोने (एकठा मळवाना) संकेत स्थान सरखो हतो, एवुं हुं अनुमान करुं छुं. ॥ २४३ ॥

अदुष्टयैव दृष्ट्या स स्वभावाविर्भवत्कृपः । ददर्श सर्पतः सर्पानपि दर्पातिपातिनः ॥ २४४ ॥

अन्वयः-स्वभाव आविर्भवत्कृपः सः दर्पातिपातिनः सर्पतः सर्पान् अपि अदुष्टया एव दृष्ट्या ददर्श. ॥ २४४ ॥

अर्थः—स्वभावथीज प्रगट थती छे, दया जेने, एवो ते राजकुमार गर्विष्ट थइ दोड्या आवता सर्पोने पण दयायुक्त दृष्टिथीज जोतो हतो. ॥ २४४ ॥

कदाप्यन्यायवल्लीनां मस्करेऽपि न तस्करे । करुणाकरिणीविन्ध्यो वधबुद्धिं व्यधत्त सः ॥ २४५ ॥

अन्वयः—करुणा करिणी विंध्यः सः अन्यायवल्लीनां मस्करे अपि तस्करे कदापि वधबुद्धिं न व्यधत्त. ॥ २४५ ॥

अर्थः—दयारूपी हाथणीने (वसवामाटे) विंध्याचलसरखो ते राजकुमार अन्यायरूपी वेलडीओने ( चडवाना ) वांससरखा एवा पण चोरना संबंधमां कदापि पण (तेने) मारी नाखवानी बुद्धि करतो नही. ॥ २४५ ॥

अपराधपराधीने क्रोधासीनेऽपि विद्विषि । न कदाचिदसौ चक्रे मत्सरं विश्ववत्सलः ॥ २४६ ॥

अन्वयः—अपराध पराधीने, क्रोधासीने अपि विद्विषि विश्ववत्सलः असौ कदाचित् मत्सरं न चक्रे. ॥ २४६ ॥

अर्थः—अपराधोथी पराधीन थयेला, तथा पाछा क्रोधातुर थयेला एवा शत्रुप्रते पण जगत्पर प्रेम राखनारो ते राजकुमार कोइपण समये द्वेष करतो नही. ॥ २४६ ॥

चत्वारोऽस्य कलासारसूरवीरजयाख्यया । मन्त्रिक्षत्रवणिग्वैद्यनन्दनाः सुहृदोऽभवन् ॥ २४७ ॥

अन्वयः—अस्य मंत्रि क्षत्र वणिक् वैद्यनंदनाः, कलासार सूर वीर जय आख्यया चत्वारः सुहृदः अभवन्. ॥ २४७ ॥

अर्थः—आ राजकुमारना मंत्रि, क्षत्रिय, वणिक् तथा वैद्यना (अनुक्रमे) कलासार, सूर, वीर अने जयनामना चार मित्रो हता.

एभिः समं स मन्त्रीन्द्रपुत्राद्यैर्माद्यदुद्यमः । चतुर्भिः शुशुभे खेलन्धर्मैरात्मेव धीमतः ॥ २४८ ॥

अन्वयः—धीमतः आत्म धर्मैः इव, मंत्रींद्रपुत्राद्यैः एभिः चतुर्भिः समं खेलन् माद्यत् उद्यमः सः शुशुभे. ॥ २४८ ॥

अर्थः—बुद्धिवाननो आत्मा जेम (दानआदिक चारप्रकारना) धर्मोवडे शोभे, तेम मंत्रिना पुत्रआदिक ते चार मित्रोनीसाथे क्रीडा करतो तथा विशाल उद्यमवाळो ते राजपुत्र शोभतो हतो. ॥ २४८ ॥

स प्रैक्षत कृपाशीलो लीलोद्यानेऽन्यदा व्रजन् । चण्डालैश्चालितं कंचिच्छूलमूलचरं नरम् ॥ २४९ ॥

अन्वयः—सः कृपाशीलः अन्यदा लीला उद्याने व्रजन् चंडालैः चालितं शूलमूलचरं कंचित् नरं प्रैक्षत ॥ २४९ ॥

अर्थः—ते दयाळु राजकुमारे एक दिवसे क्रीडा करवाना बगीचामां जतांथकां, चांडालोवडे लेइ जवाता, (अने ए रीते) शूली· तरफ चालता एवा कोइक पुरुषने जोयो. ॥ २४९ ॥

दशामीदृशमागच्छत्किमागः कलयन्नयम् । इति भूपभुवा पृष्टश्चण्डालपतिरालपत् ॥ २५० ॥

अन्वयः—अयं किं आगः कलयन् ईदृशं दशां आगच्छत् ? इति भूपभुवा पृष्टः चंडालपतिः आलपत्. ॥ २५० ॥

अर्थः—आ पुरुष शुं अपराध करवाथी आवी दशाए पहोंच्यो छे ? एम ते राजकुमारे पूछवाथी मुख्य चांडाले कह्युं के, ॥२५०॥

नभोरत्नसपत्नाभरत्नाभरणपेटिका । त्वन्मातुरमुनाहारि राज्ञासौ समहारि तत् ॥ २५१ ॥

अन्वयः-त्वन्मातुः नभो रत्न सपत्न आभ रत्न आभरण पेटिका अमुना अहारि, तत् राज्ञा असौ समहारि. ॥ २५१ ॥

अर्थः–तमारी मातानी सूर्यसरखी कांतिवाळां रत्नोना आभूषणोनी पेटी आ पुरुषे चोरी छे, अने तेथी राजाए आने मारी नाखवानो (हुकम कर्यो छे.) ॥ २५१ ॥

मन्मातुर्वित्तहर्तायं हन्तव्यः स्वेच्छया मया । इत्युदित्वाथ तेभ्यस्तं कुमारश्चौरमग्रहीत् ॥ २५२ ॥

अन्वयः–अथ मन्मातुः वित्तहर्ता अयं मया स्वेच्छया हंतव्यः, इति उदित्वा कुमारः तेभ्यः तं चौरं अग्रहीत्. ॥ २५२ ॥

अर्थः–हवे मारी मातानुं धन हरनार आ चोरने मारे मारी इच्छामुजब मारवो जोइये, एम कही ते राजकुमारे तेओनी पासेथी ते चोरने (पोते स्वाधीन कर्यो. ॥ २५२ ॥

अन्यायाद् गृह्यमाणा श्रीर्मणिः फणिपतेरिव । मर्त्येषु मोहमत्तेषु दत्ते मृत्युमसंशयम् ॥२५३ ॥

आकृष्टिमन्त्रे लक्ष्मीणां पिष्टियन्त्रे महापदाम् । धर्मस्य जीवितप्राये मतिर्न्याये वितन्यताम् ॥ २५४ ॥

इत्युक्त्वा शिक्षयित्वायं कुमारेण मलिम्लुचः । वरचीवरदानेन तोषितः प्रेषितः ययौ ॥ २५५ ॥

अन्वयः—फणिपतेः मणिः इव अन्यायात् गृह्यमाणा श्रीः मोहमत्तेषु मर्त्येषु असंशयं मृत्युं दत्ते, ॥ २५३ ॥ लक्ष्मीणां आकृष्टिमंत्रे, महापदां पिष्टियंत्रे, धर्मस्य जीवितप्राये न्याये मतिः वितन्यतां ? ॥ २५४ ॥ इति उक्त्वा शिक्षयित्वा, वरचीवरदानेन तोषितः कुमारेण प्रेषितः अयं मलिम्लुचः ययौ. ॥ २५५ ॥ त्रिभिर्विशेषकं ॥

अर्थः—सर्पना मणिनीपेठे अन्यायथी चोरेली लक्ष्मी मोहांध माणसोने खरेखर मृत्यु आपे छे, ॥२५३॥ (माटे) लक्ष्मीने खेंची लाववाना मंत्रसरखा, अने महान् विपत्तिने पीसीनाखवाने घंटीखरखा, अने धर्मना जीवितसरखा एवा न्यायमां बुद्धि राखवी. ॥ २५४ ॥ एम कही शिखामण आपीने, तथा उत्तम वस्त्रना दानथी तेने खुशी करी ते राजकुमारे छोडीमूकेलो ते चोर (त्यांथी) चाल्यो गयो. ॥ २५५ ॥ त्रिभिर्विशेषकं. ॥

एकदा राजसेवार्थं व्रजन्राजगृहाजिरे । प्रभूतां मण्डलीभूतां भूपजः प्रैक्षत प्रजाम् ॥ २५६ ॥

अन्वयः—एकदा भूपजः राजसेवार्थं व्रजन् राज गृह आजिरे मंडलीभूतां प्रभूतां प्रजां प्रैक्षत. ॥ २५६ ॥

अर्थः—(वळी) एक दिवसे ते राजकुमारे राजानी सेवामाटे जतांथकां राजमेहेलना आंगणामां प्रजाना घणा लोकोने एकठा थयेला जोया. ॥ २५६ ॥

किमत्रेति कुमारेण पृष्टः कोटीरयन्करौ । व्यक्तभक्तिकलादक्षस्तलारक्षो जगाद गाः ॥ २५७ ॥

अन्वयः-अत्र किं ? इति कुमारेण पृष्टः व्यक्त भक्ति कला दक्षः तलारक्षः करौ कोटीरयन् गाः जगाद. ॥ २५७ ॥

अर्थः-अहीं शुं छे ? एम ते राजकुमारे पूछवाथी (पोतानी) भक्तिकला प्रगट देखाडवामां चतुर एवो कोटवाल (पोताना) बन्ने हाथोने मुकुटरूप करतो थको वाणी बोलवा लाग्यो के, ॥ २५७ ॥

निजा निजघ्निरे येन विषयाश्छद्मसद्मना । त्वरावत्पत्रसेनेन श्येनेनेव पतत्रिणः ॥ २५८॥

प्रच्छन्नपुंनियुक्तेन रसदानेन यः सदा । हन्ति नो दन्तिनो लीलाशैलानिव जयश्रियः ॥ २५९ ॥
जगत्यस्ति समस्तेऽपि नास्माकं यत्परः परः । सैष विक्रमसेनाख्यस्ताम्रलिप्तीपुरीश्वरः ॥ २६० ॥
वीरसेनेन सेनान्या छलधाटिकया धृतः । क्षेपितः क्ष्माभुजा हन्तुमिह मन्तुमहोदधिः ॥ २६१ ॥

अन्वयः-श्येनेन पतत्रिणः इव त्वरावत्पत्रसेनेन, छद्मसद्मना येन निजाः विषयाः निजघ्निरे, ॥ २५८ ॥ प्रच्छन्न पुंनियुक्तेन रसदानेन यः सदा जयश्रियः लीलाशैलान् इव नः दंतिनः हंति, ॥ २५९ ॥ समस्ते अपि जगति अस्माकं यत्परः परः न अस्ति, सः एषः विक्रमसेन आख्यः ताम्रलिप्तीपुरी ईश्वरः, ॥ २६० ॥ वीरसेनेन सेनान्या छलधाटिकया धृतः, मंतुमहोदधिः क्ष्माभुजा इह हंतुं क्षेपितः ॥ २६१ ॥ चतुर्भिः कलापकं ॥

अर्थः-बाज जेम पक्षिओने मारे, तेम झडपथी तीर फेंकनारी सेनावाळा (पक्षे-झडपवाळी पांखरूपी सैन्यवाळा) कपटना स्थानसरखा, एवा जेणे आपणा देशो भांग्या छे, ॥ २५८ ॥ ( तथा ) गुप्त पुरुषोमारफत झेर आपीने जे हमेशां जयलक्ष्मीने क्रीडा करवाना पर्वतसरखा आपणा हाथीओने मारी नाखे छे, ॥ २५९ ॥ (तथा) समस्त जगतमां जेनासरखो बीजो कोइ आपणो शत्रु नथी, ते आ विक्रमसेन नामनो ताम्रलिप्तीनगरीनो राजा छे, ॥ २६० ॥ (अने तेने आपणा) वीरसेननामना सेनापतिए कपटथी छापो मारी पकड्यो छे, एवा अपराधना महासागरसरखा (आ राजाने आपणा) राजाए अहीं मारीनाखवामाटे आण्यो छे. ॥२६१॥

इति श्रुतिकृतक्रोध इवाकृष्टं प्रनर्तयन् । कृपाणं भृकुटीभीमभालः कालकटाक्षवत् ॥ २६२ ॥
मन्तुमन्तममुं हन्ता हन्तायं भूपभूः स्वयम् । इति कौतूहलोत्तालालोके लोके स्थितेऽभितः ॥ २६३ ॥
मृत्युर्ममायमायातीत्युद्वृताकुलचक्षुषः । ताम्रलिप्तीपूरीभर्तुरुपर्यागत्य वेगतः ॥ २६४ ॥
कृपाश्रुपूर्णदृक्प्रीत्या वपुः सपुलकं वहन् । असौ जगदसंबन्धबन्धुर्बन्धनमच्छिनत् ॥ २६५ ॥

अन्वयः—इति श्रुति कृत क्रोधः इव आकृष्टं कृपाणं मनर्तयन्, कालकटाक्षवत् भृकुटी भीम भालः, ॥ २६२ ॥ हंत अमुं मंतु मंतं अयं भूपभूः स्वयं हंता ! इति कौतूहल उत्ताल आलोके लोके अभितः स्थिते, ॥२६३॥ मम अयं मृत्युः आयाति, इति उद्वृत आकुल चक्षुषः, ताम्रलिप्तीपुरी भर्तुः उपरि वेगतः आगत्य, ॥ २६४॥ कृपा अश्रु पूर्ण दृक्, मीत्या सपुलकं वपुः वहन्, जगत् असंबंध बंधुः असौ बंधनं अच्छिनत्. ॥ २६५ ॥ चतुर्भिः कलापकं ॥

अर्थः—एम सांभळीने जाणे क्रोधातुर थयो होय नही ! तेम (म्यानमांथी) खेंची कडाडेली तलवारने नचावतो, तथा यमदेवना कटाक्षोनीपेठे भृकुटीथी भयंकर ललाटवाळो, ॥ २६२ ॥ अरे ! आ अपराधीने आ राजकुमार (शु) पोतेज मारशे ! एम आश्चर्यथी ताडीओ देइ जोता लोको चोतरफ उभे छते ॥ २६३ ॥ मारुं आ (प्रत्यक्ष) मृत्युज आवे छे, एवा विचारथी फाटीने व्याकुल थयेली छे आंखो जेनी, एवा ते ताम्रलीप्ती नगरीना राजापासे वेगथी धसी आवीने, ॥२६४॥ दयाथी आंसुसहित आंखो-

वाळा, अने प्रेमथी रोमांचित शरीरने धारण करता, तथा संबंधविना पण जगतना बांधवसरखा ते राजकुमारे (ते राजानुं) बंधन कापी नाख्युं. ॥ २६५ ॥ चतुर्भिः कलापकं ॥

त्वरया ये मनांसीव मनसामपि रेजिरे । तैरश्वैर्विश्वसेनेन प्रेषितः स ययौ जवात् ॥ २६६ ॥

अन्वयः--मनसां अपि मनांसि इव ये त्वरया रेजिरे, तैः अश्वैः विश्वसेनेन प्रेषितः सः जवात् ययौ. ॥ २६६ ॥

अर्थः-मनना पण जाणे मन होय नही ! एम वेगवडे करीने जे शोभता हता, तेवा घोडाओ साथे ते विश्वसेन कुमारे मोकलेलो ते विक्रमसेनराजा (त्यांथी) झडपबंध चाल्यो गयो. ॥ २६६ ॥

तत्परिज्ञाय विच्छायः कुपितो नृपतिर्जगौ । कुमारं प्रति सारङ्गपतिवन्निष्ठुरस्वरः ॥ २६७ ॥

अन्वयः-तत् परिज्ञाय कुपितः विच्छायः नृपतिः सारंगपतिवत् निष्ठुरस्वरः कुमारंप्रति जगौ. ॥ २६७ ॥

अर्थः-ते वृत्तांत जाणीने क्रोध पामेलो तथा विलखो पडेलो राजा, सिंहनीपेठे त्राड मारीने कुमारने कहेवा लाग्यो के, ॥२६७॥

येनैकेन हतेन स्याद्बहूनां देहिनां सुखम् । स वध्यः शुद्धबुद्धीनां कृपातिशयलिप्सया ॥ २६८ ॥

अन्वयः—येन एकेन हतेन बहूनां देहिनां सुखं स्यात्, सः कृपातिशय लिप्सया शुद्धबुद्धीनां वध्यः ॥ २६८ ॥

अर्थः-जेने एकने मारवाथी घणा प्राणीओने सुख थाय, ते वधारे दया करवानी इच्छाथी शुद्धबुद्धिवाळाने मारवा लायक छे.

कृपा ते कूपपातेन किमियं न क्षयं गता । यद्द्विषं मुञ्चता देशः पातकिन् घातितस्त्वया ॥ २६९ ॥

अन्वयः—(रे) पातकिन्! द्विषं मुंचता त्वया यत् देशः घातितः, इयं ते कृपा कूपपातेन क्षयं किं न गता? ॥ २६९. ॥

अर्थः—(अरे) पापी! शत्रुने छोडी मूकीने तें जे देशनो धात कर्यो, एत्री आ तारी दया कूवामां पडीने विनाश केम न पामी?

कुर्वन्भूरि स्वदेशघ्ने निर्विवेक कृपां रिपौ । त्वमप्यसि विपक्षो मे न स्थेयं मद्भुवि त्वया ॥ २७० ॥

अन्वयः—(हे) निर्विवेक! स्वदेशघ्ने रिपौ भूरि कृपां कुर्वन् त्वं अपि मे विपक्षः असि, मद्भुवि त्वया न स्थेयं. ॥ २७० ॥

अर्थः—(हे) निर्विवेकी! पोताना देशनो विनाश करनारा शत्रु उपर (पण) घणी दया करनारो तुं पण मारो शत्रु छे, (माटे) मारी राज्यभूमिमां तारे न रहेवुं. ॥ २७० ॥

इति व्याहृतिमाकर्ण्य कुमारस्तारसंमदः । स्फारविद्वच्चमत्काररचनं वचनं दधौ ॥ ॥ २७१ ॥

अन्वयः—इति व्याहृतिं आकर्ण्य तारसंमदः कुमारः स्फार विद्वत् चमत्कार रचनं वचनं दधौ. ॥ २७१ ॥

अर्थः–एवुं वचन सांभळीने वधारे खुशी थयेलो ते कुमार म्होटा विद्वानोने पण आश्चर्य करनारुं वचन बोल्यो के, ॥ २७१ ॥

श्वसंल्लसन्ग्रसन्को न जन्तून् हन्ति सहस्रशः । तदेकस्य वधः कस्य प्राज्यप्राणिप्रियाय न ॥ २७२ ॥

अन्वयः–कः श्वसन् लसन् ग्रसन् सहस्रशः जंतून् न हंति? तत् कस्य एकस्य वधः प्राज्य प्राणि प्रियाय न? ॥ २७२ ॥

अर्थः-कयो प्राणी श्वास लेतां, विलास करतां, तथा खातांथकां हजारोगमे प्राणीओने मारतो नथी? माटे तेमाना कया एक प्राणीनो वध घणा प्राणीओने हितकारी (बचावनारो) नथी थतो? ॥ २७२ ॥

एवं सति मतिप्रष्ठैर्बहूनां हृष्टिहेतवे। को हन्तव्यः क्व कर्तव्यः कृपावद्भिः कृपाकणः ॥ २७३ ॥

अन्वयः-एवं सति मतिप्रष्ठैः कृपावद्भिः बहूनां हृष्टिहेतवे कः हंतव्यः? क्व कृपाकणः कर्तव्यः? ॥ २७३ ॥

अर्थः-एम होते छते बुद्धिवान दयाळु माणसोए घणा प्राणीओने खुशी करवामाटे कोने मारवो? अने क्यां दयानो लेश करवो?

तन्मन्ये सर्वथा नाथ दुरवस्थागतेऽङ्गिनि। मित्रामित्राविचारेण प्राणित्राणं विधीयते ॥ २७४ ॥

अन्वयः-तत् (हे) नाथ! मन्ये, सर्वथा अंगिनि दुरवस्थागते मित्र अमित्र अविचारेण प्राणित्राणं विधीयते. ॥ २७४ ॥

अर्थः-माटे हे स्वामी! हुं तो एम मानुं छुं के, ज्यारे सर्वथा प्रकारे प्राणी दुःखी अवस्थाने प्राप्त थयो होय, त्यारे मित्र अथवा शत्रुनो विचार कर्याविनाज (ते) प्राणीनुं रक्षण करवुं. ॥ ४७४ ॥

सहन्त एव ये हन्त शत्रुं तेऽपि शिवाध्वगाः। ये तु तत्रोपकुर्वन्ति तेषां गतिमवैति कः ॥ २७५ ॥

अन्वयः-हंत! ये शत्रुं सहंते एव, ते अपि शिव अध्वगाः, तु ये तत्र उपकुर्वंति, तेषां गतिं कः अवैति? ॥ २७५ ॥

अर्थः-अरे! जेओ शत्रु (तरफनां दुःखने) फक्त सहनज करे छे, तेओ पण मोक्षगामी थाय छे, तो पछी जेओ ते शत्रुउपर उप-

कार करे छे, तेओनी गति कोण जाणी शके छे ? ॥ २७५ ॥

तद् द्विषं मुञ्चतस्तात क मेऽभूदविवेकिता । क्व वास्मि द्वेषिपक्षोऽहं त्वत्पादाम्बुजषट्पदः ॥ २७६ ॥

अन्वयः—तत् (हे) तात ! द्विषं मुंचतः मे अविवेकिता क्व अभूत् ? वा क्व अहं द्वेषिपक्षः अस्मि ? त्वत्पादांबुज षट्पदः ।२७६।

अर्थः—माटे हे पिताजी ! शत्रुने छोडी देतां मारुं अविवेकीपणुं क्यां थयुं. ? अथवा क्यां हुं शत्रुनो पक्षकारी छुं ? (केमके) हुं तो आपना चरणकमलोने भमरानीपेठे (सेवुं छुं.) ॥ २७६ ॥

यदादिष्टं च देवेन मन्मही मुच्यतामिति । तद्गतोऽयमहं पापं पितुराज्ञाभिदं विदुः ॥ २७७ ॥

अन्वयः—च देवेन यत् इति आदिष्टं, मन्मही मुच्यतां, तत् अयं अहं गतः, पितुः आज्ञाभिदं पापं विदुः. ॥ २७७ ॥

अर्थः—वळी आपे जे एम कह्युं के, मारी भूमि छोडी दे, तो आ हुं चाल्यो, केमके पितानी आज्ञानो भंग करनार ( पुत्रने ) पापी कहेलो छे. ॥ २७७ ॥

इत्युदीर्य महावीर्यः प्रस्थितो दूरदेशधीः । प्रावृषीवाम्बुजाद्धंसः पुंवतंसः स संसदः ॥ २७८ ॥

अन्वयः—इति उदीर्य महावीर्यः, दूरदेशधीः, सः पुंवतंसः प्रावृषि अंबुजात् हंसः इव संसदः प्रस्थितः. ॥ २७८ ॥

अर्थः—एम कहीने महापराक्रमी, तथा दूर परदेशमां (जवानी छे) बुद्धि जेनी एवो ते महान् पुरुष, वर्षाकाळमां कमळमांथी जेम

हस, तेम राजसभामांथी चालतो थयो. ॥ २७८ ॥

कृपायाः परमप्राणः परत्राणाय शुद्धधीः । योऽस्माकं हृदयाधारः स कुमारः क्व गच्छति ॥ २७९ ॥

पराभूतान्परैः पाति यो मातेव पितेव नः । जगतां जीविताधारः स कुमारः क्व गच्छति ॥२८०॥

जगन्त्यपि विजानाति यः स्वस्येव कुटुम्बकम् । पवित्रचरितोदारः स कुमारः क्व गच्छति ॥ २८१ ॥

शरीरं जीवितेनेव येनैकेन चकास्ति पूः । कृताखिलपरीहारः स कुमारः क्व गच्छति ॥ २८२ ॥

इत्याक्रन्दपरैर्मन्ददृग्भिरुत्खातचेतनैः । पौरैः प्रेक्षितसंचारः कुमारो निर्ययौ पुरात् ॥ २८३ ॥

अन्वयः—कृपायाः परम प्राणः, पर त्राणाय शुद्धधीः, यः अस्माकं हृदय आधारः, सः कुमारः क्व गच्छति ? ॥२७९ ॥ परैः पराभूतान् नः यः माता इव पिता इव पाति, जगतां जीवित आधारः सः कुमारः क्व गच्छति ? ॥ २८० ॥ जगंति अपि यः स्वस्य कुटुंबकं इव विजानाति, पवित्र चरित उदारः सः कुमारः क्व गच्छति ? ॥२८१॥ जीवितेन इव शरीरं, येन एकेन पूः चकास्ति, कृत अखिल परीहारः सः कुमारः क्व गच्छति ? ॥ २८२ ॥ इति आक्रंद परैः, मंद दृग्भिः, उत्खात चेतनैः पौरैः प्रेक्षित संचारः कुमारः पुरात् निर्ययौ. ॥ २८३ ॥ पंचभिः कुलकं ॥

अर्थः—दयाना परम प्राणसरखो, तथा परनुं रक्षण करवामां शुद्ध बुद्धिवाळो, अने जे अमारां मननो आधाररूप छे, एवो आ

कुमार क्यां जाय छे ? ॥ २७९ ॥ बीजाओथी पराभव पामेला एवा अमोने जे मातापितानीपेठे पाळे छे, तथा जे जगतना जीवननो आधारभूत छे, एवो आ कुमार क्यां जाय छे ? ॥ २८० ॥ (वळी ) जगतने पण जे पोताना कुटुंबसमान लेखे छे, तथा जेनुं आचरण पवित्र अने उदार छे, एवो आ कुमार क्यां जाय छे ? ॥ २८१ ॥ (वळी) जीवथी जेम शरीर शोभे, तेम जे एकवडे (आ) नगर शोभी रह्युं छे, एवो आ कुमार सर्व कंइं तजीने क्यां जाय छे ? ॥ २८२ ॥ एवीरीते विलाप करता, निस्तेज आंखोवाळा, तथा बेहोश थयेला नगरना लोको जेनुं परदेशगमन जोइ रहेला छे, एवो ते विश्वसेनकुमार नगरमांथी (नीकळी) चालतो थयो.

**निर्याते जीवितप्राये वीरेऽस्मिन्गुणवेश्मनि । नगर्या नागराश्चक्रुरपस्नानमिवाश्रुभिः ॥ २८४ ॥**

अन्वयः—जीवितप्राये, गुणवेश्मनि अस्मिन् वीरे नगर्याः निर्याते नागराः अश्रुभिः अपस्नानं इव चक्रुः. ॥ २८४ ॥

अर्थः—जीव सरखो, तथा गुणोना स्थान सरखो, एवो आ महाशूरवीर कुमार नगरनी बहार निकळी जवाथी नागरिकोए आंसुओवडे जाणे सूतक स्नान कर्युं. ॥ २८४ ॥

**पौरेऽनुगन्तुकामेऽपि स्थिते क्षितिपतेर्भयात् । सुहृदस्ते महासत्त्वाश्चत्वारोऽपि तमन्वगुः ॥२८५ ॥**

अन्वयः-अनुगंतुकामे अपि क्षितिपतेः भयात् पौरे स्थिते, महासत्त्वाः ते चत्वारः अपि सुहृदः तं अन्वगुः. ॥ २८५ ॥

अर्थः—पाछळ जवानी इच्छा होवा छतां पण राजाना भयथी नागरिको त्यांज रहेते छते, महापराक्रमी एवा ते चारे मित्रो तेनी पाछळ साथेज गया. ॥ २८५ ॥

शुशुभे स स भूदेशो यं यं सोऽर्क इवागमत् । यं यं मुमोच स श्रीमान्स स निःश्रीकतां गतः ॥२८६॥

अन्वयः—अर्कः इव सः यं यं अगमत्, सः सः भूदेशः शुशुभे, यं यं सः श्रीमान् मुमोच, सः सः निःश्रीकतां गतः. ।२८६।

अर्थः—सूर्यनीपेठे ते विश्वसेन कुमार जे जे देशमां गयो, ते ते पृथ्वीप्रदेश शोभवा लाग्यो, तथा जे जे देशने ते तेजस्वी कुमार छोडतो गयो, ते ते देश निस्तेज थयो. ॥ २८६ ॥

विलङ्घ्य पञ्चभिः कंचिद्वनदेशं दिनैरसौ । क्वचिद्ग्रामे गतस्तस्थौ सरस्तीरे तरोस्तले ॥ २८७ ॥

अन्वयः—असौ पंचभिः दिनैः कंचित् वनदेशं विलंघ्य क्वचित् ग्रामे गतः सरस्तीरे तरोः तले तस्थौ. ॥ २८७ ॥

अर्थः—(ए रीते) आ राजकुमार पांच दिवसे केटलोक वनप्रदेश ओळंगीने कोइक गामपासे पहोंच्यो, (अने त्यां) तळावने किनारे वृक्षतले बेठो. ॥ २८७ ॥

तत्र क्षत्रवणिक्पुत्रौ शूरवीरौ वरत्वरौ । ग्रामगर्भात्किमप्यन्नं समादाय समागतौ ॥ २८८ ॥

अन्वयः—तत्र वरत्वरौ क्षत्रवणिक्पुत्रौ शूरवीरौ ग्रामगर्भात् किं अपि अन्नं समादाय समागतौ. ॥२८८ ॥

अर्थः—त्यां उतावळी चालवाळा क्षत्री तथा वणिकना शूर अने वीरनामना पुत्रो गामनी अंदरथी कंइंक अनाज लेइ आव्या.

तौ तु मन्त्रिभिषक्पुत्रौ कलासारजयौ रयात् । कारयांचक्रतुर्विश्वसेनं देवार्चनक्रियाम् ॥ २८९ ॥

अन्वयः—तु तौ कलासार जयौ मंत्रि भिषक् पुत्रौ रयात् विश्वसेनं देवअर्चनक्रियां कारयां चक्रतुः. ॥ २८९ ॥

अर्थः—वळी ते कलासार तथा जयनामना मंत्रि तथा वैद्यना पुत्रोए तुरत ते विश्वसेनकुमारने देवपूजननी क्रिया करावी. ।२८९।

**अथ सोऽतिथये पश्यन्दिशो मासोपवासिनम् । मुनिमैक्षिष्ट धन्यानां फलन्त्याशु मनोरथाः ॥ २९० ॥**

अन्वयः—अथ सः अतिथये दिशः पश्यन् मासोपवासिनं मुनिं ऐक्षिष्ट, धन्यानां मनोरथाः आशु फलंति. ॥ २९० ॥

अर्थः—पछी ते विश्वसेनकुमारे (कोइ) अतिथिनी (शोधमाटे) दिशाओतरफ जोतांथकां एकमासना उपवासी एवा (कोइक) मुनिराजने जोया. भाग्यवानोना मनोरथो तुरत फळे छे. ॥ २९० ॥

**ततः स्वच्छन्द्चतुरः पप्रच्छ चतुरः सखीन् । कुमारः पारणाहेतोरन्नं दातुमना मुनौ ॥ २९१ ॥**

अन्वयः—ततः स्वच्छंद्चतुरः कुमारः पारणाहेतोः मुनौ अन्नं दातुमनाः चतुरः सखीन् पप्रच्छ. ॥ २९१ ॥

अर्थः—पछी स्वभावथीज चतुर एवा ते विश्वसेनकुमारे पारणामाटे ( ते ) मुनिराजने आहार आपवानी इच्छाथी (पोताना) ते चारे मित्रोने पूछयुं. ॥ २९१ ॥

**क्षुधान्धैः सखिदाक्षिण्यमायाभावनया ततः । उक्तं वणिग्भिषग्मन्त्रिनन्दनैर्दीयतामिति ॥ २९२ ॥**

अन्वयः—ततः क्षुधांधैः वणिक् भिषक्, मंत्रिनंदनैः सखि दाक्षिण्य मायाभावनया दीयतां इति उक्तं. ॥ २९२ ॥

अर्थः—त्यारे क्षुधातुर एवा (ते) वणिक्, वैद्य तथा मंत्रीना पुत्रोए मित्रनी दाक्षिणताथी तथा कपटयुक्त भावनाथी "भले आपो"

एम कह्युं. ॥ २९२ ॥

शूरस्तूत्साहवान्प्राह मन्ये धन्येतरैर्नरैः । पात्रमत्र क्षणे नेदृग्दृश्यं द्राग्दीयतामिति ॥ २९३ ॥

अन्वयः-शूरः तु उत्साहवान् प्राह, मन्ये, अत्र क्षणे धन्य इतरैः नरैः ईदृग् पात्रं न दृश्यं, इति द्राग् दीयतां ? ॥ २९३ ॥

अर्थः-परंतु शूरे तो आनंदित थइ कह्युं के, (हुं तो) एम मानुं छुं के, आवे वखते निर्भागी पुरुषोने (तो) आवुं सुपात्र मळे नही, माटे तमो तुरत आपो ? ॥ २९३ ॥

अथाभ्युत्थाय भूनाथसूनुनाभ्यर्थितो मुनिः । दक्षो निर्दूषणं जानन्नन्नमादातुमुद्यतः ॥ २९४ ॥

अन्वयः—अथ अभ्युत्थाय भूनाथसूनुना अभ्यर्थितः दक्षः मुनिः अन्नं निर्दूषणं जानन् आदातुं उद्यतः. ॥ २९४ ॥

अर्थः—पछी उठीने ते राजकुमारे विनंति करवाथी (ते) चतुर मुनि आहारने दोषरहित जाणी लेवाने तैयार थया. ॥ २९४ ॥

आनन्दार्णवकल्लोलशीकरायितदृक्पथाः । कुमारेशः समारेभे तस्मै दातुमनातुरः ॥ २९५ ॥

अन्वयः—आनंद अर्णव कल्लोल शीकरायित दृक्पथाः, अनातुरः कुमारेशः तस्मै दातुं समारेभे. ॥ २९५ ॥

अर्थः-आनंदरूपी समुद्रना मोजांओथी अश्रुबिंदुयुक्त थयेल छे दृष्टिमार्ग जेनो, तथा उदार मनवाळो ते कुमारेन्द्र ( पण मुनिने आहार ) देवा लाग्यो. ॥ २९५ ॥

दत्ते भोज्यार्धमात्रेऽथ सूरः साकूतमभ्यधात् । कुमार त्वं कृपाधारः क्षुधातापिषु नापरः ॥ २९६ ॥

अन्वयः-अथ भोज्य अर्धमात्रे दत्ते सूरः साकूतं अभ्यधात्, (हे) कुमार! क्षुधातापिषु त्वं कृपाधारः, अपरः न. ॥ २९६ ॥

अर्थः-पछी ज्यां फक्त हजु अर्धु भोजन अपायुं, त्यांज सूर ( पोताना जरा संकुचित ) आशय मुजब बोल्यो के, हे कुमार! क्षुधातुरो प्रते जेवो तुं दयालु छो, ( एवो ) बीजो कोइ नथी. ॥ २९६ ॥

विज्ञाय तदभिप्रायमपि साधौ निषेधति । कुमारः पुरुषाहारमानमन्नमदान्मुदा ॥ २९७ ॥

अन्वयः-तत् अभिप्रायं विज्ञाय साधौ निषेधति अपि कुमारः पुरुषाहारमानं अन्नं मुदा अदात् ॥ २९७ ॥

अर्थः-ते सूरना मननो आशय जाणीने मुनिए निवार्यां छतां पण ते विश्वसेन कुमारे एक पुरुष भोजन करी शके तेटलो आहार हर्षथी ( ते मुनिने ) आप्यो. ॥ २९७ ॥

वलमानस्य निःसङ्गपतेरङ्गमथैक्षत । कुमारः पश्चिमं स्फारदद्रुमण्डलमण्डलम् ॥ २९८ ॥

अन्वयः-अथ वलमानस्य निःसंगपतेः पश्चिमं अंगं स्फारदद्रु मंडल मंडलं कुमारः ऐक्षत. ॥ २९८ ॥

अर्थः-पछी (त्यांथी पाछा) वळता एवा ते मुनिराजनुं पाछळनुं शरीर ( पीठनो भाग ) दादरना चक्रोना समूहथी भरेलुं ते कुमारे जोयुं. ॥ २९८ ॥

समं स मित्रैर्भूजानिजानिर्जनितभोजनः । जयमुत्साहयन्साधुचिकित्सात्युत्सुकोऽभवत् ॥ २९९ ॥

अन्वयः-मित्रैः समं जनित भोजनः सः भूजानि जानिः जयं उत्साहयन् साधुचिकित्सा अति उत्सुकः अभवत्. ॥ २९९ ॥

अर्थः-(पछी) मित्रोसाथे भोजन कर्याबाद ते राजकुमार (ते) जयनामना (वैद्यपुत्रने) उत्साहवाळो करतोथको ते मुनिराजनी दा-दरनुं औषध करवामाटे अत्यंत उत्सुक थयो. ॥ २९९ ॥

विश्वसेनकलासारौ शुश्रूषां चक्रतुर्यतेः । असज्जयज्जयः शूरवीरानीता महौषधीः ॥ ३०० ॥

अन्वयः—विश्वसेन कलासारौ यतेः शुश्रूषां चक्रतुः, जयः शूरवीर आनीताः महौषधीः असज्जयत् . ॥ ३०० ॥

अर्थः-(पछी) विश्वसेनकुमार तथा कलासार ते मुनिराजनी शुश्रूषा करवा लाग्या, अने शूर तथा वीरे लावी आपेली उमदी औ-षधीओने जये तैयार करी ॥ ३०० ॥

इति क्रमेण निःक्रान्तरुजि संक्रान्तकान्तते । मुनौ संमदविश्रान्ते तमिस्रान्तेऽचलन्नमी ॥ ३०१ ॥

अन्वयः-इति क्रमेण मुनौ निःक्रांत रुजि, संक्रांत कांतते, संमद विश्रांते अमी तमिस्रा अंते अचलन् . ॥ ३०१ ॥

अर्थः-एवीरीते अनुक्रमे ते मुनिराज रोग निकळी जवाथी तेजस्वी शरीरवाळा तथा आनंदथी शांत थयाबाद ते सर्व मित्रो रा-त्रिने अंते ( त्यांथी ) चाली निकळ्या. ॥ ३०१ ॥

क्रमयामिकतावश्यवयस्यगणमध्यगः । क्षपायां विपिने क्वापि सुष्वाप क्ष्मापनन्दनः ॥ ३०२ ॥

अन्वयः—क्रम यामिकता वश्य वयस्य गण मध्यगः क्ष्मापनंदनः क्षपायां विपिने क्व अपि सुष्वाप. ॥ ३०२ ॥

अर्थः—अनुक्रमे चोकी करवामां सावधान एवा मित्रोना समूहनी अंदर रहेलो ते राजकुमार रात्रिए वननी अंदर क्यांक निद्रावश थयो. ॥ ३०२ ॥

तृतीययामिनीयामयामिके जयनामनि । प्रमादतः प्रसुप्तेऽत्र दैवाद्दावानलोऽज्वलत् ॥ ३०३ ॥

अन्वयः—तृतीय यामिनी याम यामिके जयनामनि प्रमादतः सुप्ते दैवात् अत्र दावानलः अज्वलत् ॥ ३०३ ॥

अर्थः–रात्रिना त्रीजा पोहोरनो चोकीदार जय नामनो मित्र प्रमादने लीधे निद्रावश थतां, दैवयोगे त्यां दावानल प्रगटी निकळ्यो

कुमारो द्राग्जजागार स्फुटद्वेणुघटास्वनैः । प्रमादसुप्तस्तत्त्वज्ञो लोकशोकरवैरिव ॥ ३०४ ॥

अन्वयः—प्रमादसुप्तः तत्त्वज्ञः लोकशोकरवैः इव, स्फुटत् वेणु घटा स्वनैः कुमारः द्राग् जजागार. ॥ ३०४ ॥

अर्थः—( एवामां ) प्रमादमां पडेलो तत्वज्ञानी मनुष्य लोकोना शोकातुर ( विलापना ) शब्दोवडे जेम ( जागृत थाय ) तेम फाटता वांसोना समूहना शब्दोवडे ते राजकुमार तुरत जागी उठ्यो. ॥३०४॥

यावत्पश्यत्ययं तावद्दावानलशिखावलिः । नृत्यतीव वनं प्राज्ययोजनं प्राप्य भोजनम् ॥ ३०५ ॥

अन्वयः-यावत् अयं पश्यति, तावत् दावानल शिखा आवलिः भाज्ययोजनं भोजनं वन प्राप्य नृत्यति इव ३०५ ॥
अर्थः-जेटलामां ते नजर करे छे, तेटलामां ( तो ) ते दावानलनी ज्वालाओनी श्रेणि घृतयुक्त ( पक्षे-जोजनना विस्तारवाळुं ) भोजन सरखुं ते वन मळवाथी जाणे नाचती होय नही ! ( तेम देखावा लागी ) ॥ ३०५ ॥

**उत्थाप्य सुहृदो यावत्करोत्येष पलायनम् । तावद्बभार निर्द्वारप्राकाराकारतां द्वः ॥ ३०६ ॥**

अन्वयः-यावत् सुहृदः उत्थाप्य एषः पलायनं करोति, तावत् दवः निर्द्वार प्राकार आकारतां बभार. ॥ ३०६ ॥
अर्थः-(पछी) जेवामां मित्रोने उठाडीने ते नाशवानुं करे छे, एवामां ते दावानले दरवाजा विनाना किल्लाना आकारने धारण कर्यो ( अर्थात् तेओने तेमांथी निकळवानो मार्ग रह्यो नही. ) ॥ ३०६ ॥

**स निर्जिगमिषुर्दावात्किं तु निर्गन्तुमक्षमः । संभ्रमी बम्भ्रमीति स्म मिथ्यादृष्टिर्भवादिव ॥ ३०७ ॥**

अन्वयः-भवात् मिथ्यादृष्टिः इव, दावात् निजगमिषुः, किंतु निर्गंतुं अक्षमः सः इति संभ्रमी बंभ्रमीति स्म. ॥ ३०७ ॥
अर्थः—संसारमांथी मिथ्यादृष्टि जेम ( निकळवानी इच्छा करे ) तेम ते दावानलमांथी ( बहार ) निकळवाने इच्छतो, परंतु निकळवाने अशक्त एवो ते विश्वसेनकुमार ए रीते गभराटनो मार्यो भमवा लाग्यो. ॥ ३०७ ॥

**अतल्पाः स विपत्कल्पाः क्षिपन्कीला द्वानलः । धूमैस्तमान्धयन्मोह इवाभव्यं कदाग्रहैः ॥ ३०८ ॥**

अन्वयः–मोहः कदाग्रहैः अभव्यं इव, विपत्कल्पाः अनल्पाः कीलाः क्षिपन् दवानलः धूमैः तं आंधयत्. ॥ ३०८ ॥

अर्थः–मोह दुराग्रहोथी जेम अभव्य प्राणीने ( आंधळो करे ) तेम आपदो सरखी अनेक ज्वालाओने फेलावतो ते दावानल धुंवाडाथी ते राजकुमारने आंधळो करवा लाग्यो. ॥ ३०८ ॥

**कामं संकटयामास कृशानुस्तं क्रमान्मिलन् । परितः सरितः पूर इव द्वीपासिनं जनम् ॥ ३०९ ॥**

अन्वयः–सरितः पुरः द्वीपासिनं जनं इव, क्रमात् परितः मिलन् कृशानुः तं कामं संकटयामास. ॥ ३०९ ॥

अर्थः—नदीमां आवेलुं पूर ( तेनी वच्चे रहेला ) बेटपर बेठेला माणसने जेम (संकडामणमां नाखे) तेम अनुक्रमे चोतरफथी एकठो थइने घेरातो एवो ते दावानल ते राजकुमारने बहुज संकटमां नाखवा लाग्यो. ॥ ३०९ ॥

**यत्र यत्र जगामायं वयस्यास्तत्र तत्र ते । अन्वगुस्तं शुभात्मानं पुरुषार्थोदया इव ॥ ३१० ॥**

अन्वयः–अयं यत्र यत्र जगाम, तत्र तत्र ते वयस्याः पुरुषार्थ उदयाः इव तं शुभात्मानं अन्वगुः. ॥ ३१० ॥

अर्थः–(पछी) आ राजकुमार ज्यां ज्यां जवा लाग्यो, त्यां त्यां (तेना) ते मित्रो, (धर्मआदिक ) चारे पुरुषार्थोना उदयनी पेठे ते धर्मात्मानी पाछळ पाछळ जवा लाग्या. ॥ ३१० ॥

**ताप्व्यापदि संभ्राम्यन्स बभावात्मपञ्चमः । अक्षग्राम इवोद्दामव्यथाया विपिनश्रियः ॥ ३११ ॥**

अन्वयः-आत्मपंचमः ताप व्यापदि संभ्राम्यन् उद्दामव्यथायाः विपिनश्रियः अक्षग्रामः इव बभौ. ॥ ३११ ॥

अर्थः—पोतासहित पांचमो एवो ते राजकुमार तापनी व्यथाथी भमतोथको अत्यंत वेदना पामती एवी वनलक्ष्मीना इंद्रियसमूहनी पेठे शोभवा लाग्यो. ॥ ३११ ॥

चेलान्तं चिहुरान्तं च गृह्णन्कीलाग्रपाणिना । मुहुराच्छोटितो वह्निस्त्रसद्भिस्तैश्चपेटया ॥ ३१२ ॥

अन्वयः—चेलांतं च चिहुरांतं कीला अग्र पाणिना गृहान् वह्निः त्रसद्भिः तैः मुहुः चपेटया आच्छोटितः ॥ ३१२ ॥

अर्थः—वस्त्रोना तथा केशोना छेडाओने ज्वालाओना अग्रभागरूपी हाथथी ग्रहण करता एवा ते अग्निने त्रास पामता एवा तेओ वारंवार थापड मारी खसेडवा लाग्या. ॥ ३१२ ॥

अगम्येषु प्रदेशेषु सर्वेष्वेकप्रदेशगान् । नृमांसस्वादलोभीव दावस्ताञ्जिह्वयालिहत् ॥ ३१३ ॥

अन्वयः-सर्वेषु प्रदेशेषु अगम्येषु एकप्रदेशगान् तान् दावः नृमांसस्वादलोभी इव जिह्वया अलिहत् ॥ ३१३ ॥

अर्थः--सघळा प्रदेशो गमन करवा माटे बंध थवाथी एकज प्रदेशमां एकठा थयेला एवा तेओने, ते दावानळ, मनुष्यनुं मांस चाखवाने जाणे लालचु थयो होय नही ! तेम ( पोतानी ) ज्वालारूपी जीभथी चाटवा लाग्यो. ॥ ३१३ ॥

तैंषां कीलाग्रचकितैः संकुचद्भिः समन्ततः । अङ्गैरङ्गेष्विव तदा प्रवेष्टुमुपचक्रमे ॥ ३१४ ॥

अन्वयः—तदा समंततः कीलाग्रचकितैः, संकुचद्भिः तेषां अंगैः अंगेषु प्रवेष्टुं इव उपचक्रमे. ॥ ३१४ ॥

अर्थः–ते वखते चोतरफथी (नजीक आवती) ज्वालाओथी डर पामेलां, अने तेथी संकोचातां एवां तेओनां अंगो, जाणे अंगोमां पेसी जतां होय नही! तेम जणावा लाग्यां. ॥ ३१४ ॥

**रुद्धायां जीविताशायामाशाभिः सह वह्निना । क्षणेऽत्र सुहृदः स्माह महीदयितनन्दनः ॥ ३१५ ॥**

अन्वयः–वह्निना आशाभिः सह जीविताशायां रुद्धायां, अत्र क्षणे महीदयितनंदनः सुहृदः स्माह. ॥ ३१५ ॥

अर्थः–एवीरीते अग्निवडे (बीजी) आशोओनी (दिशाओनी) साथे जीववानी आशा (पण) नष्ट थये छते, ते वखते ते विश्वसेन राजकुमार (पोताना) मित्रोने कहेवा लाग्यो के, ॥ ३१५ ॥

**आकृष्ये मरुतेवाहमाकाशं प्रति संप्रति । आलिङ्गत मदङ्गं तन्मा मृत्यौ विरहोऽस्तु नः ॥ ३१६ ॥**

अन्वयः—संप्रति अहं मरुता इव आकाशं प्रति आकृष्ये, तत् मदंगं आलिंगत? मृत्यौ नः विरहः मा अस्तु. ॥ ३१६ ॥

अर्थः—हमणा हुं जाणे पवनवडे आकाशमां खेंचाउं छुं, माटे तमो मारां शरीरने वळगी रहो? मृत्युसमये पण आपणा वच्चे विरह पडवो न जोइये ॥ ३१६ ॥

**अथ लग्नौ दृढं वीरजयौ पदसरोजयोः । कुमारस्य कलासारशूरौ तु करपद्मयोः ॥ ३१७ ॥**

अन्वयः-अथ वीर जयौ कुमारस्य पदसरोजयोः दृढं लग्नौ, कलासार शूरौ तु करपद्मयोः ॥ ३१७ ॥

अर्थः-पछी वीरे अने जये ते विश्वसेनकुमारना चरणकमलोने जोरथी पकड्या, तथा कलासारे अने शूरे तेना हस्तकमलोने पकड्या

अमी समीरसंवर्तहृता इव चमत्कृताः । आत्तमुक्ता इव दवज्वालाभिः खमथागमन् ॥ ३१८ ॥

अन्वयः—अथ समीर संवर्त हृताः इव दवज्वालाभिः आत्तमुक्ताः इव चमत्कृताः अमी खं अगमन् ॥ ३१८ ॥

अर्थः—पछी जाणे वायुना वंटोळीआए अधर उपाड्या होय नही तथा दावानळनी ज्वाळाओए जाणे झपाटमां लेइ छोडी दीधा होय नही! तेम तेओ आकाशमां गमन करवा लाग्या. ॥ ३१८ ॥

तापातुरस्फुरज्जन्तुपटलं ज्वलनं ततः । तेऽपश्यन्पुरुषोत्तंसाः संसारमिव योगिनः ॥ ३१९ ॥

अन्वयः-ततः ते पुरुषोत्तंसाः योगिनः संसारं इव तापातुर स्फुरत् जंतु पटलं ज्वलनं अपश्यन् ॥ ३१९ ॥

अर्थः—पछी ते उत्तम पुरुषो, योगीओ जेम संसारने, तेम तापथी पीडाइने तरफडता छे प्राणीओना समूहो जेमां, एवा ते अग्निने जोवा लाग्या ॥ ३१९ ॥

अथो दवद्वीयस्यां ते वयस्याः क्षितौ स्थितम् । स्वप्नोत्थितमिवात्मानं कलयन्ति स्म विस्मिताः ॥ ३२० ॥

अन्वयः—अथो ते वयस्याः विस्मिताः स्वप्नोत्थितं इव आत्मानं दवद्वीयस्यां क्षितौ स्थितं कलयंतिस्म. ॥ ३२० ॥

अर्थः—पछी ते मित्रो आश्चर्य पामताथका जाणे स्वप्नमांथी जागृत थया होय नही ! तेम पोताने (ते) दावानलथी दूर रहेली जमीन पर रहेला जोवा लाग्या. ॥ ३२० ॥

**यावत्किमिदमित्यन्तश्चिन्तां विरचयन्ति ते। तावदाविरभूत्कोऽपि पुरः श्रीभासुरः सुरः ॥ ३२१ ॥**

अन्वयः—इदं किं ? इति यावत् ते अंतः चिंतां विरचयंति, तावत् श्रीभासुरः कः अपि सुरः पुरः आविरभूत्. ॥ ३२१ ॥

अर्थः-आ ते शुं थयुं ? एम जेटलामां तेओ (पोतना) हृदयमां विचारे छे, तेवामां शोभाथी देदीप्यमान एवो कोइक देव (तेओनी) आगळ प्रगट थयो. ॥ ३२१ ॥

**कमलाभमुखोन्मीलत्कलहंसकलस्वरः। स जगौ जगतीजानितनयं विनयान्वितः ॥ ३२२ ॥**

अन्वयः—कमल आभ मुख उन्मीलत् कलहंस कलस्वरः सः विनयान्वितः जगती जानि तनयं जगौ. ॥ ३२२ ॥

अर्थः—कमलसरखा मुखमांथी निकळतो छे राजहंससरखो स्वर जेनो, एवो ते देव विनयसहित राजपुत्रने कहेवा लाग्यो के,—

**शिक्षयित्वा त्वयामोचि चौरः कारुण्यगौर यः। सोऽहं सद्धर्मनिर्माणादीदृशीं श्रियमश्रयम् ॥ ३२३ ॥**

अन्वयः—(हे) कारुण्यगौर ! यः चौरः शिक्षयित्वा त्वया अमोचि, सः अहं सद्धर्म निर्माणात् ईदृशीं श्रियं अश्रयं ॥ ३२३ ॥

अर्थः—हे दयाथी उज्जवल एवा राजकुमार ! जे चोरने शिखामण आपीने तें छोडाव्यो हतो, ते हुं उत्तम धर्मकार्यो करवाथी आवी समृद्धि पाम्यो छुं. ॥ ३२३ ॥

विपन्निपतितं मत्वा तत्त्वामवधिनाधुना । प्राप्तोऽस्मि प्राणदानेन क्रीतानां समयो ह्ययम् ॥ ३२४ ॥

अन्वयः—तत् अवधिना अधुना त्वां विपत् निपतितं मत्वा प्राप्तः अस्मि, हि प्राणदानेन क्रीतानां अयं समयः. ॥ ३२४ ॥

अर्थः—माटे अवधिज्ञानथी हमणा तने आपदामां पडेलो जाणीने हुं ( अहीं ) आव्यो छुं, केमके प्राणसाटे वेचाण थयेलाओनो आ अवसर छे. ॥ ३२४ ॥

एवमुक्त्वा समित्रस्य वपुर्नृपतिजन्मनः । स चकार करस्पर्शादतापं दलितश्रमम् ॥ ३२५ ॥

अन्वयः—एवं उक्त्वा सः समित्रस्य नृपति जन्मनः वपुः करस्पर्शात् अतापं दलितश्रमं चकार. ॥ ३२५ ॥

अर्थः—एम कहीने ते देवे मित्रसहित ते राजकुमारनुं शरीर (पोताना) हाथना स्पर्शथी तापरहित तथा थाकविनानुं कर्युं. ॥३२५

नाद्य प्रभृति दुःखस्य लवोऽपि भविता तव । इत्युदित्वा स विद्योतैर्द्योतयन्द्यां तिरोदधे ॥ ३२६ ॥

अन्वयः—अद्य प्रभृति तव दुःखस्य लवः अपि न भविता, इति उदित्वा विद्योतैः द्यां द्योतयन् सः तिरोदधे. ॥ ३२६ ॥

अर्थः—आजथी मांडीने तने दुःखनो लेशमात्र पण नही थाय, एम कही तेजवडे आकाशने दीपावतोथको ते देव त्यांथी अदृश्य थयो. ॥ ३२६ ॥

तेऽपि तोयरुहभ्रान्तभृङ्गीगीतेऽरुणोदये । कान्तारान्ताय संचेलुस्तच्चरित्रार्द्रचेतसः ॥ ३२७ ॥

अन्वयः-तोयरुह भ्रांत भृंगी गीते अरुणोदये तत् चरित्र आर्द्रचेतसः तेऽपि कांतार अंताय संचेलुः. ॥ ३२७ ॥

अर्थः—(पछी) कमलोनी आसपास भमता भमराओए जणावेला अरुणोदय वखते, ते देवनां वृत्तांतथी दयाळु थयेल हृदयवाळा ते त्रणे मित्रो पण वननो पार पामवामाटे (त्यांथी) चालवा लाग्या. ॥ ३२७ ॥

तारे तरणितारुण्ये कारुण्येन व्यलोकि तैः । आपतद्विपिनक्रोडे क्रोडानामाकुलं कुलम् ॥ ३२८ ॥

अन्वयः-तारे तरणि तारुण्ये कारुण्येन तैः विपिनक्रोडे आपतत् क्रोडानां आकुलं कुलं व्यलोकि. ॥ ३२८ ॥

अर्थः—सारीपेठे सूर्योदय थइ गयाबाद दयाळुपणे तेओए वननी अंदर दोडी आवतुं एवुं डुक्करोनुं गभरायेलुं टोळुं जोयुं. ।३२८।

युद्धाय धावता यूथं पश्यता नश्यता मुहूः । खेदितं मेदुरेणाथ प्रोथिनाथेन केनचित् ॥ ३२९ ॥

कंचिदञ्चितकोदण्डमुद्दण्डहयमण्डनम् । उत्किरीटं नरं प्रेक्ष्य कुमारस्तारगीर्जगौ ॥ ३३० ॥ युग्मं ॥

अन्वयः-अथ युद्धाय धावता, यूथं मुहुः पश्यता, नश्यता, केनचित् मेदुरेण प्रोथिनाथेन खेदितं, ॥ ३२९ ॥ अंचितकोदंडं, उद्दंडहयमंडनं, उत्किरीटं कंचित् नरं प्रेक्ष्य तारगीः कुमारः जगौ. ॥ ३३० ॥ युग्मं ॥

अर्थः-पछी लडवामाटे दोडता, (पोताना) टोळांतरफ वारंवार जोता, अने नाशता एवा कोइक पुष्ट डुक्करपतिना (हल्लाथी) थाकी गयेला, ॥ ३२९ ॥ खेंचेलां धनुष्वाळा, प्रचंड घोडापर स्वार थयेला, अने मस्तकपर मुकुटवाळा कोइक पुरुषने जोइ ते विश्वसेन कुमार म्होटा स्वरथी बोल्यो के, ॥ ३३० ॥ युग्मं ॥

त्वमीशोऽसि महाभाग महीभागस्य कस्यचित् । अङ्ग त्वदङ्गलक्ष्याणि लक्षणानि वदन्त्यदः ॥ ३३१ ॥

अन्वयः—(हे) महाभाग ! त्वं कस्यचित् महीभागस्य ईशः असि, अंग त्वदंग लक्ष्याणि लक्षणानि अदः वदंति. ॥ ३३१ ॥

अर्थः-(हे) महाभाग्यशाली ! तुं कोइक देशनो राजा जणाय छे. केमके तारां शरीरपर देखातां चिह्नो ते हकीकत जाहेर करे छे.

राज्ञां द्विषोऽप्यवध्यास्ते ये दधुस्तृणमानने । नृहंस हन्सि तज्जन्तून्निर्मन्तून्किं तृणाननान् ॥ ३३२ ॥

अन्वयः-ये आनने तृणं दधुः, ते द्विषः अपि राज्ञां अवध्याः, तत् (हे) नृहंस ! तृणाननान् निर्मंतून् जंतून् किं हंसि ? ॥३३२॥

अर्थः-जेओ मुखमां तृण धारण करे छे, एवा शत्रुओने पण राजा मारता नथी, माटे हे उत्तम पुरुष ! मुखमां तृण धारण करनारा (आ) निरपराधी प्राणीओने तमो केम मारो छो ? ॥ ३३२ ॥

अकृताङ्गपरिष्कारा: सदाचारा वनौकसः । मुनीन्द्रा इव विद्राव्याः पशवो न विवेकिना ॥ ३३३ ॥

अन्वयः—अकृत अंगपरिष्काराः, सदाचाराः, वनौकसः मुनींद्राः इव पशवः विवेकिना न विद्राव्याः. ॥ ३३३ ॥

अर्थः-शरीरसंबंधि संस्कार नही करनारा, उत्तम आचारवाळा, (अथवा हमेशां विहार करनारा) अने वनमां निवास करनारा, एवा महामुनिओसरखा पशुओने विवेकीमाणसोए हेरान करवा न जोइये. ॥ ३३३ ॥

हन्ति जन्तुः पुरा हन्तृनेभिरग्रे स्व हन्यते । तद्रक्ष्यरक्षया दक्षः स्वैरं स्याद्वैरपारगः ॥ ३३४ ॥

अन्वयः-जंतुः पुरा हंन् हंतइति, च अग्रे एभिः हन्यते, तत् वध्यरक्षया दक्षः स्वैरं वैरपारगः स्यात्. ॥ ३३४ ॥

अर्थः—प्राणी (पोताने) पूर्वे मारनाराओने मारे छे, तथा पाछो आगळ तेओवडे ते हणाय छे, माटे मारवा लायक प्राणीने न मारवाथी डाह्यो माणस पोतानी मेळेज वैरथी विमुक्त थाय छे. ॥ ३३४ ॥

कां योनिं न जगामायमात्मा प्रतिकुलं किल । तत्सर्वस्यापि सर्वोऽपि बन्धुर्वध्योऽस्तु कस्य कः ॥३३५॥

अन्वयः-अयं आत्मा किल प्रतिकुलं कां योनिं न जगाम ? तत् सर्वस्य अपि सर्वः अपि बंधुः, कस्य कः वध्यः अस्तु ? ३३५

अर्थः—आ जीव खरेखर दरेक जातिमां कइ योनिमां नथी गयो ? ( अर्थात् सर्वयोनिओमां प्रायें उत्पन्न थयो छे. ) माटे सर्व प्राणीओ सर्व प्राणीओना बंधु छे. कोने कोण मारवा योग्य छे ? ॥ ३३५ ॥

इति क्षत्रत्वधर्मित्वनीतिसौजन्यजन्यया । कृपया नृपकोटीर रक्ष्यतां रक्ष्यतां पशुः ॥ ३३६ ॥

अन्वयः—इति क्षत्रत्व धर्मित्व नीति सौजन्य जन्यया कृपया (हे) नृपकोटीर ! पशुः रक्ष्यतां ? रक्ष्यतां ? ॥ ३३६ ॥

अर्थः-माटे क्षत्रीयपणुं, धर्मिपणुं, नीति तथा सज्जनपणाने उत्पन्न करनारी दयावडे करीने, हे राजेंद्र ! तमो पशुओनुं रक्षण करो? रक्षण करो ? ॥ ३३६ ॥

इत्युक्तिश्रुतिहृष्टोऽयमुत्तीर्य त्वरया हयात् । लुठन्कुमारपादारविन्दयोरिदमब्रवीत् ॥ ३३७ ॥

अन्वयः—इति उक्ति श्रुति हृष्टः अयं त्वरया हयात् उत्तीर्य कुमार पाद अरविंदयोः लुठन् इदं अब्रवीत्. ॥ ३३७ ॥

अर्थः—एवीरीतना वचनो सांभळवाथी खुशी थयेलो ते माणस तुरत घोडापरथी उतरीने ते विश्वसेनकुमारना चरणोमां नमीने आ प्रमाणे बोलवा लाग्यो. ॥ ३३७ ॥

त्वत्प्रेष्यस्यापि मे जन्तुजातघातकृतागसः । त्वयि नित्यक्षमाभाजि क्षमस्वेति न भाति वाक् ॥३३८॥

अन्वयः—नित्यक्षमाभाजि त्वयि जंतु जात घात कृत आगसः त्वत्प्रेष्यस्य अपि मे, क्षमस्व इति वाक् न भाति. ॥ ३३८ ॥

अर्थः—हमेशां क्षमाने धारण करनारा एवा आपप्रते, सर्व जीवोना घातथी करेल छे अपराधो जेणे एवो, तथा आपना नोकरसरखो एवो जे हुं, तेनी " क्षमा करो ! " एवी वाणी पण शोभाने पात्र नथी. ॥ ३३८ ॥

अथवाहं तवालोकविगलद्वृजिनव्रजः । न किंचित्क्षमये साक्षान्नीरुजां किमु जायुभिः ॥ ३३९ ॥

अन्वयः—अथवा तवालोक विगलत् वृजिनव्रजः अहं किंचित् न क्षमये, साक्षात् नीरुजां जायुभिः किमु ? ॥ ३३९ ॥

अर्थः—अथवा आपना फक्त दर्शनमात्रथीज नष्ट थयेल छे पापोनो समूह जेनो, एवो हुं (हवे) कंइ पण क्षमा मागतो नथी, केमके साक्षात् निरोगी थयेलाओने औषधनी शी जरुर छे ? ॥ ३३९ ॥

कुमार नृपतिद्वारि बद्धस्य लुठतः क्षितौ । तदा प्राणप्रदानेन त्वया मे जनकायितम् ॥ ३४० ॥

अन्वयः—(हे) कुमार ! तदा नृपतिद्वारि बद्धस्य क्षितौ लुठतः मे प्राणदानेन त्वया जनकायितं. ॥ ३४० ॥

अर्थः—हे राजकुमार ! ते वखते राजमहेलना दरवाजा पासे बांधेला तथा ( ए हालतमां ) जमीनपर लोटता एवा मने आप

जीवितदान आपी मारा पितातुल्य थया छो. ॥ ३४० ॥

ताम्रलिप्त्यां पुरि स्वाम्यं ततः स्वामिन्नुरीकुरु । इहैश्वर्यं न मे युक्तं पितरीव त्वयि स्थिते ॥३४१॥

अन्वयः–ततः स्वामिन्! ताम्रलिप्त्यां पुरि स्वाम्यं अंगीकुरु? इह पितरि इव त्वयि स्थिते मे ऐश्वर्यं युक्तं न. ॥ ३४१ ॥

अर्थः–तेथी (हे) स्वामी! (आ) ताम्रलिप्तीनगरीनुं राज्य (आप) स्वीकारो? केमके अहीं (मारा) पिता समान एवा आपनी हाजरी होते छते मारे राज्य करवुं उचित नही. ॥ ३४१ ॥

अथामुं ताम्रलिप्तीशं जानन्भूजानिनन्दनः । उत्थाप्य प्रीतिवर्यश्रीः पर्यरब्ध प्रमोदिनम् ॥३४२॥

अन्वयः–अथ भूजानिनंदनः अमुं ताम्रलिप्ती ईशं जानन्, प्रीतिवर्यश्रीः उत्थाप्य प्रमोदिनं पर्यरब्ध. ॥ ३४२ ॥

अर्थः–पछी ते विश्वसेनराजकुमारे तेने ताम्रलिप्तिनगरीनो राजा जाणतां अत्यन्त प्रेमपूर्वक उठाडीने, खुशी थयेला एवा ते राजाने आलिंगन कर्युं. ॥ ३४२ ॥

निजदेशपरीवारपरीहारनिबन्धनम् । अथाख्यात्पृच्छते सोऽस्मै कुमारः कारणान्तरम् ॥ ३४३ ॥

अन्वयः—अथ निज देश परीवार परीहार निबंधनं पृच्छते अस्मै सः कुमारः कारणांतरं आख्यत्. ॥ ३४३ ॥

अर्थः—पछी पोतानो देश तथा परीवारने तजवानुं कारण पूछता एवा ते राजाने ते कुमारे कंइ बीजुंज कारण जणाव्युं. ॥३४३॥

अथ स्फारास्यफेनासु हयसेनासु हेषया । हसन्तीष्विव चेतांसि समेतासु त्वराभरात् ॥ ३४४ ॥

अमूढतुरगारूढं प्रौढभक्तिर्धराधिपः । कुमारं ससुहृद्वारं नगराय निनाय तम् ॥ ३४५ ॥ युग्मम् ॥

अन्वयः-अथ त्वराभरात् स्फार आस्य फेनासु, हेषया चेतांसि हसंतीषु इव हय सेनासु समेतासु ॥ ३४४ ॥ प्रौढभक्तिः धराधिपः ससुहृद्वारं अमूढ तुरग आरूढं तं कुमारं नगराय निनाय ॥ ३४५ ॥ युग्मं ॥

अर्थः-पछी अति उतावळी चालथी मुखमां आवेला घणा फीणवाळी, तथा हेषारवथी मनने पण जाणे हांसी करती, एवी घोडेस्वारोवाळी सेना आवी पहोंच्याबाद ॥ ३४४ ॥ अति भक्तिवाळो ते राजा मित्रोना समूह सहित उत्तम घोडापर बेसाडेला ते राजकुमारने (पोताना) नगरमां लेइ गयो. ॥ ३४५ ॥ युग्म ॥

हस्तपादाग्रलग्नेन भूपेन व्यक्तभक्तिना । लक्षणानां गणेनेव स राज्येऽध्यासितो बलात् ॥ ३४६ ॥

अन्वयः—लक्षणानां गणेन इव हस्त पाद अग्र लग्नेन, व्यक्त भक्तिना भूपेन सः बलात् राज्ये अध्यासितः ॥ ३४६ ॥

अर्थः—लक्षणोना समूहनी पेठे हाथ तथा पगोना अग्रभागने लागेला ( अर्थात् हाथ जोडी पगे लागेला ) अने प्रगट भक्तिवाळा एवा ते राजाए ते विश्वसेन कुमारने बलात्कारे राज्यगादीपर बेसाड्यो. ॥३४६॥

वेत्रीभूय पुरः प्रीत्या नरदेवः स्वसेवकान् । पदद्वयं कुमारस्य नमस्कारयति स्म सः ॥ ३४७ ॥

अन्वयः—सः नरदेवः प्रीत्या कुमारस्य पुरः वेत्रीभूय स्वसेवकान् पदद्वयं नमस्कारयतिस्म. ॥ ३४७ ॥

अर्थः—( पछी ) ते राजा प्रेमथी ते कुमारनी आगळ ( पोते ) छडीदार थइने पोताना नोकरोने ( तेना ) बन्ने चरणोमां नमस्कार कराववा लाग्यो. ॥ ३४७ ॥

एवं सेव्यपदो विश्वसेनस्तेन महीभुजा । धामभिस्तामसौ ताम्रलिप्तीं चिरमभूषयत् ॥ ३४८ ॥

अन्वयः—एवं तेन महीभुजा सेव्यपदः असौ विश्वसेनः धामभिः चिरं ताम्रलिप्तीम् अभूषयत् ॥ ३४८ ॥

अर्थः—एवीरीते ते राजावडे सेवायेल छे, चरणो जेना, एवो ते विश्वसेनकुमार ( पोताना ) तेजवडे घणा काळसुधी (ते) ताम्रलिप्तिनगरीने शोभाववा लाग्यो. ॥ ३४८ ॥

इत्यशेषं निशम्यास्य चरेभ्यश्चरितं नृपः । सुमित्रः पिप्रिये पुत्रपुण्यपात्रत्वनिश्चयात् ॥ ३४९ ॥

अन्वयः—इति अस्य अशेषं चरितं चरेभ्यः निशम्य सुमित्रः नृपः पुत्र पुण्य पात्रत्व निश्चयात् पिप्रिये. ॥ ३४९ ॥

अर्थः—एवी रीते आ विश्वसेनकुमारनुं सघळुं वृत्तांत गुप्तचरोमारफते सांभळीने (ते) सुमित्रराजा ( पोताना ) पुत्रना पुण्यपात्रपणाना निश्चयथी खुशी थवा लाग्यो. ॥ ३४९ ॥

यास्यता जनकेनाथ योगभोगधिया वनम् । अयमाकार्य नाकेन्द्रप्रतापः क्ष्मापतिः कृतः ॥ ३५० ॥

अन्वयः-अथ योग भोग धिया वनं यास्यता जनकेन नार्केद्र प्रतापः अयं आकार्य क्ष्मापतिः कृतः. ॥ ३५० ॥

अर्थः-पछी योग साधवानी बुद्धिथी वनमां जवाने (इच्छता) एवा (तेना) पिताये इंद्रसरखा प्रतापवाळा एवा ते विश्वसेन कुमारने बोलावीने राजा कर्यो. ॥ ३५० ॥

सुहृद्भिः सह हृद्भित्तिचित्रितान्योन्यमूर्त्तिभिः । स चकार चिरं राज्यं सुकृतैककृतोद्यमः ॥ ३५१ ॥

अन्वयः—सुकृत एक कृत उद्यमः सः हृद्भित्ति चित्रित अन्योन्य मूर्तिभिः सुहृद्भिः सह चिरं राज्यं चकार. ॥ ३५१ ॥

अर्थः--पुण्यमांज फक्त करेल छे उद्यम जेणे एवो ते विश्वसेनकुमार हृदयरूपी भींतमां चित्रेल छे (पोतानी) परस्पर छबीओ जेणे एवा ते मित्रोसहित घणा काळसुधी राज्य करवा लाग्यो. ॥ ३५१ ॥

महीभोगमहीनं ते भुक्त्वाऽऽनते सुरौकसि । जग्मुः पञ्चापि तत्रापि मैत्र्यपात्रमिमेऽभवन् ॥ ३५२ ॥

अन्वयः—ते पंच अपि अहीनं महीभोगं भुक्त्वा आनते सुरओकसि जग्मुः, तत्र अपि इमे मैत्र्यपात्रं अभवन्. ॥ ३५२ ॥

अर्थः—(पछी) ते पांचे संपूर्णपणे पृथ्वीपरना भोगो भोगवीने आनतनामना देवलोकमां गया, (तथा) त्यां पण तेओ मित्र थया.

क्रमात्समस्तमप्येते पीत्वा स्वर्गसुखामृतम् । तदर्जनधियेवोर्वीतलं पुनरवातरन् ॥ ३५३ ॥

अन्वयः-क्रमात् एते समस्तं अपि स्वर्ग सुख अमृतं पीत्वा तत् आर्जन धिया इव पुनः ऊर्वीतलं अवारतन्. ॥ ३५३ ॥

अर्थः-अनुक्रमे तेओ सघळुं स्वर्गसुखरूपी अमृत पीने, (पाछुं) जाणे ते मेळववानी बुद्धिथी होय नही ! तेम पाछा तेओ पृथ्वी-

तलवर अवतर्यो ॥ ३५३ ॥ ( तथा अनुक्रमे ते विश्वसेनकुमार मोक्षपद पाम्या. )

स जीवो विश्वसेनस्य रतिसार भवानभूत् । जीवस्तु क्षत्रपुत्रस्य सुबन्धुत्वमधारयत् ॥ ३५४ ॥

अन्वयः-(हे) रतिसार ! विश्वसेनस्य सः जीवः भवान् अभूत्, क्षत्रपुत्रस्य जीवः तु सुबंधुत्वं अधारयत्. ॥ ३५४ ॥

अर्थः-हे रतिसार ! विश्वसेनकुमारनो ते जीव तमो थया, तथा क्षत्रीयपुत्रना जीवे सुबंधुपणुं धारण कर्युं. ॥ ३५४ ॥

जयवीरकलासारजीवाः सौभाग्यमञ्जरी । प्रियंवदा सुतारा च कन्याः संजज्ञिरे पुनः ॥ ३५५ ॥

अन्वयः-पुनः जय वीर कलासार जीवाः सौभाग्यमंजरी, प्रियंवदा च सुतारा कन्याः संजज्ञिरे. ॥ ३५५ ॥

अर्थः-वली जय, वीर, तथा कलासारना जीवो (अनुक्रमे) सौभाग्यमंजरी, प्रियंवदा अने सुतारानामनी कन्याओरूपे थया.

चञ्चद्गुणप्रपञ्चानां पञ्चानामपि तेन वः । जयत्ययं पृथुस्थेमा प्रेमा प्राग्भवसंभवः ॥ ३५६ ॥

अन्वयः—तेन चंचत् गुण प्रपंचानां वः पंचानां अपि पृथुस्थेमा अयं प्राग् भव संभवः प्रेमा जयति. ॥ ३५६ ॥

अर्थः-ते हेतुथी उत्तम गुणप्रपंचवाळा एवा तमो पांचेनो अतिगाढ एवो आ पूर्वभवमां थयेलो प्रेम जयवंतो वर्ते छे. ॥ ३५६ ॥

जयाद्यैर्यन्मुनौ दानं माययानुमतं तदा । भाग्ये भोग्यस्य तुल्येऽपि स्त्रीत्वं तेषामिदं ततः ॥ ३५७ ॥

अन्वयः-तदा जय आद्यैः मुनौ दानं यत् मायया अनुमतं, ततः भोग्यस्य तुल्ये अपि भाग्ये तेषां इदं स्त्रीत्वं. ॥ ३५७ ॥

अर्थः-(वळी) ते वखते (ते) जयआदिकोए मुनिराजने अपातुं दान जे कपटभावथी अनुमोद्युं, तेथी भोगो भोगववामाटे एकसरखुं भाग्य होवाछतां पण तेओने आ स्त्रीपणुं प्राप्त थयुं. ॥ ३५७ ॥

त्रयाणां हृदयं तेषामजानन्नन्नदानकृत् । आहारस्यान्तरायेण त्रिदिनं दुःखभागभूः ॥ ३५८ ॥

अन्वयः-तेषां त्रयाणां हृदयं अजानन्, आहारस्य अंतरायेण अन्नदानकृत् ( त्वं ) त्रिदिनं दुःखभाग् अभूः. ॥ ३५८ ॥

अर्थः—ते त्रणे मित्रोना हृदयने नहीं जाणतां तें ( मुनिने ) जे अन्नदान कर्युं, तेथी आहारना अंतरायवडे त्रण दिवसोसुधी तुं दुःखी थयो. ॥ ३५८ ॥

अर्धाहारे मुनीन्द्राय दत्ते यत्ते पुरस्तदा । कुमार त्वं कृपाधारः क्षुधातापिषु नापरः ॥ ३५९ ॥

इति स्तुतिवचोभङ्ग्या क्षुधार्तं स्वं निवेदयन् । अल्पेतरान्नदानस्य निषेधं क्षत्रसूर्व्यधात् ॥ ३६० ॥

सुबन्धोरर्धभुक्तैव तेन श्रीर्मुखतश्च्युता । पक्षिणः फलवत्स्फारं विषादं ददती हृदि ॥ ३६१ ॥

अन्वयः—तदा मुनींद्राय अर्ध आहारे दत्ते यत् ते पुरः, कुमार ! क्षुधातापिषु त्वं कृपाधारः, अपरः न ॥३५९॥ इति स्तुतिवचः भंग्या स्वं क्षुधार्तं निवेदयन् क्षत्रसूः अल्पेतर अन्नदानस्य विषेधं व्यधात्, ॥ ३६० ॥ तेन हृदि स्फारं विषादं ददती सुबंधोः श्रीः पक्षिणः मुखतः फलवत् अर्धभुक्ता एव च्युता. ॥ ३६१ ॥ त्रिभिर्विशेषकं ॥

अर्थः-( वळी ) ते वखते मुनिराजने अर्ध आहार दीधाबाद जे तारी आगळ " हे कुमार ! क्षुधातुर माणसोप्रते तुंज ( एक ) दयाळु छो, बीजो नथी " ॥ ३५९ ॥ एम प्रशंसाना वचननी युक्तिथी पोताने क्षुधातुर जणावता एवा ( ते ) क्षत्रीयपुत्रे वधारे अन्न आपवानो निषेध कर्यो, ॥ ३६० ॥ तेथी हृदयमां घणो खेद उपजावती एवी ( ते ) सुबंधुनी लक्ष्मी, पक्षिना मुखमांथी फलनी पेठे अर्धीज भोगवटा बाद विनष्ट थइ, ( सरी पडी ) ॥ ३६१ ॥ त्रिभिर्विशेषकम् ॥

**यद्भवद्भिर्भवभ्रंशक्रमप्रथमसाधकम् । चक्रे विरुग्मुनेरङ्गं तद्वो रूपार्द्धिरीदृशी ॥ ३६२ ॥**

अन्वयः—भवभ्रन्श क्रम प्रथम साधकं मुनेः अंगं भवद्भिः यत् विरुग् चक्रे, तत् वः ईदृशी रूपऋद्धिः. ॥ ३६२ ॥

अर्थः—( वळी ) संसारविनाशना क्रमने प्रथम साधनारुं एवु ते मुनिराजनु शरीर तमोए जे निरोगी कर्युं, तेथी तमोने आवी (दिव्य) रूपनी समृद्धि ( प्राप्त थइ छे. ) ॥ ३६२ ॥

**त्वमपश्यः पुरा दृष्ट्या यद्दुष्टानप्यदुष्टया । त्वया कालमुखात्कृष्टा यत्प्राज्या हन्त जन्तवः ॥ ३६३ ॥**

**तत्त्वां प्रत्यधुना कोऽपि विरोधं विदधाति न । ये च किंचिद्विरुध्यन्ते दधते युधि तेऽन्धताम् ॥३६४॥**

अन्वयः—त्वं पुरा यत् दुष्टान् अपि अदुष्टया दृष्ट्या अपश्यः, यत् हंत प्राज्याः जंतवः त्वया कालमुखात् कृष्टाः, ॥ ३६४ ॥ तत् त्वांप्रति अधुना कः अपि विरोधं न विदधाति, च ये किंचित् विरुध्यंते, ते युधि अंधतां दधते. ॥३६४॥युग्मं॥

अर्थः—तें पूर्वे जे दुष्टोने पण द्वेषरहित दृष्टिथी जोया, तथा जे उत्तम प्राणीओने तें यमना मुखमांथी छोडाव्या, ॥ ३६३ ॥ तेथी ताराप्रते हालमां कोइपण वैर राखतुं नथी, अने जेओ जरापण ( तारो ) विरोध करे छे, तेओ युद्धमां आंधळा थाय छे.

**ददाति देहिनां पुण्यं कानि कान्यद्भुतानि न । अपि देवा यदेवाप्य भवन्त्याश्चर्यभूमयः ॥ ३६५ ॥**

अन्वयः—पुण्यं देहिनां कानि कानि अद्भुतानि न ददाति? यत् एव आप्य देवाः अपि आश्चर्यभूमयः भवंति ॥ ३६५ ॥

अर्थः—(माटे) पुण्य प्राणीओने शुं शुं आश्चर्यकारक (सुखो) नथी आपतुं? के जे पुण्यने मेळवीने देवो पण आश्चर्यना धामरूप थाय छे. ॥ ३६५ ॥

**एवं प्राग्भवमाकर्ण्य रतिसारे रतिस्पृशि । भूपो भक्तिनमन्मौलिरित्यपृच्छन्मुनिप्रभुम् ॥ ३६६ ॥**

अन्वयः–एवं प्राग्भवं आकर्ण्य रतिसारे रतिस्पृशि, भक्ति नमत् मौलिः भूपः मुनिप्रभुं इति अपृच्छत्. ॥ ३६६ ॥

अर्थः—एवी रीतनो (पोतानो) पूर्वभव सांभळीने ते रतिसारकुमार (जेवामां) आनंद पामे छे, तेवामां भक्तिथी मस्तक नमावीने राजाए ते मुनिराजने एम पूछयुं के, ॥ ३६६ ॥

**लक्षणानि निरीक्ष्यन्ते क्षोणिरक्षाक्षमाणि ते । अद्यापि चारुतारुण्यो भगवन्भासते भवान् ॥ ३६७ ॥**

अन्वयः—हे भगवन्! ते लक्षणानि क्षोणि रक्षा क्षमाणि निरीक्ष्यंते, अद्य अपि भवान् चारु तारुण्यः भासते. ॥ ३६७ ॥

अर्थः–हे भगवन्! आपनां लक्षणो तो पृथ्वीनुं रक्षण करवामां समर्थ देखाय छे, तेम हजु पण आप मनोहर युवावस्थावाळा देखाओ छो

**वयसीह ततस्तत्तरुणीकरुणोचिते। अपि राज्यमभित्यज्य किमात्मा तपसेऽर्पितः ॥ ३६८ ॥**

अन्वयः—ततः तत्र तरुणी करुणा उचिते इह वयसि राज्यं अपि अभित्यज्य आत्मा तपसे किं अर्पितः ? ॥ ३६८ ॥

अर्थः—माटे कामातुर स्त्रीने करुणापात्र एवी आ युवावस्थामां राज्यने पण तजीने (आपे आपना आ) आत्माने तपने केम सोंपी आप्यो छे ? (अर्थात् आपे शामाटे दीक्षा लीधी छे ?) ॥ ३६८ ॥

**अथ दन्तांशुसंदोहच्छद्मना देहिनीमिव। अनर्तयद्गिरं रङ्गन्मृदङ्गाभध्वनिर्मुनिः ॥ ३६९ ॥**

अन्वयः-अथ रंगत् मृदंग आभ ध्वनिः मुनिः दंत अंशु संदोह च्छद्मना देहिनीं इव गिरं अनर्तयत्. ॥ ३६९ ॥

अर्थः-पछी वगडता मृदंगसरखी छे ध्वनि जेनी एवा ते मुनिराज दांतोना किरणोना समूहना मिषथी जाणे शरीर धारण करीने (उभी होय नही !) एवी वाणीने नचाववा लाग्या. (अर्थात् बोल्या) ॥ ३६९ ॥

**तारुण्यं वा जरा वास्तु वास्तवः कस्तपःक्षणः। यत्र वा तत्र वा मृत्युरनवस्थो हि देहिनाम् ॥ ३७० ॥**

अन्वयः—तारुण्यं वा जरा वा अस्तु, तपः क्षणः कः वास्तवः ? हि यत्र वा तत्र वा देहिनां मृत्युः अनवस्थः. ॥ ३७० ॥

अर्थः—जुवानी हो, अथवा वृद्धावस्था हो, परंतु तप करवा माटे कयो समय निश्चित थयेलो छे ? (अर्थात् थयो नथी.) केमके गमे ते अनिश्चित समये प्राणिओनुं मरण तो निश्चितज थयेलुं छे. (अर्थात् मृत्यु तो अणधार्युं आवी पडवानुं छे.) ॥३७० ॥

राजञ्जरसि शक्तिः क्व क्व च शक्तिं विना तपः । परिव्रजञ्जनस्तस्यां बोधं नयति मोहताम् ॥ ३७१ ॥

अन्वयः—(हे) राजन् ! जरसि शक्तिः क्व ? च शक्तिं विना तपः क्व ? तस्यां परिव्रजन् जनः बोधं मोहतां नयति. ॥ ३७१ ॥

अर्थः—हे राजन् ! वृद्धावस्थामां शक्ति क्यांथी होय ? अने शक्तिविना तप क्यांथी होय ? माटे वृद्धावस्थामां चारित्र युक्त थयेलो माणस ज्ञानने मोहपणामां लेइ जाय छे. ॥ ३७१ ॥

शक्तिकार्याणि कार्याणि जरायां प्रारभेत यः । तस्य प्रहस्यते बुद्धिः पलितच्छलतस्तया ॥ ३७२ ॥

अन्वयः—शक्तिकार्याणि कार्याणि यः जरायां प्रारभेत, तस्य बुद्धिः पलितच्छलतः तया प्रहस्यते ॥ ३७२ ॥

अर्थः—शक्तिथी साधी शकाय एवो कार्योनो जे माणस वृद्धावस्थामां प्रारंभ करे छे, तेनी बुद्धिने श्वेतवाळना मिषथी ते वृद्धावस्था हसी कहाडे छे. ( अर्थात् ते हांसीने पात्र थाय छे ) ॥ ३७२ ॥

मृत्योश्चामरधारिण्या भान्त्या पलितचामरैः । जरसालिङ्गितस्यास्तु फलदा कस्य धर्मधीः ॥ ३७३ ॥

अन्वयः—मृत्योः चामर धारिण्या, पलित चामरैः भांत्या जरसा आलिंगितस्य कस्य धर्मधीः फलदा अस्तु ? ॥ ३७३ ॥

अर्थः—मृत्युने चामर धरनारी, तथा श्वेतवाळरूपी चामरोवडे शोभती एवी वृद्धावस्थाए स्वाधीन करेला, एवा कया माणसनी धर्मबुद्धि फलदायक निवडी शके ? ॥ ३७३ ॥

मोहमत्तद्विपालानतरुस्तरुणिमा पुनः । मदक्लिन्नो न कस्यैष स्यात्कुकर्मालिमालितः ॥ ३७४ ॥

अन्वयः-पुनः मोहमत्त द्विप आलान तरुः, कुकर्म आलि (अलि) मालितः एषः कस्य तरुणिमा मदक्लिन्नः न स्यात् ? ॥३७४॥

अर्थः—वळी मोहरूपी उन्मत्त हाथीने बांधवाना स्तंभरूप वृक्षसरखी, तथा कुकार्योनी (भमराओनी) श्रेणिओथी भरपूर एवी आ कोनी युवावस्था मदथी उन्मत्त (गर्वयुक्त) नथी थती ? ॥ ३७४ ॥

अमुं लीलास्पदीचक्रे विवेको केशरीव मे । आगत्य वर्त्मना येन तदपूर्वं निवेद्यते ॥ ३७५ ॥

अन्वयः—केशरी इव मे विवेकः येन वर्त्मना आगत्य अमुं लीलास्पदी चक्रे, तत् अपूर्वं निवेद्यते. ॥ ३७५ ॥

अर्थः—( परंतु ) केसरीसिंहसरखा मारा विवेके जे मार्गे आवीने आ (मारा) युवावस्थारूपी ( हाथीने ) पोताना क्रीडा करवाना स्थानरूप कर्यो छे, ते संबंधी अपूर्व वृत्तांत (हुं तमोने) कही संभळावुं छुं. ॥ ३७५ ॥

श्रीसूर्यपुरमित्यस्ति पुरं यत्रास्तिको जनः । धत्ते धर्मनृपक्रीडाकल्पद्रुमवनश्रियम् ॥ ३७६ ॥

अन्वयः—श्रीसूर्यपुरं इति पुरं अस्ति, यत्र आस्तिकः जनः धर्म नृप क्रीडा कल्पद्रुम वन श्रियं धत्ते ॥ ३७६ ॥

अर्थः—श्रीसूर्यपुर एवा (नामनुं) नगर छे, के जेमां (रहेला) आस्तिक लोको धर्मरूपी राजाने क्रीडा करवाना कल्पवृक्षोना वन सरखी लक्ष्मीने धारण करे छे. ॥ ३७६ ॥

इहाजनि महीजानिर्महेन्द्र इति विश्रुतः । अन्तर्बहिर्द्विषज्जैत्रं शास्त्रं शस्त्रं च यो दधौ ॥ ३७७ ॥

अन्वयः—इह महेंद्रः इति विश्रुतः महीजानिः अजनि, यः अंतः बहिः द्विषत् जैत्रं शास्त्रं च शस्त्रं दधौ. ॥ ३७७ ॥

अर्थः—ते नगरीमां "महेंद्र" एवा (नामथी) प्रसिद्ध थयेलो राजा हतो, के जे अंतरंग तथा बहारना शत्रुओने जीतनारां (अनुक्रमे) शास्त्र तथा शस्त्रने धारण करतो हतो. ॥ ३७७ ॥

कुलोचितासु विद्यासु गुरुभिः कारितश्रमः । तस्याहं नन्दनश्चन्द्रयशा इत्यभिधामधाम् ॥ ३७८ ॥

अन्वयः-कुलोचितासु विद्यासु गुरुभिः कारितश्रमः अहं तस्य नंदनः, चंद्रयशाः इति अभिधां अधां. ॥ ३७८ ॥

अर्थः-कुळने लायक एवी विद्याओमां गुरुओए करावेल छे अभ्यास जेने, एवो आ हुं ते महेंद्रराजानो पुत्र छुं, तथा "चंद्रयशाः" एवां नामने हुं धारण करुं छुं. ॥ ३७८ ॥

हर्षी षोडशवर्षीयं सुधावर्षी गिरां भरैः । भवतापी कदापीदं मामुपांशु नृपो जगौ ॥ ३७९ ॥

अन्वयः-हर्षी, गिरां भरैः सुधावर्षी, भवतापी नृपः कदापि षोडशवर्षीयं मां उपांशु जगौ. ॥ ३७९ ॥

अर्थः—हर्ष पामेला, वचनोना समूहथी अमृतवर्षनारा, अने संसारथी विरक्त थयेला एवा ते राजाए एकदिवसे शोळ वर्षोनी वयवाळा एवा मने पासे बेसाडी कह्युं के, ॥ ३७९ ॥

राज्यं संसारकान्तारे शृङ्गाटोऽयमटन्निह । कलितस्खलितः श्रीभिः पिशाचीभिः प्रपात्यते ॥ ३८० ॥

अन्वयः—संसारकांतारे राज्यं शृंगाटः, इह अटन् अयं पिशाचीभिः श्रीभिः कलितस्खलितः प्रपात्यते ॥ ३८० ॥

अर्थः—आ संसाररूपी वनमां राज्य (एक) चोवटा सरखुं छे, तेमां फरनारा आ जीवने पिशाची सरखी लक्ष्मी ठोकर खवरावी पाडी नाखे छे. ॥ ३८० ॥

वहन्ति मणयो मोहमहीपमहदीपताम् । यल्लोभलोलुभा नाधः के पतन्ति पतङ्गवत् ॥ ३८१ ॥

अन्वयः—मणयः मोह महीप मह दीपतां वहंति, यल्लोभ लोलुभाः के पतंगवत् अधः न पतंति ? ॥ ३८१ ॥

अर्थः—रत्नो मोहराजाना तेजस्वी दीपकपणाने धारण करे छे, जेना लोभथी ललचायेला कया माणसोनो पतंगोनीपेठे अधःपात नथी थतो ? ॥ ३८१ ॥

तितीर्षवो भवाम्भोधिं बोधिबोहित्थवाहिताः । त्यजन्ति दूरतो मध्यभूधरानिव सिन्धुरान् ॥ ३८२ ॥

अन्वयः—बोधि बोहित्थ वाहिताः भवांभोधिं तितीर्षवः मध्यभूधरान् इव सिंधुरान् दूरतः त्यजंति. ॥ ३८२ ॥

अर्थः—ज्ञानरूपी वहाणमां बेठेला ( डाह्या माणसो ) संसारसमुद्रने तरी जवानी इच्छाथी वचे रहेला खराबाओसरखा, हाथीओने दूरथीज तजी दे छे. ॥ ३८२ ॥

भवाटवीकुरङ्गाणां तुरङ्गाणां चलात्मनाम् । मोहश्रीदृग्विलासानां गोचरे नो चरेत्कृती ॥ ३८३ ॥

अन्वयः-भव अटवी कुरंगाणां, चलात्मनां, मोहश्री दृग्विलासानां तुरंगाणां गोचरे कृती नो चरेत् . ॥ ३८३ ॥

अर्थः—आ संसाररूपी वनमां हरिणसरखा, चपल तथा मोहलक्ष्मीनी आंखोना कटाक्षोसरखा एवा घोडाओनी नजीक (पण) चतुर माणस आवतो नथी. ॥ ३८३ ॥

मोहभूमिभुजङ्गस्य जङ्गमास्थानमण्डपम् । छायाछलात्तले व्याप्तं पातकैस्तस्य सेवकैः ॥ ३८४ ॥

छत्रं विवेकमार्तण्डप्रकाशभरनाशकम् । न कोऽपि सेवते तादृग्जडताचकितः कृती ॥ ३८५ ॥ युग्मम् ॥

अन्वयः—मोह भूमिभुजंगस्य जंगम आस्थान मंडपं, छायाछलात् तले तस्य सेवकैः पातकैः व्याप्तं, ॥ ३८४ ॥ विवेक मार्तंड प्रकाश भरनाशकं छत्रं तादृक् जडता चकितः कः अपि कृती न सेवते. ॥ ३८५ ॥ युग्मं ॥

अर्थः—मोहरूपी राजाना जंगम सभामंडप सरखा, तथा नीचेना भागमां छायाना मिषथी ते मोहराजाना सेवको सरखा पापोवडे व्याप्त थयेला, ॥ ३८४ ॥ अने विवेकरूपी सूर्यना प्रकाशना समूहने आच्छादित करनारा, एवा छत्रने तेवी रीतनां (तेनां) जड-पणाथी चकित थयेलो, एवो कोइ पण चतुर माणस सेवे नही. ॥ ३८५ ॥ युग्मं ॥

रत्नान्यगाधवर्तीनि स्त्रियो भान्ति भवार्णवे । पुमान्मज्जत्यनुन्मज्जो यत्पाणिग्रहाणाग्रही ॥ ३८६ ॥

अन्वयः-भव अर्णवे अगाधवर्तीनि रत्नानि स्त्रियः भांति, यत् पाणि ग्रहण आग्रही पुमान् अनुन्मज्जः मज्जति. ॥ ३८६ ॥

अर्थः—आ संसाररूपी महासागरमां अत्यंत उंडां रहेलां रत्नोसरखी स्त्रीओ शोभे छे, के जेना लग्नमाटे ( हाथमां लेवामाटे ) आग्रह युक्त थयेलो पुरुष पाछो उपर न आवी शके, ए रीते (तेमां) बुडी जाय छे. ॥ ३८६ ॥

**एतदीदृग्विधं मोक्तुमशक्तः सकलः कृती । असक्त एव सेवेत शीतभीत इवानलम् ॥ ३८७ ॥**

अन्वयः-ईदृग्विधं एतत् मोक्तुं अशक्तः सकलः कृती, शीतभीतः अनलं इव असक्तः एव सेवेत. ॥ ३८७ ॥

अर्थः—एवी रीतनां आ सांसारिक विषयोने छोडवाने अशक्त थयेला सघळा डाह्या माणसो, ठंडीथी डरेलो माणस (छेटेथी) जेम अग्निने सेवेछे, तेम तेमां आसक्ति राख्या विनाज (विषयोने) सेवे छे. ॥ ३८७ ॥

**तदिदानीमहं मोहादतो निर्गन्तुमुद्यतः । राज्ञां राज्यश्रमः सूनुयौवनान्तो हि नः कुले ॥ ३८८ ॥**

अन्वयः—तत् इदानीं अहं अतः मोहात् निर्गंतुं उद्यतः, हि नः कुले राज्ञां राज्यश्रमः सूनु यौवन अंतः ॥ ३८८ ॥

अर्थः—माटे हवे हुं (संसारनी) आ मोहजाळमांथी निकळवाने उत्सुक थयेलो छुं, केमके आपणा कुळमां थयेला राजाओ पुत्रना यौवनसुधी राज्यनो श्रम उठावे छे. ॥ ३८८ ॥

**तातो मामिव वत्स त्वां स्वस्थानेऽस्मिन्निवेश्य तत् । मोहवीरस्य कारातः संसारान्निरयेऽधुना ॥ ३८९ ॥**

अन्वयः—तत् (हे) वत्स! मां इव तातः, त्वां अधुना अस्मिन् स्वस्थाने निवेश्य मोहवीरस्य कारातः संसारात् निरये. ॥३८९॥

अर्थः-माटे (हे) वत्स ! मने जेम (मारा) पिता, तेम तने हमणा आ मारी गादीपर बेसाडीने मोहसुभटना केदखाना सरखा (आ) संसारमांथी निकळी जाउं छुं. ॥ ३८९. ॥

इत्युक्त्वा बलतो राज्याभिषेकं विरचय्य मे । नृपो लक्ष्यतपोलक्ष्मीयौवनं प्रययौ वनम् ॥ ३९० ॥

अन्वयः—इति उक्त्वा बलतः मे राज्य अभिषेकं विरचय्य नृपः लक्ष्य तपः लक्ष्मी यौवनं वनं प्रययौ. ॥ ३९० ॥

अर्थः—एम कहीने बळात्कारे मारो राज्याभिषेक करावीने ते राजा, ज्यां तपरूपी लक्ष्मीनुं यौवन देखाय छे, एवा वनप्रत्ये चाल्या गया. ॥ ३९० ॥

परिपालयतो राज्यं ममापि क्ष्मापशिक्षया । राज्ञी रत्नावली नाम प्राणेभ्योऽपि प्रियाभवत् ॥ ३९१ ॥

अन्वयः-क्ष्माप शिक्षया राज्यं परिपालयतः मम अपि प्राणेभ्यः अपि प्रिया रत्नावलीनाम राज्ञी अभवत् . ॥ ३९१ ॥

अर्थः-राजानी (मारा पिताजीनी) शिखामण मुजब राज्यनुं पालन करता एवा मने पण, प्राणथी पण वहाली रत्नावली नामनी राणी थइ. ॥ ३९१ ॥

भवानुबन्धिनीं जानन्नपि तां तद्गतं मनः । आक्रष्टुं न क्षमोऽभूवं पङ्कमग्नमिव द्विपम् ॥ ३९२ ॥

अन्वयः--तां भवानुबंधिनीं जानन् अपि, पंकमग्नं द्विपं इव तद्गतं मनः आक्रष्टुं क्षमः न अभूवं. ॥ ३९२ ॥

अर्थः—तेणीने संसार (वधवानां) कारणरूप जाणतां छतां पण कादवमां बुडेला हाथीनीपेठे, तेणीमां चोटेलां ( मारां ) मनने खेंची कहाडवाने (हुं) समर्थ थयो नही. ॥ ३९२ ॥

लग्नं तस्यां तथा प्रेमवज्रलेपेन मन्मनः । न यथाकर्षि राज्यश्रीधुरीणैरपि वारणैः ॥ ३९३ ॥

अन्वयः—तस्यां प्रेम वज्र लेपेन मन्मनः तथा लग्नं, यथा राज्य श्री धुरीणैः वारणैः अपि न आकर्षि. ॥ ३९३ ॥

अर्थः-ते राणीमां प्रेमरूपी वज्रलेपथी मारुं मन एवुं तो चोटी गयुं के, राज्यलक्ष्मीना भारने खेंचनारा हाथीसरखा ( मंत्रीओ ) पण तेने खेंचीने कहाडी शक्या नही. ॥ ३९३ ॥

तस्यामुच्छृङ्खलं कामपिशाचेन मनो मम । गृहीतं हन्त नामोचि मन्त्रज्ञैरपि मन्त्रिभिः ॥ ३९४ ॥

अन्वयः-हंत तस्यां उच्छृंखलं कामपिशाचेन गृहीतं मम मनः मंत्रज्ञैः मंत्रिभिः अपि न अमोचि. ॥ ३९४ ॥

अर्थः-अरेरे! ते राणीमांज आसक्त थयेलां, अने कामदेवरूपी पिशाचे वश करेलां मारां मनने मंत्रोना जाणनारा मंत्रीओ पण छोडावी शक्या नही. ॥ ३९४ ॥

तदेकायत्तचित्तस्य राज्यश्रीरीर्ष्यया मम । परहस्तं यती तस्थौ वृद्धामात्यह्रिया यदि ॥ ३९५ ॥

अन्वयः-तत् एक आयत्त चित्तस्य मम राज्यश्रीः ईर्ष्यया परहस्तं यती यदि वृद्ध अमात्य ह्रिया तस्थौ. ॥ ३९५ ॥

अर्थः-तेणीमांज फक्त आसक्त छे मन जेनुं, एवो जे हुं, तेनी राज्यलक्ष्मी ईर्ष्याथी परना हाथमां जती जती फक्त वृद्ध मंत्रीनी शरमथी रही गइ. ॥ ३९५ ॥

**मानसे मानसेविन्या तया नित्याश्रितेऽविशन् । स्त्रीसंघट्टभयेनेव न धर्मगुरवोऽपि मे ॥ ३९६ ॥**

अन्वयः-मानसेविन्या तया नित्याश्रिते मे मानसे स्त्रीसंघट्ट भयेन इव धर्म गुरवः अपि न अविशन् . ॥ ३९६ ॥

अर्थः-सन्मानपूर्वक सेवाती एवी ते राणीवडे हमेशां वशीभूत थयेलां मारां मनमां, जाणे स्त्रीना स्पर्शना भयथी होय नही ! तेम गुरुओ पण प्रवेश करी शक्या नही. ॥ ३९६ ॥

**इत्यनन्यमना धन्यंमन्यस्तन्न्यस्तलोचनः । अमन्ये मान्मथं पर्व निर्वाणपदमप्यदः ॥ ३९७ ॥**

अन्वयः-इति अनन्यमनाः तन्न्यस्त लोचनः (अहं) धन्यंमन्यः निर्वाण पदं अपि अदः मान्मथं पर्व अमन्ये. ॥ ३९७ ॥

अर्थः-ए रीते बीजे क्यांय पण मन राख्या विना फक्त ते राणीमांज दृष्टि राखीने हुं (पोताने) भाग्यशाली मानतो थको मोक्षने पण आ कामसेवानुं पर्व मानवा लाग्यो. ( अर्थात् आ कामभोगज मोक्ष छे, एम मानवा लाग्यो. ) ॥ ३९७ ॥

**अन्यदा मदनानन्दरसनिद्रावशंवदः । स्वमपश्यमहं स्वप्ने मुक्तागिरिशिरश्चरम् ॥ ३९८ ॥**

अन्वयः—अन्यदा मदन आनंद रस निद्रा वशंवदः अहं स्वप्ने मुक्तागिरि शिरः चरं अपश्यं. ॥ ३९८ ॥

अर्थः—एक दिवसे कामविलासना आनंदरसथी निद्रावश थयेलो हुं स्वप्नमां पोताने सिद्धगिरिना शिखरपर चालतो जोवा लाग्यो.

**तस्यामुन्निद्रनिद्रायामुन्निद्रोऽहं तदा हृदा । अचिन्तयमिदं चिन्तान्तरावसरशालिना ॥ ३९९ ॥**

अन्वयः—तस्यां उन्निद्र निद्रायां तदा उन्निद्रः अहं चिंता अंतर अवसरशालिना हृदा अचिंतयं. ॥ ३९९ ॥

अर्थः—ते राणी हजु भर उंघमां हती, त्यारे जागी उठेलो हुं, बीजां चितवनमाटे (मळेला) अवसरथी शोभता एवा हृदयवडे हुं विचारवा लाग्यो के, ॥ ३९९ ॥

**स्वप्नः सर्वोत्तमस्तावन्मुक्तेर्लाभं दिशत्यसौ । किं तु कान्तावशहृदः क्व तत्संभावनापि मे ॥ ४०० ॥**

अन्वयः—सर्वोत्तमः असौ स्वप्नः तावत् मुक्तेः लाभं दिशति, किंतु कांता वश हृदः मे तत्संभावना अपि क्व ? ॥ ४०० ॥

अर्थः—सर्वथी उत्तम एवुं आ स्वप्न तो मुक्तिनो लाभ सूचवे छे, परंतु स्त्रीने वश हृदयवाळा एवा मने ते मुक्तिना लाभनो संभव पण क्यांथी होय ? ॥ ४०० ॥

**किंकुर्वत्काञ्चना कान्तिस्तृणन्मत्तगजा गतिः । दासदश्वा दृगुल्लासाः कर्करन्मणयो नखाः ॥ ४०१ ॥**
**चेटत्कर्पूरकस्तूरीमुख्यगन्धो मुखानिलः । यस्या रेणुकणद्दिव्यदुकूला दशनद्युतिः ॥ ४०२ ॥ युग्मं ॥**

अन्वयः—यस्याः कांतिः किंकुर्वत्कांचना, गतिः तृणन्मत्तगजा, दृगुल्लासाः दासदश्वाः, नखाः कर्करन्मणयः, ॥४०१॥ मुखा-

सान्वय भाषान्तर ॥१२२॥

निलः चेटत्कर्पूर कस्तूरीमुख्य गंधः, दशनद्युतिः रेणुकणत् दिव्यदुकूलं ॥ ४०२ ॥ युग्मं ॥

अर्थः–जे आ राणीनी कांति तो सुवर्णने कंइं हिसाबमां गणती नथी, तेणीनी गति तो मदोन्मत्त हाथीने पण तृणसमान लेखेछे, तेणीना नेत्रोना(चपल)विलासो तो घोडाओने पण नोकर गणे छे, अने तेओना नखो तो मणिओने कांकरासरखा लेखेछे, ॥४०१॥ तेना मुखना वायुए तो कपूर तथा कस्तूरीआदिकनी सुगंधिने पण चाकररूप गणी छे, तथा तेना दांतनी कांतिए तो दिव्य श्वेत रेशमी साडीने पण रजकणसरखी लेखी छे. ॥ ४०२ ॥ युग्मं ॥

युक्तं तयैकया हृन्मे राज्यभोगे श्लथीकृतम् । एतद्भोगं श्लथीकर्तुं कोऽभ्युपायोऽस्तु मेऽधुना ॥ ४०३ ॥

अन्वयः—तया एकया युक्तं मे हृद् राज्य भोगे श्लथीकृतं, एतद्भोग श्लथीकर्तुं अधुना मे कः अभ्युपायः अस्तु. ॥ ४०३ ॥

अर्थः—ते एक राणी साथे जोडायेलुं मारुं मन राज्यकार्यमां नरम पडी गयुं छे, ( माटे ) तेणीना भोगविलासने नरम पाडवा माटे हवे मारे कयो उपाय शोधवो ? ॥ ४०३ ॥

किमस्या न महानीलीलीलां दधतु कुन्तलाः । हृद्वर्तिभिः कलुषितं श्रुतं मे क्षीरहारि यैः ॥ ४०४ ॥

अन्वयः—अस्याः कुंतलाः किं महानीली लीलां न दधतु ? हृद्वर्तिभिः यैः मे क्षीरहारि श्रुतं कलुषितं ॥ ४०४ ॥

अर्थः—आ राणीना (मस्तकपरना) केशो शुं पाकी गळीनी क्रीडाने (श्यामपणाने) नथी धारण करता ? (केमके मारा) हृदयमां रहेला एवा जे केशोए मारुं दूधसरखुं मनोहर ( उज्ज्वल ) ज्ञान मलीन कर्युं छे. ॥ ४०४ ॥

किममुष्या मुखं नेन्दुर्यल्लीलामीलितं मम । विवेकमब्जवद्वीक्ष्य हंसगौरैर्गतं गुणैः ॥ ४०५ ।

अन्वयः—अमुष्याः मुखं किं इन्दुः न ? यल्लीला मीलितं अब्जवत् मम विवेकं वीक्ष्य हंस गौरैः गुणैः गतं. ॥ ४०५ ॥

अर्थः—आ राणीनुं मुख शुं चंद्र नथी ? (छे) केमके जेना प्रभावथी मीचाइ गयेलां कमल सरखो मारो विवेक जोइने हंस-सरखा निर्मल गुणो ( मारामांथी) चाल्या गया छे. ॥ ४०५ ॥

अस्या नीलाब्जसदृशो दृशो नित्यधृतस्मिताः । शंसन्ति तत्त्वविज्ञानभानुमस्तमितं मयि ॥ ४०६ ॥

अन्वयः—नित्य धृत स्मिताः नीलाब्ज सदृशः अस्याः दृशः मयि तत्त्व विज्ञान भानुं अस्तं इतं शंसंति ॥ ४१६ ॥

अर्थः—हमेशां विकस्वर रहेती, तथा ( चंद्र विकासी ) लीलां कमलो सरखी आ राणीनी आंखो, मारां तत्त्वज्ञानरूपी सूर्यने अस्त पामेलो सूचवे छे. ॥ ४०६ ॥

अधरो मधुमाधुर्यधुर्योऽस्या यद्वशं भृशम् । प्रमत्तं मन्मनोऽमुञ्चन्दूरतः सूरयो रयात् ॥ ४०७ ॥

अन्वयः—अस्याः अधरः मधु माधुर्य धुर्यः, यद्वशं भृशं प्रमत्तं मन्मनः सूरयः रयात् दूरतः अमुंचन्, ॥ ४०७ ॥

अर्थः—आ राणीना होठ मधनी पेठे ( मदिरानी पेठे ) मीठाशमां अग्रेसर छे, के जेने वश थइ अत्यंत उन्मत्त ( प्रमादी ) थयेलां मारां मनने धर्माचार्योए तो दूरथीज तजी दीधु छे. ॥ ४०७ ॥

एतस्याः कम्बुवत्कण्ठो गम्भीरमधुरस्वरः । कृत्स्नानां मम कृत्यानां प्रयाणायैव कल्पितः ॥ ४०८ ॥

अन्वयः—एतस्याः कंबुवत् गंभीर मधुर स्वरः कंठः मम कृत्स्नानां कृत्यानां प्रयाणाय एव कल्पितः ॥ ४०८ ॥

अर्थः—आ राणीनो शंख जेवो गंभीर, अने मनोहर नादवाळो कंठ मारां सघळां (उत्तम) कार्योनां प्रयाणमाटेज जणायेलो छे. (केमके प्रयाणसमये शंख वगाडवामां आवे छे.) ॥ ४०८ ॥

अप्येतन्मृदुदोर्नालपाशबद्धं निजं मनः । नाहं मोचयितुं शक्तो धिगसारनराग्रणीम् ॥ ४०९ ॥

अन्वयः—एतत् मृदु दोर्नाल पाश बद्धं अपि निजं मनः अहं मोचयितुं शक्तः न, असार नर अग्रणीं धिक् ॥ ४०९ ॥

अर्थः—आ राणीना कोमल हस्तनालरूपी पाशथी बंधायेलां, एवां पण मारां मनने हुं छोडववाने शक्तिमान थतो नथी, माटे निर्बल माणसोना सरदार एवा (मने) धिक्कार छे. ॥ ४०९ ॥

लीलयैव विलङ्घेऽहमहो भवमहाटवीम् । तस्यामस्यास्तु दुर्लङ्घ्यो वेणिदण्डो हृदापि मे ॥ ४१० ॥

अन्वयः—अहो! भवमहाटवीं अहं लीलया एव विलंघे, तस्यां अस्याः वेणिदंडः तु मे हृदा अपि दुर्लंघ्यः ॥ ४१० ॥

अर्थः—अहो! संसाररूपी (आ) महावनने तो हुं रमतमात्रमांज ओळंगी जाउं एम छउं, (परंतु) तेमां रहेलो आ राणीनो वेणीदंड (गुंथेलो लांबो चोटलो) तो मारां मनवडे पण ओळंगावो मुश्केल छे. ॥ ४१० ॥

सर्वतोऽपि भवाम्भोधिः सुतरः सुतरामसौ । इहैतन्नाभिगम्भीरावर्तबन्धस्तु दुस्तरः ॥ ४११ ॥

अन्वयः—असौ भव अंभोधिः सर्वतः अपि सुतरां सुतरः, इह एतत् नाभि गंभीर आवर्तबंधः तु दुस्तरः ॥ ४११ ॥

अर्थः–आ संसाररूपी महासागर तो सर्व बाजुएथी पण सहेजमां सुखें तराय एवो छे, परंतु तेमां रहेलो आ राणीनी नाभिरूपी उंडो भमरीओ (बंध कुओ) तो तरावो मुश्केल छे. ॥ ४११ ॥

एतत्सिञ्जानमञ्जीरगतचित्तस्य विस्मृतौ । हंसस्येवामलौ पक्षौ धिग्ममोर्ध्वगतिक्षमौ ॥ ४१२ ॥

अन्वयः—धिक् ! एतत्सिंजान मंजीर गत चित्तस्य मम हंसस्य इव ऊर्ध्व गति क्षमौ अमलौ पक्षौ विस्मृतौ. ॥ ४१२ ॥

अर्थः—धिक्कार छे ! के, आ राणीना झमकता झांझरोमां आसक्त मनवाळा एवा मने, हंसनीपेठे उंचे गमन करवामां समर्थ एवा मारा माता पिता संबंधी बन्ने निर्मल पक्षो ( पक्षे–पांखो ) विस्मरण थयां. ॥ ४१२ ॥

इत्यादिध्यानसंलीने मयि स्वं निन्दति स्वयम् । अपठन्प्रातरुत्तालस्वरं वैतालिका बहिः ॥ ४१३ ॥

अन्वयः—इत्यादि ध्यान संलीने मयि, स्वयं स्वं निंदति, प्रातः बहिः वैतालिकाः उत्तालस्वरं अपठन् ॥ ४१३ ॥

अर्थः—इत्यादिक विचारमां गरकाव थइने हुं पोतानी मेळेज पोताने (ज्यारे) निंदतो हतो, त्यारे प्रभात थवाथी बहार रहेला स्तुतिपाठको उंचे स्वरे बोलवा लाग्या के, ॥ ४१३ ॥

निद्रां नरेन्द्र मुञ्चाशु बोधस्य समयो ह्यसौ । हन्तुं तमोऽभ्ययाद्भानुः संमोहमिव सद्गुरुः ॥ ४१४ ॥

अन्वयः—(हे) नरेन्द्र ! आशु निद्रां मुंच, हि असौ बोधस्य समयः, सद्गुरुः संमोहं इव तमः हंतुं भानुः अभ्ययात् ॥४१४॥

अर्थः—हे राजन् ! तुरत निद्रानो त्याग करो ? केमके आ जागवानो समय छे, सद्गुरु जेम मोहने, तेम अंधकारने हणवाने सूर्य नजीक आवेलो छे. ॥ ४१४ ॥

**ऐनामुपश्रुतिं मुक्तिसूचिनीं बन्दिनां गिरम् । स्वप्नसंवादिनीं जानन्नानन्दमहमासदम् ॥ ४१५ ॥**

अन्वयः—एनां उपश्रुतिं बंदिनां गिरं मुक्तिसूचिनीं स्वप्नसंवादिनीं जानन् अहं आनंदं आसदं. ॥ ४१५ ॥

अर्थः—(एवी रीतनी) आ कानमां पडेली ते स्तुतिपाठकोनी वाणीने मुक्ति सूचवनारी, तथा स्वप्नने मळती आवती जाणीने हुं आनंद पाम्यो. ॥ ४१५ ॥

**क्षणेऽस्मिञ्जाग्रती साग्रे प्रेक्ष्य मां प्रथमोत्थितम् । ह्रीनम्रास्या वचः किंचिन्नोचे मयि चटूचितम् ॥४१६॥**

अन्वयः—अस्मिन् क्षणे जाग्रती सा प्रथम उत्थितं मां अग्रे प्रेक्ष्य ह्री नम्र आस्या मयि किंचित् उचितं चटु न ऊचे. ॥४१६॥

अर्थः—ते वखते जागी उठेली एवी ते राणी, (पोताथी) पहेलां उठेला एवा मने आगळ (बेठेलो) जोइ, शरमने लीधे नीचुं जोइ रही, तथा माराप्रते कंइ पण योग्य चाटु वचन बोली नही. ॥ ४१६ ॥

**अगाधबोधिदुग्धाब्धिसंमुखान्तरचक्षुषा । समभाषि मयाप्येषा न किंचिन्नर्मभाषया ॥ ४१७ ॥**

अन्वयः—अगाध बोधि दुग्ध अब्धि संमुख आंतर चक्षुषा मया अपि एषा नर्मभाषया किंचित् न समभाषि. ॥ ४१७ ॥

अर्थः-ज्ञानरूपी उंडा क्षीरसमुद्रनी सन्मुख थयेल छे अंतरंग चक्षु जेनां, एवा में पण तेणीने रघुजी भाषावडे कंइ पण वचन कह्युं नही. ॥ ४१७ ॥

अथाग्रभागमागत्य प्रणिपत्य च मां मुदा । व्याजहार प्रतीहारी हारीकृतरदद्युतिः ॥ ४१८ ॥

अन्वयः—अथ हारीकृत रद द्युतिः प्रतीहारी अग्रभागं आगत्य, च मां मुदा प्रणिपत्य व्याजहार. ॥ ४१८ ॥

अर्थः—एवामां मनोहर करेल छे दांतोनी कांति जेणीए एवी प्रतीहारीए आगळ आवीने, तथा मने नमीने कह्युं के, ॥ ४१८ ॥

देव विज्ञपयत्येवममात्यो मतिसागरः । चिराद्भवन्मुखालोककौतुकी सेवको जनः ॥ ४१९ ॥

अन्वयः-(हे) देव! मतिसागरः अमात्यः एवं विज्ञपयति, सेवकः जनः चिरात् भवन्मुख आलोक कौतुकी. ॥ ४१९ ॥

अर्थः—हे स्वामी! मतिसागर मंत्री एम विनंति कहेवरावे छे के, (सर्व) सेवकलोको घणा समयथी आपना मुखनुं दर्शन करवाने उत्कंठित थया छे. ॥ ४१९ ॥

इति तद्वचनान्तेऽहं नित्यप्रत्यूषकृत्यकृत् । सेवितां सेवकस्तोमैः सभाभुवमभासयम् ॥ ४२० ॥

अन्वयः—इति तद्वचन अंते नित्य प्रत्यूषकृत्यकृत् अहं सेवकस्तोमैः सेवितां सभाभुवं अभासयं. ॥ ४२० ॥

अर्थः—एवी रीतनां तेणीना वचनने अंते (ते प्रतीहारीनुं वचन सांभळ्याबाद) प्रभातकाळनुं नित्यकर्म करीने हुं सेवकोना समूहोथी सेवायेली राजसभाने शोभाववा लाग्यो, (त्यां गयो.) ॥ ४२० ॥

ततः प्रणमतः सर्वानुर्वीनाथान्निरूपयन् । वीक्ष्य कस्यापि हस्तेऽब्जं तामब्जदृशमस्मरम् ॥ ४२१ ॥

अन्वयः-ततः प्रणमतः सर्वान् ऊर्वीनाथान् निरूपयन्, कस्य अपि हस्ते अब्जं वीक्ष्य अब्जदृशं तां अस्मरं ॥ ४२१ ॥

अर्थः—पछी नमता एवा सघळा जमीनदारोने जोतोथको, कोइकना हाथमां कमलने जोइने कमलसरखां नेत्रोवाळी एवी ते (मारी) राणीने (हुं) याद करवा लाग्यो. ॥ ४२१ ॥

वचोवीचिषु पीयूषसध्रीचीषु मनीषिणाम् । तदा तद्विरहोत्तप्तं न रेमे तत्र मे मनः ॥ ४२२ ॥

अन्वयः-तदा तत्र मनीषिणां पीयूषसध्रीचिषु वचोवीचीषु तद्विरह उत्तप्तं मे मनः न रेमे ॥ ४२२ ॥

अर्थः-वळी ते वखते त्यां विद्वान कविओनां अमृतसरखां वचनरचनारूप मोजांओमां (पण) ते राणीना विरहथी तपी निकळेलुं मारुं मन आनंदित (शीतल) थयुं नही. ॥ ४२२ ॥

उत्कः क्षिपाम्यहं चक्षुर्यावदन्तः पुरं प्रति । तावच्चारुतनुं कंचिदुदश्चदतुलद्युतिम् ॥ ४२३ ॥

गाढग्रन्थिपरीधानं कटिवेष्टोत्तरीयकम् । अंसलम्बितनिस्त्रिंशमुरोबद्धासिधेनुकम् ॥ ४२४ ॥

बिभ्राणं दक्षिणे पाणौ ताम्बूलदलमण्डलीम् । वामे तया तु हर्षिण्या कृतहस्तावलम्बनम् ॥ ४२५ ॥

चक्षुषा धैर्यधुर्येण पश्यन्तं मामवज्ञया । नरं निरूपयामास निर्गच्छन्तं द्रुतैः पदैः ॥ ४२६ ॥

अन्वयः—उत्कः अहं यावत् अंतः पुरं प्रति चक्षुः क्षिपामि, तावत् कंचित् चारु तनुं, उदंचत् अतुलद्युतिं ॥ ४२३ ॥ गाढ ग्रंथि परीधानं, कटि वेष्ट उत्तरीयकं, अंस लंबित निस्त्रिंशं, उरः बद्ध असिधेनुकं, ॥ ४२४ ॥ दक्षिणे पाणौ तांबूल दल मंडलीं बिभ्राणं वामे तु हर्षिण्या तया कृत हस्त अवलंबनं, ॥४२५॥ धैर्य धुर्येण चक्षुषा अवज्ञया मां पश्यंतं, द्रुतैः पदैः निर्गच्छंतं नरं निरूपयामास.

अर्थः—उत्कंठित थयेलो एवो हुं जेवामां जनानखाना तरफ नजर करुं छुं, तेवामां कोइक मनोहर शरीरवाळा, देदीप्यमान अनुपम कांतिवाळा, ॥४२३॥ मजबूत गांठ बांधीने पहेरेल धोतीवाळा, केडे वींटेल दुपट्टावाळा, खभे लटकावेल शमशेरवाळा, छातीपर बांधेल कटारवाळा, ॥ ४२४॥ जमणा हाथमां तांबूल पत्रोनी श्रेणिने धारण करनारा, हर्ष पामेली एवी ते राणीए पोताना हाथथी पकडेलो छे डाबो हाथ जेनो एवा, ॥४२५॥ हिम्मत भरेली दृष्टिथी तिरस्कारपूर्वक मारीतरफ जोता, तथा उतावळे पगले (त्यांथी) निकळता एवा एक पुरुषने में जोयो. ॥ ४२६ ॥ चतुर्भिः कलापकं ॥

**क एष क्व नयत्येतामिति कोपारुणेक्षणम् । मामित्यूचे हसन्ती सा तं स्थिरीकृत्य सत्वरम् ॥ ४२७ ॥**

अन्वयः–एषः कः ? एतां क्व नयति ? इति कोप अरुण ईक्षणं मां हसंती तं सत्वरं स्थिरीकृत्य सा इति ऊचे. ॥ ४२७ ॥

अर्थ––आ कोण हशे ? आ मारी राणीने क्यां लेइ जाय छे ? एवा विचारथी क्रोधवडे लाल आंखोवाळो जे हुं, तेनी हांसी करती थकी, ते पुरुषने तुरत हिम्मत आपीने ते राणी (मने) एम कहेवा लागी के, ॥ ४२७ ॥

**अहं महापातकिना बन्दीचक्रे चिरं त्वया । प्रयामि संप्रति न्यस्य त्वदीयहृदये पदम् ॥ ४२८ ॥**

अन्वयः—महापातकिना त्वया अहं चिरं बंदीचक्रे, संप्रति त्वदीय हृदये पदं न्यस्य प्रयामि. ॥ ४२८ ॥

अर्थः–महा पापी एवा तें मने घणा काळथी केद करीने राखी हती, हवे आ वखते तारी छाती पर पग मूकीने हुं नाशी जाउं छुं.

**ईदृक्तद्वचनक्रुद्धो भटानित्यहमभ्यधाम्। ध्रियतां ध्रियतामेष हन्यतां हन्यतामयम् ॥ ४२९ ॥**

अन्वयः—ईदृक् तत् वचन क्रुद्धः अहं भटान् इति अभ्यधां, एषः ध्रियतां ध्रियतां ? अयं हन्यतां हन्यतां ? ॥ ४२९ ॥

अर्थः—एवीरीतनां तेणीना वचनोथी क्रोध पामेला एवा में, ( मारा ) सुभटोने एवो हुकम कर्यो के, आने पकडो पकडो ? तथा एने मारो मारो ? ॥ ४२९ ॥

**ततो मरुत्वरातारप्रचरच्चरणः क्षणात् । तया सह स हर्षिण्याऽगमद्गृहबहिर्महीम् ॥ ४३० ॥**

अन्वयः—ततः मरुत् त्वरा तार प्रचरत् चरणः सः हर्षिण्या तया सह क्षणात् गृहबहिर्महीं अगमत् . ॥ ४३० ॥

अर्थः—पछी वायु सरखा वेगथी उतावळी चालवाळो ते पुरुष, खुशी थयेली एवी (मारी) ते राणीसहित क्षणवारमां तो घरनी (अंतःपुरनी) बहार निकळी गयो. ॥ ४३० ॥

**एष यात्येष यातीति प्रध्वानैरनुधावताम् । पुरःस्था अपि पौरास्तं न धर्तुं शेकुराहृताः ॥ ४३१ ॥**

अन्वयः—एषः याति, एषः याति, इति प्रध्वानैः अनुधावतां पुरःस्थाः आहृताः पौराः अपि तं धर्तुं न शेकुः. ॥ ४३१ ॥

अर्थः—आ जाय, आ जाय, एम बूमो मारीने तेनी पाछळ दोडनाराओमाना अगाडी रहेला, अने तैयार थइ उभेला, एवा

नागरीको पण तेने पकडी शक्या नही. ॥ ४३१ ॥

**उत्फुल्लफेनया धावद्धयानां सेनया मया । मनसेवेन्द्रियग्रामः सोऽन्वगामि प्रवेगिना ॥ ४३२ ॥**

अन्वयः-उत्फुल्ल फेनया धावत् हयानां सेनया ( सह ) मनसा इन्द्रिग्रामः इव, प्रवेगिना मया सः अन्वगामि. ॥ ४३२ ॥

अर्थः—मुखमां आवेलां फीणवाळी, एवी दोडता घोडाओनी सेना सहित, मन जेम इन्द्रियोना समूहनी पाछळ जाय, तेम अत्यंत वेगवाळो एवो हुं तेनी पाछळ जवा लाग्यो. ॥ ४३२ ॥

**पर्यन्तं पर्यटन्पुर्यास्तदन्वेषपरः पुरः । आलोकयं चमूं कांचित्काञ्चनोद्भासिभूषणाम् ॥ ४३३ ॥**

अन्वयः--तत् अन्वेषपरः पुर्याः पर्यंतं पर्यटन् ( अहं ) पुरः कांचन उद्भासि भूषणां कांचित् चमूं आलोकयं ॥ ४३३ ॥

अर्थः—तेने शोधवामां तत्पर थयेला, (अने तेथी) नगरनी आसपास भमता एवा में आगळ सुवर्णना तेजस्वी आभूषणोवाळी कोइक सेनाने जोइ. ॥ ४३३ ॥

**तदन्तर्भद्रदन्तीन्द्रपृष्ठारूढस्य कस्यचित् । करे तेनार्पि सा सोऽपि तां वामाङ्के न्यवीविशत् ॥ ४३४ ॥**

अन्वयः-तत् अंतः भद्र दंतींद्र पृष्ठ आरूढस्य कस्यचित् करे तेन सा अर्पि, सः अपि तां वामांगे न्यवीविशत् ॥ ४३४ ॥

अर्थः-ते सेनानी वचमां रहेला भद्रजातिना गजराजनी पीठपर बेठेला कोइक माणसना हाथमां ते माणसे तेणीने सोंपी, अने तेणे पण ते मारी राणीने ( पोताना ) खोळाना डाबी तरफना भागपर बेसाडी. ॥ ४३४ ॥

सा च वाचः सुदूरस्थं मां वीक्ष्य स्त्रीत्वलम्पटा । तदङ्गालिङ्गिनी वामकराङ्गुष्ठमनर्तयत् ॥ ४३५ ॥

अन्वयः—च मां वाचः सुदूरस्थं वीक्ष्य स्त्रीत्वलंपटा सा तत् अंग आलिंगिनी वाम कर अंगुष्ठं अनर्तयत् . ॥ ४३५ ॥

अर्थः-वळी मने वचनथी घणे दूर रहेलो जोइने स्त्री चरित्रमां प्रवीण एवी ते राणी ते पुरुषना शरीरने आलिंगन करीने (मारा तरफ पोताना) डाबा हाथनो अंगुठो नचाववा लागी. ॥ ४३५ ॥

तन्निरीक्ष्य विलक्षोऽहमेतच्चेतस्यचिन्तयम् । अहो महोदधिर्मोहमहिम्नां महिलाजनः ॥ ४३६ ॥

अन्वयः-तत् निरीक्ष्य विलक्षः अहं चेतसि एतत् अचिंतयं, अहो ! महिलाजनः मोह महिम्नां महोदधिः ! ॥ ४३६ ॥

अर्थः-ते जोइ विलखो थयेलो हुं मनमां एम विचारवा लाग्यो के, अहो ! स्त्रीओ तो मोहना प्रभावोना महासागर सरखी जणायछे

मदिराया गुणज्येष्ठा लोकद्वयविरोधिनी । कुरुते दृष्टमात्रापि महिला ग्रहिलं जनम् ॥ ४३७ ॥

अन्वयः—महिला मदिरायाः गुण ज्येष्टा, लोक द्वय विरोधिनी, दृष्टमात्रा अपि जनं ग्रहिलं कुरुते ॥ ४३७ ॥

अर्थः-स्त्री (खरेखर) मदिराथी पण चडीयाता प्रभाववाळी, तथा बन्ने लोक बगाडनारी छे, (केमके) दर्शनमात्रथीज (ते) पुरुषने गांडो बनावी मेले छे. ॥ ४३७ ॥

परापकाराहंकारि किं विषं सन्ति हि स्त्रियः । यत्सेवनभवस्तापः परत्रापि न शाम्यति ॥ ४३८ ॥

अन्वयः-पर अपकारी अहंकारि विषं किं? हि स्त्रियः संति, यत् सेवन भवः तापः परत्र अपि न शाम्यति. ॥ ४३८ ॥

अर्थः-परन्तु बुरुं करवामां गर्व धारण करनारुं कयुं झेर छे? तो के खरेखर स्त्रीओ (तेवां झेर रूप छे), के जेने सेववाथी उत्पन्न थयेलो ताप परलोकमां पण शांत थतो नथी. ॥ ४३८ ॥

स्त्रियां विषतनौ दक्षा लक्षणावैपरीत्यतः । सुधाकराद्यैरौपम्यं ददुस्तन्न जडा विदुः ॥ ४३९ ॥

अन्वयः-दक्षाः लक्षणा वैपरीत्यतः विषतनौ स्त्रियां सुधाकराद्यैः औपम्यं ददुः, तत् जडाः न विदुः. ॥ ४३९ ॥

अर्थः-कविओए तो विपरीत संबंधरूपे झेरी शरीरवाळी स्त्रीने (पण) चंद्रआदिकनी उपमाओथी अलंकृत करेली छे, ते हकीकतने अज्ञानी मूर्खो जाणी शक्या नथी. ॥ ४३९ ॥

विश्वासघातिनां मौलिरत्नं जानामि योषितः । नरकाब्धौ नरं प्रेम्णा परिरभ्य क्षिपन्ति याः ॥४४०॥

अन्वयः-जानामि, योषितः विश्वासघातिनां मौलिरत्नं, याः नरं प्रेम्णा परिरभ्य नरक अब्धौ क्षिपंति. ॥ ४४० ॥

अर्थः-हुं एम जाणुं छुं के, स्त्रीओ विश्वासघात करनाराओमां शिरोमणिसरखी छे, के जेओ पुरुषने प्रेमथी वळगी पडीने नरकरूपी महासागरमां फेंकी दे छे. ॥ ४४० ॥

अबला इति न स्त्रीभिः कर्तव्यं हस्तमेलनम् । हरन्ति जीवितं पुंसां संशये च क्षिपन्ति याः ॥ ४४१ ॥

अन्वयः—"अबला" इति स्त्रीभिः हस्तमेलनं न कर्तव्यं, याः पुंसां जीवितं हरंति, च संशये क्षिपंति. ॥ ४४१ ॥

अर्थः-आ "अबला" (निर्बल छे) एम धारीने स्त्रीओनी साथे हस्तमेलाप करवो नही, केमके तेओ पुरुषोना जीवितने (वीर्यने) हरे छे, तथा तेओने (प्राणसंबंधि) संशयमां नाखे छे. ॥ ४४१ ॥

**इयं हि मम रक्तस्य प्रतीचीव विवस्वतः । मानम्लानिं ददौ कां तु गतिं दातेति वेत्ति कः ॥ ४४२ ॥**

अन्वयः—विवस्वतः प्रतीची इव हि इयं रक्तस्य मम मानम्लानिं ददौ, गतिं तु कां दाता? इति कः वेत्ति? ॥ ४४२ ॥

अर्थः-सूर्यने जेम पश्चिम दिशाए, तेम खरेखर आ राणीए आसक्त (पक्षे—लाल रंगना ) एवा मने मानहानि आपी छे, अने (हजु) गति तो केवी आपशे? ते कोण जाणी शके एम छे? ॥ ४४२ ॥

**धिग्मामेतद्वशित्वेन शिवोदयनिरादरम् । घूकनेत्रमिव ध्वान्तमित्रत्वेनार्कनिःस्पृहम् ॥ ४४३ ॥**

अन्वयः—ध्वांत मित्रत्वेन अर्क निःस्पृहं घूकनेत्रं इव, एतद्वशित्वेन शिव उदय निरादरं मां धिक् ॥ ४४३ ॥

अर्थः—अंधकारनी मित्राइथी सूर्यनी इच्छा नही राखनारा घूवडना नेत्रनी पेठे, आ राणीने वश थइ मोक्षप्राप्तिमाटे बेदरकार रहेला एवा मने धिक्कार छे. ॥ ४४३ ॥

**एतद्वैराग्यतो नैतद्वैरं मुञ्चेऽधुना पुनः । कुलस्यापि कलङ्कः स्यादपमानो हि मानिनाम् ॥ ४४४ ॥**

अन्वयः—पुनः एतद् वैराग्यतः अधुना एतद्वैरं न मुंचे, हि अपमानतः मानिनां कुलस्य अपि कलंकः स्यात् ॥ ४४४ ॥

अर्थः—परंतु आवीरीतना वैराग्यथी हमणा तो आ वैरने छोडीश नही, केमके अपमान ( सहन करवाथी ) मानी माणसोना

कुलने कलंक लागे छे. ॥ ४४४ ॥

**यः प्रदत्ते हृदि पदं तमूर्ध्वं गिलति क्षणात् । अपमानेऽप्यनुद्योगी पङ्कादप्यधमः पुमान् ॥ ४४५ ॥**

अन्वयः—अपमाने अपि अनुद्योगी पुमान् पंकात् अपि अधमः, यः हृदि पदं दत्ते तं ऊर्ध्वं क्षणात् गिलति. ॥ ४४५ ॥

अर्थः-अपमान थयां छतां पण जे माणस तेनुं वेर लेवामाटे उद्यम नथी करतो, तेने कादवथी पण अधम (जाणवो), केमके जे कोइ तेनाहृदयपर पग मूके छे, तेवा उंचा माणसने पण (ते कादव) क्षणवारमां गळी जाय छे. ॥ ४४५ ॥

**क्षुद्रोऽप्युपद्रवं कुर्यान्निःकाममपमानितः । विदधुर्मधुहर्तारं विधुरं मधुमक्षिकाः ॥ ४४६ ॥**

अन्वयः—निःकामं अपमानितः क्षुद्रः अपि उपद्रवं कुर्यात्, मधुमक्षिकाः मधुहर्तारविधुरं विदधुः ॥ ४४६ ॥

अर्थः—नाहक अपमान पामेलो क्षुद्र माणी पण ( अपमान करनारने ) हेरान करे छे, केमके मधमाखो ( पण पोतानुं ) मध लेनारने व्याकुल करे छे. ॥ ४४६ ॥

**गृह्णन्तं रससर्वस्वं भास्वन्तं प्रत्यपक्रियाम् । कांचित्कर्तुमशक्तस्य पङ्कस्यापि स्फुटत्युरः ॥ ४४७ ॥**

अन्वयः—रस सर्वस्वं गृह्णांतं भास्वंतमति कांचित् अपक्रियां कर्तुं अशक्तस्य पंकस्य अपि उरः स्फुटति. ॥ ४४७ ॥

अर्थः-( पोतानां ) तमाम रसने चूसी लेता एवा सूर्यमतेनुं कंइ पण वैर वसुल न करी शकता एवा कादवनुं हृदय पण चीराइ जाय छे. ॥ ४४७ ॥

दूरे त्यजति मातापि परावज्ञासहं नरम् । क्षममप्यक्षमैर्बद्धं गजं विन्ध्याटवी यथा ॥ ४४८ ॥

अन्वयः-क्षमं अपि अक्षमैः बद्धं गजं यथा विंध्याटवी, (तथा) पर अवज्ञा सहं नरं माता अपि दूरे त्यजति. ॥ ४४८ ॥

अर्थः-समर्थ छतां पण असमर्थोए (मनुष्योए) बांधेला हाथीने जेम विंध्याचलनी अटवी (तजी दे छे, तेम ) परनु अपमान सहन करनारा पुरुषने ( तेनी ) माता पण दूर तजी दे छे. ॥ ४४८ ॥

तदेतस्यापमानाब्धेः पारं गत्वासिनौकया । संसारार्णवपाराय भजिष्ये पोतवद्व्रतम् ॥ ४४९ ॥

अन्वयः—तत् असि नौकया एतस्य अपमान अब्धेः पारं गत्वा संसार अर्णव पाराय पोतवत् व्रतं भजिष्ये. ॥ ४४९ ॥

अर्थः-माटे खड्गरूपी वहाणथी आ अपमानरूपी समुद्रनो पार पाम्याबाद, संसाररूपी समुद्रनो पार पामवामाटे ( हुं ) नावसरखा चारित्रनो स्वीकार करीश. ॥ ४४९ ॥

अपमानेऽपि चेद्गृह्णे व्रतं तन्मे निदर्शनात् । मत्पूर्वेषामपि भवत्येषा संभावना व्रते ॥ ४५० ॥

अन्वयः—चेत् अपमाने अपि व्रतं गृह्णे, तत् मे निदर्शनात् मत्पूर्वेषां अपि व्रते एषा संभावना भवति. ॥ ४५० ॥

अर्थः—कदाच अपमान थया छतां पण जो हुं चारित्र लेउं, तो मारा दाखलाथी मारा पूर्वजोनां चारित्रमाटे पण ( लोकोमां ) एवीरीतनीज संभावना थाय. ॥ ४५० ॥

यावदित्युद्धतध्यानस्त्यानचित्तोऽस्मि युद्धधीः । सैन्यसर्वाभिसारेण मन्मन्त्री तावदागमत् ॥ ४५१ ॥

अन्वयः—इति उद्धत ध्यान स्त्यान चित्तः यावत् युद्धधीः अस्मि, तावत् मन्मंत्री सैन्य सर्व अभिसारेण आगमत्. ॥४५१॥

अर्थः—एवी रीतना उद्धत विचारोमां चोटेलां मनवालो (हुं) जेवामां युद्धमाटे चिंतवन करुं छुं, तेवामां मारो मंत्री सैन्यनी सर्व सामग्रीसहित (त्यां) आवी पहोंच्यो ॥ ४५१ ॥

ततोऽन्तरस्फुरद्दूताविर्भूताद्भुतवैरयोः । मम तस्य च सेनाभिः समरः समवर्तत ॥ ४५२ ॥

अन्वयः—ततः अंतर स्फुरत् दूत आविर्भूत अद्भुत वैरयोः मम च तस्य सेनाभिः समरः समवर्तत. ॥ ४५२ ॥

अर्थः—पछी वच्चे जताआवता दूतोथी प्रगट थयेल छे घणुं वैर जेओने, एवां मारां अने ते पुरुषनां सैन्योवच्चे युद्ध थवा मांडयुं.

मिथो रथो रथं नागं नागोऽश्वोऽश्वं भटं भटः । समियाय समीकाय स्वकायव्ययनिर्भयः ॥ ४५३ ॥

अन्वयः—स्वकाय व्यय निर्भयः रथं रथः, नागं नागः, अश्वं अश्वः, भटं भटः मिथः समीकाय समियाय. ॥ ४५३ ॥

अर्थः-(पछी) पोतानां शरीरना विनाशनो भय राख्याविनाज रथसामे रथ, हाथी सामे हाथी, घोडासामे घोडो, अने सुभट-सामे सुभट, एम परस्पर युद्ध करवामाटे गोठवाइ गया. ॥ ४५३ ॥

समनम्यत कोदण्डैः खड्गण्डैरकम्प्यत । तत्र रौद्रे रणोद्रेके न तु शौर्योद्भटैर्भटैः ॥ ४५४ ॥

अन्वयः-तत्र रौद्रे रण उद्रेके कोदंडैः समनम्यत, खड्गदंडैः अकंप्यत, तु शौर्य उद्भटैः भटैः न. ॥ ४५४ ॥

अर्थः-ते भयंकर रणसंग्राम होते छते धनुष्यो नमवा लाग्यां, तथा तलवारो कंपवा (चमकवा) लागी, परंतु शौर्यना आवेशवाळा

सुभटो नम्या के कंप्या नही. ४५४ ॥

वपुषो निखिलस्यापि शक्त्या मुष्टिप्रविष्टया । दृढयन्तः प्रहरणान्यहितान्प्राहरन्भटाः ॥ ४५५ ॥

अन्वयः—निखिलस्य अपि वपुषः मुष्टि प्रविष्टया शक्त्या प्रहरणानि दृढयंन्तः भटाः अहितान् प्राहरन्. ॥ ४५५ ॥

अर्थः—आखांये शरीरनी मुठीमां आवेली शक्तिवडे हथीयारोने मजबूत पकडीने सुभटो शत्रुओने प्रहार करवा लाग्या. ॥४५५॥

तादृग्युद्धश्रिया धन्यंमन्यो मन्योर्वशं गतः । प्रहारेषु लगत्स्वङ्गं भटः कण्टकितं दधौ ॥ ४५६ ॥

अन्वयः—तादृग् युद्ध श्रिया धन्यंमन्यः, मन्योः वशं गतः सुभटः प्रहारे लगत्सु कंटकितं अंगं दधौ. ॥ ४५६ ॥

अर्थः-तेवा प्रकारनी युद्धलक्ष्मीथी ( पोताने ) भाग्यशाली मानतो, तथा क्रोधने वश थयेलो सुभट ( शस्त्रोना ) प्रहारो लागतां रोमांचित शरीरने धारण करवा लाग्यो. ॥ ४५६ ॥

विलुठत्तुरगव्रातं पतन्मातङ्गमण्डलम् । त्रुटच्छकटसंधानबन्धं नृत्यत्कबन्धकम् ॥ ४५७ ॥

लोलत्कीलालकल्लोलमालिनीमण्डलं ततः । पक्षद्वयक्षयकरं प्रावर्धत रणक्षणम् ॥ ४५८ ॥ युग्मम् ॥

अन्वयः—ततः विलुठत् तुरग व्रातं, पतत् मातंग मंडलं, त्रुटत् शकट संधान बंधं, नृत्यत् कबंधकं, ॥४५७॥ लोलत् कीलाल कल्लोल मालिनी मंडलं, पक्ष द्वय क्षय करं रणक्षणं प्रावर्धत. ॥ ४५८ ॥

अर्थः—पछी ( त्यां घोडाओना समूहो ( घायल थइ ) लोटवा लाग्या, हाथीओनां टोळां पडवा लाग्यां, साल, बंधनो विगेरे

तुटी जवाथी रथोना चूरेचूरा थवा लाग्या, धडो नाचवा लाग्यां, ॥ ४५७ ॥ अने रुधिरनीन दीओ चालवा लागी, एवी रीते बन्ने पक्षोनो विनाश करनारो रणसंग्रामनो महोत्सव वृद्धि पामवा लाग्यो. ॥ ४५८ ॥ युग्मं. ॥

**भ्राजिष्णुभूरितेजस्कैः क्रमान्मत्पृतनाः परैः । कर्शयामासिरे ग्रीष्मवासरैरिव रात्रयः ॥ ४५९ ॥**

अन्वयः-क्रमात् भ्राजिष्णु भूरि तेजस्कैः परैः ग्रीष्मवासरैः रात्रयः इव मत्पृतनाः कर्शयामासिरे. ॥ ४५९ ॥

अर्थः-अनुक्रमे घणा चळकता तेजवाळा एवा ते शत्रुओए, उनाळाना (लांबा) दिवसो जेम रात्रिओने ( टुंकी करे ) तेम मारी सेनाओने टुंकी करी नाखी. ॥ ४५९ ॥

**राजवाह्यमथारुह्य जवादिभविभुं विभीः । अहं तेन सह क्रुद्धो द्वन्द्वयुद्धोत्सुकोऽमिलम् ॥ ४६० ॥**

अन्वयः—अथ जवात् राजवाह्यं इभविभुं आरुह्य, विभीः क्रुद्धः अहं द्वंद्व युद्ध उत्सुकः तेन सह अमिलं. ॥ ४६० ॥

अर्थः—पछी एकदम राजाने चडवाना पट्टहस्तीपर चडीने, निर्भय थइने, तथा क्रोध पामीने हुं द्वंद्वयुद्ध करवामाटे उत्कंठित थइ तेनी साथे मळ्यो. ॥ ४६० ॥

**मयि मुञ्चति नाराचवीचीर्दक्षेण रक्षितः । तेनात्मा च गजेन्द्रश्च तलवर्गश्च मार्गणैः ॥ ४६१ ॥**

अन्वयः-मयि नाराचवीचीः मुंचति, तेन दक्षेण मार्गणैः आत्मा च गजेंद्रः च तलवर्गः च रक्षितः. ॥ ४६१ ॥

अर्थः-हुं ( ज्यारे ते शत्रुतरफ ) बाणोनी श्रेणिओ छोडवा लाग्यो, त्यारे ते चतुर शत्रुए ( पोते छोडेलां ) बाणोवडे ( पोताना )

आत्मानुं, हस्तिराजनुं, तथा नीचे रहेला सैन्यसमूहनुं अथवा बख्तरनुं रक्षण कर्युं. (तलवर्ग एटले धनुर्धरोनुं चामडानुं बखतर)

**स तु निर्नाशयामास मार्गणानां गणैः क्षणात् । मद्बलं सकलं भानुर्भचक्रमिव भानुभिः ॥ ४६२ ॥**

अन्वयः—भानुः भानुभिः भचक्रं इव, सः तु मार्गणानां गणैः सकलं मद्बलं क्षणात् निर्नाशयामास. ॥ ४६२ ॥

अर्थः-(पछी) सूर्य (पोतानां) किरणोवडे जेम ताराओना समूहनो (नाश करे छे) तेम तेणे तो बाणोना समूहोवडे मारां सर्व सैन्यनो क्षणवारमां विनाश करी नाख्यो. ॥ ४६२ ॥

**यद्यदस्त्रं मयामोचि तत्तदेष क्षणादपि । छेकश्चिच्छेद सद्यस्कं भवत्कर्मेव केवली ॥ ४६३ ॥**

अन्वयः-मया यत् यत् अस्त्रं अमोचि, तत् तत् छेकः एषः, केवली सद्यस्कं भवत्कर्म इव क्षणात् अपि चिच्छेद. ॥ ४६३ ॥

अर्थः-में जे जे शस्त्र फेंक्युं, ते ते शस्त्रने ते चालाक शत्रुए, केवली जेम तुरत भवोपग्राही कर्मने छेदे, तेम क्षणवारमां छेदी नाख्युं. ॥ ४६३ ॥

**पतत्यथ तदस्त्रार्ते गजे क्षीणाखिलायुधः । अस्त्रयन्मुष्टिमुत्प्लुत्यागमं तदिभमूर्धनि ॥ ४६४ ॥**

अन्वयः-अथ तत् अस्त्र आर्ते गजे पतति, क्षीण अखिल आयुधः, मुष्टिं अस्त्रयन् उत्प्लुत्य तत् इभ मूर्धनि आगमं ॥४६४॥

अर्थः—पछी तेना शस्त्रोनी वेदनाथी (मारो) हाथी पड्याबाद, सर्व शस्त्रो खलास थइ जवाथी, मूठीने शस्त्ररूप करी, उछळीने (हुं) तेना हाथीना मस्तकपर आव्यो. ॥ ४६४ ॥

धृत्वाथ हस्तयोस्तेन क्षिपन्पादाहतीरहम् । उत्क्षिप्तः पतितो दूरे यन्त्रोत्थग्रावगोलवत् ॥ ४६५ ॥

अन्वयः-अथ पाद आहतीः क्षिपन् अहं तेन हस्तयोः धृत्वा उत्क्षिप्तः, यंत्र उत्थ ग्राव गोलवत् दूरे पतितः ॥ ४६५ ॥

अर्थः-पछी लातो मारता एवा मने ते शत्रुए बे हाथे पकडीने उंचे उछाळ्यो, ( अने तेथी ) गोफणमांथी उछाळेला पत्थरना गोळानीपेठे हुं दूर जइ पड्यो. ॥ ४६५ ॥

सहसा सह सेनाभिः प्राविशन्मत्पुरं स तत् । तन्वन्साकं तयोत्तालहस्ततालः कथा मिथः ॥ ४६६ ॥

अन्वयः-तया साकं उत्ताल हस्त तालः मिथः कथाः तन्वन् सः सहसा सेनाभिः सह तत् मत्पुरं प्राविशत्. ॥ ४६६ ॥

अर्थः-(पछी मारी) ते राणीनी साथे म्होटा अवाजथी हाथवडे ताडीओ देइ परस्पर वातो करतो ते शत्रु एकदम (पोताना) सैन्यसहित मारां ते नगरमां दाखल थयो. ॥ ४६६ ॥

एवमालोकमानोऽहमपमानोच्चयाकुलः । इष्टमिष्टतमेभ्योऽपि गणयन्मरणं तदा ॥ ४६७ ॥

यद्यस्ति सुकृतं किंचिन्मम तत्तन्निदानतः । मा भूद्भवान्तरेऽपि स्त्रीसङ्गः सत्पथभङ्गकृत् ॥ ४६८ ॥

इत्यालपन्पुरः प्रेक्ष्य कूपं तत्र पपात च । सभान्तर्भद्रपीठस्थं स्वं ददर्श च पूर्ववत् ॥ ४६९ ॥

अन्वयः—तदा एवं आलोकमानः, अपमान उच्चय आकुलः अहं मरणं इष्टतमेभ्यः अपि इष्टं गणयन्, ॥ ४६७ ॥ यदि मम

किंचित् सुकृतं अस्ति, तत् तन्निदानतः भवांतरे अपि सत्पथ भंगकृत् स्त्रीसंगः माभूत्, ॥ ४६८ ॥ इति आलपन् च पुरः कूपं प्रेक्ष्य तत्र पपात, च स्वं पूर्ववत् सभांतः भद्रपीठस्थं ददर्श. ॥ ४६९. ॥ त्रिभिर्विशेषकं ॥

अर्थः—ते समये आवी रीते जोतो, तथा अपमानना समूहथी व्याकुल थयेलो हुं मृत्युने व्हालामां व्हालुं गणतोथको, ॥४६७॥ जो मारुं (हजु) कंइंक पुण्य (बाकी) होय, तो तेना नियाणाथी भवांतरमां पण, उत्तम मार्गनो विनाश करनारो स्त्रीसंग ( मने ) न थजो, ॥ ४६८ ॥ एम बोलतो थको आगळना भागमां कुवाने जोइ तेमां पड्यो, परंतु (हुं) पोताने पूर्वनीपेठेज राजसभानी अंदर सिंहासनपर बेठेलो जोवा लाग्यो. ॥ ४६९ ॥ त्रिभिर्विशेषकं ॥

**ये युधि क्रुधि दुर्धर्षाः क्षताः प्रपतिता मृताः । तानक्षतानहं संसद्यपश्यं पार्श्वतो भटान् ॥ ४७० ॥**

अन्वयः—क्रुधि दुर्धर्षाः ये युधि क्षताः, प्रपतिताः, मृताः तान् भटान् अहं संसदि पार्श्वतः अक्षतान् अपश्यं. ४७० ॥

अर्थः—क्रोधने लीधे न पकडी शकाय एवा जे सुभटो युद्धमां घायल थया हता, मूर्छित थया हता, तथा मरण पाम्या हता, ते सुभटोने हुं सभामां चोतरफ अक्षत शरीरवाळा (जीवता) जोवा लाग्यो. ॥ ४७० ॥

**ये दृष्टाः संगरे पिष्टास्तेषामशृणवं रवम् । हस्तिनां हस्तिशालासु वाजिशालासु वाजिनाम् ॥ ४७१ ॥**

अन्वयः—ये संगरे पिष्टाः दृष्टाः, तेषां हस्तिनां हस्तिशालासु, वाजिनां वाजिशालासु रवं अशृणवं. ॥ ४७१ ॥

अर्थः—जेओने रणसंग्राममां में नाश पामेला जोया हता, ते हाथीओना हस्तिशालाओमां, तथा ते घोडाओना घोडाशालोमां

(थता) शब्दोने हुं सांभळवा लाग्यो. ॥ ४७१ ॥

अन्तरन्तःपुरं यावत्क्षिप्ता दृक्तावदैक्ष्यत । तदालिमाला तादृक्तत्प्रतिकर्मक्रियोन्मुखी ॥ ४७२ ॥

अन्वयः—यावत् अंतः अंतःपुरं दृक् क्षिप्ता, तावत् तादृक् तत् प्रतिकर्म क्रिया उन्मुखी तत् आलिमाला ऐक्ष्यत. ॥ ४७२ ॥

अर्थः—( पछी ) जेवामां में अंतेउर तरफ नजर करी, तेवामां तेवी तेज राणीनी आसनावासनानी क्रिया करती एवी तेणीनी सखीओनी श्रेणि मारा जोवामां आवी. ॥ ४७२ ॥

इत्यद्भुतधुतस्वान्ते मयि कान्तेन तेजसा । अर्कं कर्करयन्कश्चिदाविरासीत्पुरः सुरः ॥ ४७३ ॥

अन्वयः—इति अद्भुत धुत स्वांते मयि, कांतेन तेजसा अर्कं कर्करयन् कश्चित् सुरः पुरः आविरासीत्. ॥ ४७३ ॥

अर्थः—एवी रीतना आश्चर्यमां मारुं हृदय व्याकुल थतां, मनोहर तेजथी सूर्यने पण कांकरासरखो करतो कोइक देव मारी आगळ प्रगट थयो. ॥ ४७३ ॥

तद्विलोकादहं जातजातिस्मृतिरचिन्तयम् । प्राग्जातौ धनधन्याख्यौ सुहृदावहमेष च ॥ ४७४ ॥

अन्वयः—तद्विलोकात् जात जाति स्मृतिः अहं अचतिंयं, प्राग् जातौ अहं च एषः धन धन्याख्यौ सुहृदौ. ॥ ४७४ ॥

अर्थः—तेने जोवाथी थयेल छे जातिस्मरण ज्ञान जेने, एवो हुं विचारवा लाग्यो के, पूर्वभवमां हुं अने आ देव धन अने धन्यनामना मित्रो हता. ॥ ४७४ ॥

अनेन सह संसारनिःसारत्वविचारवान् । व्रतान्निरर्गलस्वर्गलक्ष्मीभोगमुपार्जयम् ॥ ४७५ ॥

अन्वयः—अनेन सह संसार निःसारत्व विचारवान् व्रतात् निरर्गल स्वर्ग लक्ष्मी भोगं उपार्जयं. ॥ ४७५ ॥

अर्थः—आ मित्रनीसाथे संसारना असारपणानो विचार करी चारित्र लेवाथी में अस्खलित स्वर्ग लक्ष्मीनुं सुख मेळव्युं हतुं ४७५

अभ्यर्थितोऽयमाश्लिष्य दिवः प्राक् च्यवता मया । उद्धर्तव्यस्त्वया सोऽहं भवे मोहार्णवादिति ॥४७६॥

अन्वयः—दिवः प्राक् च्यवता मया अयं आश्लिष्य इति अभ्यर्थितः, सः अहं भवे मोह अर्णवात् त्वया उद्धर्तव्यः. ॥ ४७६ ॥

अर्थः-देवलोकमांथी प्रथम चवता एवा में आ मित्रने भेटीने एवी प्रार्थना करी हती के, मने आ संसारमाना मोहरूपी महासागरमांथी तारे ओधरवो. ॥ ४७६ ॥

तन्नूनममुनैवाहं घटयित्वेति नाटकम् । बोधितो बोधदुग्धानामन्धुना बन्धुनाधुना ॥ ४७७ ॥

अन्वयः-तत् नूनं अधुना बोध दुग्धानां अंधुना अमुना बंधुना एव इति नाटकं घटयित्वा अहं बोधितः. ॥ ४७७ ॥

अर्थः-माटे खरेखर हमणा ज्ञानरूपी दूधना कुवा सरखा एवा आ बंधुएज आवा प्रकारनुं नाटक भजवीने मने बोध पमाड्यो छे.

इत्युत्थाय मया प्रीत्या सत्कृतः स तिरोऽभवत् । अहं च प्राव्रजं मङ्क्षु भवारण्यं विलङ्घितुम् ॥ ४७८॥

अन्वयः—इति उत्थाय मया प्रीत्या सत्कृतः सः तिरोऽभवत्, च अहं भव अरण्यं विलंघितुं मंक्षु प्राव्रजं. ॥ ४७८ ॥

अर्थः—एम विचारी उठीने में आनंदथी सत्कार कर्याबाद ते देव अदृश्य थयो, अने में आ संसाररूपी अटवीने ओळंगी जवा माटे तुरत चारित्र ग्रहण कर्युं. ॥ ४७८ ॥

**ईदृक्चरित्रश्रवणाद्भवभीतो भुवः पतिः । राज्ये जामातरं न्यस्य व्रतव्रततिभूरभूत् ॥ ४७९ ॥**

अन्वयः–ईदृक् चरित्र श्रवणात् भव भीतः भुवः पतिः जामातरं राज्ये न्यस्य व्रत व्रतति भूः अभूत्. ॥ ४७९ ॥

अर्थः–एवी रीतनु ( ते मुनिनुं ) चरित्र सांभळवाथी संसारथी डरेलो ( ते ) राजा ( पोताना ) जमाइने ( रतिसार कुमारने ) राज्यपर बेसाडीने चारित्ररूपी वेलडीने भूमिरूप थयो. (अर्थात् तेणे चारित्र अंगीकार कर्युं.) ॥ ४७९ ॥

**नृपे विरतिसारेऽथ रतिसारेण भूभुजा । व्योमेव व्योमरत्नेन तेन राज्यमराज्यत ॥ ४८० ॥**

अन्वयः—अथ नृपे विरतिसारे व्योमरत्नेन व्योम इव तेन रतिसारेण भूभुजा राज्यं अराज्यत. ॥ ४८० ॥

अर्थः—हवे राजाए चारित्र लीधाबाद, सूर्यवडे जेम आकाश, तेम ते रतिसारनामना राजावडे राज्य शोभवा लाग्युं. ॥ ४८० ॥

**नृपाज्ञाकृज्जनध्वंसी नृपध्वंसीव दीव्यति । निरायुधं वधं राज्ञामाज्ञाभङ्गं विदुर्विदः ॥ ४८१ ॥**

**तन्मल्लोकद्रुहां सद्यो विपदो मद्द्रुहामिव । भविष्यन्तीति देशान्तस्तेनाताड्यत डिण्डिमः ।४८२।युग्मम्।**

अन्वयः—नृप आज्ञा कृत् जन ध्वंसी नृपध्वंसी इव दीव्यति, विदः राज्ञां आज्ञा भंगं निरायुधं वधं विदुः, ॥ ४८१ ॥ तत् मल्लोकद्रुहां मद्द्रुहां इव सद्यः विपदः भविष्यंति, इति तेन देशांतः डिंडिमः अताड्यत ॥ ४८२ ॥ युग्मं ॥

अर्थः—राजानी आज्ञा पाळनारा माणसनो घात करनारो माणस राजाना खुनी तरीके लेखाय छे, केमके विद्वानोए राजानी आज्ञाना भंगने हथियारविनानो वधज गण्यो छे, ॥ ४८१ ॥ माटे मारी प्रजानुं बूरुं करनाराओने, मारुं बूरुं करनारा तरीके लेखीने ( तेओने ) तुरत घातकी शिक्षा करवामां आवशे, एवीरीतनो ते रतिसार राजाए देशमां डंडेरो वगडाव्यो. ॥ ४८२ ॥

**तत्तत्पुण्यप्रभावेण तदैवोद्गच्छदापदः । देशे तस्य परार्तिभ्यो विन्यवर्तन्त जन्तवः ॥ ४८३ ॥**

अन्वयः—तत् तत्पुण्य प्रभावेण तस्य देशे तदा एव उद्गच्छत् आपदः जंतवः पर आर्तिभ्यः विन्यवर्तंत. ॥ ४८३ ॥

अर्थः—ते डंडेराथी ते राजाना पुण्यना प्रभाववडे तेना देशमां तेज वखते दूर गइ छे विपत्तिओ जेमनी एवा प्राणीओ परतरफनी पीडाथी फारेग थइ गया. ( अर्थात् कोइकोइने दुःख देवा न लाग्युं ) ॥ ४८३ ॥

**सर्वा अपि स्त्रियः सत्यः सत्यवाक्सकलो जनः । मलिम्लुचो न च क्वापि कार्पेयं न च कस्यचित् ॥४८४॥**

अन्वयः—सर्वाः अपि स्त्रियः सत्यः, सकलः जनः सत्यवाक् च क्व अपि मलिम्लुचः न, च कस्यचित् कार्पेयं न. ॥ ४८४ ॥

अर्थः—सघळी स्त्रीओ सतीव्रत पाळवा लागी, सर्व लोको सत्यवादी थया, तथा क्यांइ पण चोर (जोवामां ) न आव्यो, अने कोइनी ठगाइ पण (देखाणी) नही. ॥ ४८४ ॥

**अपि केलिषु नो बालैरुत्तालैः कलहायितम् । युवभिः स्नेहद्रोहोऽपि कलहो गलहस्तितः ॥ ४८५ ॥**

अन्वयः—केलिषु उत्तालैः बालैः अपि कलहायितं न, युवभिः स्नेह द्रोहः कलहः अपि गलहस्तितः ॥ ४८५ ॥

अर्थः—रमतोमां तल्लीन थयेला बाळकोए ( पण परस्पर ) कलह कर्यो नही, अने युवानोए तो स्नेहनो भंग करनारा क्लेशने पण ( दूर ) हडसेली मेल्यो. ॥ ४८५ ॥

तिर्यञ्चोऽपि विषाणाद्यैर्न चक्रुः कस्यचिद्व्यथाम् । आत्मभोगास्पदं रोगा न च किंचिदतन्वत ॥ ४८६ ॥

अन्वयः-तिर्यंचः अपि विषाण आद्यैः कस्यचित् व्यथां न चक्रुः, च रोगाः आत्म भोग आस्पदं किंचित् न अतन्वत. ॥४८६॥

अर्थः—पशुओ पण शिंगडां आदिकथी कोइने पण पीडा करवा न लाग्या, अने रोगो (पण) मरणांत कष्टरूप कोइ पण प्रकारनो उपद्रव करवा न लाग्या. ॥ ४८६ ॥

न कोऽप्यास्कन्दि माद्यद्भिर्व्यन्तराद्यैरपि क्वचित् । चुल्लीन्धनेष्वपि ज्वालाजिह्वो मर्यादयाऽज्वलत् ॥४८७॥

अन्वयः—माद्यद्भिः व्यंतराद्यैः अपि क्वचित् कः अपि न आस्कंदि, ज्वालाजिह्वः चुल्ली इंधनेषु अपि मर्यादया अज्वलत्.

अर्थः—उन्मत्त एवा व्यंतर आदिको पण क्यांये कोइने पण उपद्रव करवा न लाग्या, अने अग्नि चूलाना बळतणमां पण मर्यादाथीज बळवा लाग्यो. ॥ ४८७ ॥

पान्थवृन्दखिदामात्रजायुभिर्वायुभिर्ववे । ददौ सरः कृषिफलं काले वारि च वारिदः ॥ ४८८ ॥

अन्वयः—पांथ वृंद खिदा मात्र जायुभिः वायुभिः ववे, सरः कृषिफलं, च वारिदः काले वारि ददौ. ॥ ४८८ ॥

अर्थः—वळी मुसाफरोना समूहनो फक्त थाक उतारवामाटेना औषधसरखोज वायु वावा लाग्यो, तळावो खेतीने फलद्रूप करवा

लाग्यां, अने वरसाद (पण) योग्य अवसरे जल देवा लाग्यो. ॥ ४८८ ॥

**सकृत्सिक्तापि विस्फारं पफाल सरसा रसा । तमःशममितं चांशुस्तोमं व्योममणिर्व्यधात् ॥ ४८९ ॥**

अन्वयः—सकृत् सिक्ता अपि सरसा रसा विस्फारं पफाल, च व्योममणिः तमःशममितं अंशुस्तोमं व्यधात्. ॥ ४८९ ॥

अर्थः—एकवार सिंच्याथी पण रसाल थयेली जमीन विस्तारथी फालवा लागी, अने सूर्य पण फक्त अंधकारनो नाश थवा जेटलोज किरणोनो समूह फेलाववा लाग्यो. ॥ ४८९ ॥

**इति प्रभावमुद्भाव्य रतिसारस्य भूपतेः । सर्वेऽप्युर्वीभृतः स्वोर्व्यां तस्यैवाज्ञामवर्तयन् ॥ ४९० ॥**

अन्वयः—इति रतिसारस्य भूपतेः प्रभावं उद्भाव्य सर्वे अपि ऊर्वीभृतः स्व ऊर्व्यां तस्य एव आज्ञां अवर्तयन्. ॥ ४९० ॥

अर्थः—एवी रीतनो रतिसार राजानो प्रभाव जाणीने सघळा राजाओ पोतपोताना राज्यमां तेनीज आज्ञा प्रवर्तावना लाग्या. ४९०

**सुभूमस्तत्पिताप्येवं श्रुत्वा माहिष्मतीपतिः । स्वदेशे न्यस्य तस्याज्ञां हृष्टोऽमुत्रहितं व्यधात् ॥ ४९१ ॥**

अन्वयः—माहिष्माती पतिः तत्पिता सुभूमः अपि एवं श्रुत्वा हृष्टः स्वदेशे तस्य आज्ञां न्यस्य अमुत्रहितं व्यधात्. ॥४९१॥

अर्थः—माहिष्मती नगरीनो राजा एवो तेनो पिता सुभूम पण आ वृत्तांत सांभळीने खुशी थयो थको पोताना देशमां (पण) ते रतिसारराजानी आज्ञा स्थापीने परलोकनुं हित करवा लाग्यो. ॥ ४९१ ॥

तस्याज्ञा यत्र यत्रेन्दोः कौमुदीव स्फुटाभवत् । न तापतमसां भूमिः सा सा भूमिरजायत ॥ ४९२ ॥

अन्वयः–यत्र यत्र इन्दोः कौमुदी इव तस्य आज्ञा स्फुटा अभवत्, सा सा भूमिः ताप तमसां भूमिः न अजायत. ॥ ४९२ ॥

अर्थः––ज्यां ज्यां चंद्रनी चांदनी सरखी तेनी आज्ञा प्रगट थइ, ते ते भूमि संताप अने अंधकारना (गेरव्यवस्थाना) स्थानरूप न रही. ॥ ४९२ ॥

इति क्रमादशेषायां क्षमायां तच्छासनस्पृशि । बभूव धर्मनिर्माणेऽलंकर्मीणोऽखिलो जनः ॥ ४९३ ॥

अन्वयः—इति क्रमात् अशेषायां क्ष्मायां तत् शासनस्पृशि अखिलः जनः धर्मनिर्माणे अलंकर्मीणः बभूव. ॥ ४९३ ॥

अर्थः–एवीरीते अनुक्रमे समस्त पृथ्वीपर तेनी आज्ञा वर्तवाथी सघळा लोको धर्मकार्य करवामां समर्थ थया. ॥ ४९३ ॥

इत्यशेषां स्मितामेष चिरकालमपालयत् । प्रदत्तनरकद्वारं भग्नस्वर्गार्गलं भुवम् ॥ ४९४ ॥

अन्वयः–इति स्मितां अशेषां भुवं एषः प्रदत्त नरक द्वारं, भग्न स्वर्ग अर्गलं चिरकालं अपालयत्. ॥ ४९४ ॥

अर्थः—एवीरीते आनंदित थयेली एवी समस्त पृथ्वीनुं ते रतिसारराजाए चिरकाल पर्यंत (एवीरीते) पालन कर्युं. के जेथी नरकना दरवाजा बंध थया, अने स्वर्गना दरवाजानी अर्गला त्रुटी गइ. (अर्थात् सर्व लोको पुण्य उपार्जन करी स्वर्गगामी थया.)

कदापि कौतुकागारे प्रियाणां तिसृणां मुखम् । विलोकयन्नयं प्राप कामं कामपि निर्वृतिम् ॥ ४९५ ॥

अन्वयः—कदापि कौतुकागारे तिसृणां प्रियाणां मुखं विलोकयन् अयं कामं कां अपि निर्वृतिं प्राप. ॥ ४९५ ॥

अर्थः-एक दिवसे रंगमेहेलमां त्रणे राणीओनां मुख जोतो एवो ते राजा सहेजमां आश्चर्यकारक आनंदने अनुभववा लाग्यो ॥४९५॥

**इन्दुहृद्ये मुखे भाति चान्दनं चित्रकं न ते । विलुप्य तन्वि तेनेदं कुर्वे कस्तूरिकामयम् ॥ ४९६ ॥**

**इत्युक्त्वा सात्त्विकस्वेदजलार्द्रैरङ्गुलीदलैः । भूपो लुलोप सौभाग्यमञ्जर्या वर्यकान्ति तत् ।४९७।युग्मम्।**

अन्वयः—(हे) तन्वि ! ते इंदुहृद्ये मुखे चांदनं चित्रकं न भाति, तेन इदं विलुप्य कस्तूरिकामयं कुर्वे, ॥ ४९६ ॥ इति उक्त्वा भूपः सात्त्विक स्वेद जल आर्द्रैः अंगुलीदलैः सौभाग्यमंजर्याः वर्यकांति तत् लुलोप. ॥ ४९७ ॥ युग्मं ॥

अर्थः—हे तन्वि ! तारा चंद्रसरखा मनोहर मुखपर चंदननी पीळ शोभती नथी, माटे ते भुंसीने हुं कस्तूरीनी पीळ करुं, ॥४९६॥ एम कही ते राजाए स्वाभाविक पसीनाना जळथी भीनी एवी ( पोतानी ) आंगळीओवडे सौभाग्यमंजरीनी मनोहर कांतिवाळी ते पीळ भुंसी नाखी. ॥ ४९७ ॥ युग्मं ॥

**अथापतिलका तारशृङ्गारप्रसरापि सा । अस्तेन्दुः स्फारतारापि रजनीव रराज न ॥ ४९८ ॥**

अन्वयः—अथ तार शृंगार प्रसरा अपि अपतिलका सा, स्फारतारा अपि अस्तइंदुः रजनी इव न रराज. ॥ ४९८ ॥

अर्थः—पछी मनोहर शृंगारना समूहवाळी छतां पण तिलक ( पीळ ) विनानी ते, विस्तीर्ण तारायुक्त छतां पण चंद्रविनानी रात्रिनीपेठे शोभवा न लागी. ॥ ४९८ ॥

पुण्ड्रेणैकेन हीनापि यन्निःश्रीकेयमीक्ष्यते । तद्विराजिष्यते कीदृग्मुक्तनिःशेषभूषणा ॥ ४९९ ॥

अन्वयः—एकेन पुंड्रेण हीना अपि इयं यत् निःश्रीका ईक्ष्यते, तत् मुक्त निःशेष भूषणा कीदृग् विराजिष्यते !! ॥४९९॥

अर्थः—फक्त एक तिलक विना पण आ राणी जे शोभारहित देखाय छे, तो सर्व आभूषणो तजी दीधाबाद ते केवीक शोभी निकळशे !! ४९९ ॥

इति ध्यात्वा विरागोर्मिवर्मितस्वान्तवार्धिना । नृपेण स्वकरेणास्याः क्रमाद्भूषाभरो हृतः ॥५००॥युग्मम्॥

अन्वयः-इति ध्यात्वा विराग ऊर्मि वर्मित स्वांत वार्धिना नृपेण क्रमात् स्वकरेण अस्याः भूषाभरः हृतः. ॥ ५०० ॥

अर्थः-एम विचारीने वैराग्यरूपी मोजांओथी भरेलो छे हृदयरूपी समुद्र जेनो, एवा ते राजाए अनुक्रमे पोताना हाथथी तेणीना आभूषणोनो समूह उतारी लीधो. ॥ ५०० ॥ युग्मं ॥

ततो हृतशिरोरत्नां निशि निर्दीपसद्मवत् । आकृष्टकुण्डलद्वन्द्वां द्यामिवास्तेन्दुभास्कराम् ॥ ५०१ ॥

गतहारां सुरागारद्वारं निस्तोरणामिव । अकेयूरभुजां लुनपद्मोर्मिसरसीमिव ॥ ५०२ ॥

अकङ्कणकरां वल्लिमुक्तवृक्षां वनीमिव । क्वणन्मञ्जीरहीनांह्रिमहंसाब्जामिवाब्जिनीम् ॥ ५०३ ॥

एवं निरस्तनिःशेषभासमानविभूषणाम् । दलपुष्पफलत्यक्तां फाल्गुनीयां लतामिव ॥ ५०४ ॥

तां पश्यन्नान्तरेणाक्ष्णा स दध्यौ नास्ति कुत्रचित् । अप्रक्षालितशुद्धाङ्गः कोऽप्यभूषितभासुरः ॥५०५॥

अन्वयः—ततः हृत शिरोरत्नां निशि निर्दीप सद्मवत्, आकृष्ट कुंडलद्वंद्वां अस्त इन्दु भास्करां द्यां इव ॥ ५०१ ॥ गत हारां निस्तोरणां सुरागारद्वारं इव, अकेयूर भुजां लून पद्म ऊर्मि सरसीं इव, ॥ ५०२ ॥ अकंकण करां वल्लिमुक्त वृक्षां वनीं इव, क्वणत् मंजीर हीन अंह्रिं अहंसाब्जां अब्जिनीं इव, ॥५०३॥ एवं निरस्त निःशेष भासमान विभूषणां दल पुष्प फल त्यक्तां फाल्गुनीयां लतां इव, ॥ ५०४ ॥ तां आंतरेण अक्ष्णा पश्यन् सः दध्यौ, कुत्रचित् अप्रक्षालित शुद्ध अंगः, अभूषित भासुरः कः अपि नास्ति ५०५.

अर्थः—पछी मुकुट उतारी लीधा बाद रात्रिए दीपकविनाना घरसरखी, बन्ने कुंडलो उतार्याबाद चंद्रसूर्यविनाना आकाश जेवी ॥ ५०१ ॥ हार उतार्याबाद तोरण रहित देवमंदिरना द्वार सरखी, हाथना बाजुबंध उतार्याबाद कमलरहित मोजांओवाळी तलावडीसरखी ॥ ५०२ ॥ हाथोमांथी कंकणो उतार्याबाद वेलरहित वृक्षोवाळा बगीचासरखी, पगमांथी झंकार करता झांझरो उतार्याबाद हंसकमलविनानी कमलिनीसरखी, ॥५०३॥ एवीरीते सघळां चळकतां आभूषणो उतारी लीधाबाद पत्र, पुष्प अने फल रहित थयेली फागणमासनी वेलडी सरखो, ॥ ५०४ ॥ एवी ते राणीने अंतरचक्षुथी जोतो एवो ते रतिसार राजा विचारवा लाग्यो के, क्यांये पण धोया विनाना शुद्ध शरीरवाळो, तथा आभूषण विना शोभतो कोइ पण ( जोवामां आवतो) नथी. ॥ ५०५ ॥

का वान्यस्य कथात्मापि धौतकर्मावलीमलः । ज्ञानदर्शनचारित्रैर्भाति रत्नैरलंकृतः ॥ ५०६ ॥

अन्वयः—वा अन्यस्य कथा का ? आत्मा अपि धौत कर्म आवली मलः ज्ञान दर्शन चारित्रैः रत्नैः अलंकृतः भाति. ॥५०६॥

अर्थः—अथवा बीजानी वात शुं करवी ? (आ) आत्मा पण कर्मोनी श्रेणिरूपी मेल धोवाइ गयाबादज ज्ञान, दर्शन अने चारित्ररूपी रत्नोवडे शणगारेलो शोभी निकळे छे. ॥ ५०६ ॥

तदस्मिन्कर्ममलिने यत्परिष्करणं तनोः । विगुप्तपश्चाद्भागं तन्मयुरस्येव नर्तनम् ॥ ५०७ ॥

अन्वयः—तत् कर्ममलिने अस्मिन् यत् तनोः परिष्करणं, तत् विगुप्त पश्चाद् भागं मयूरस्य नर्तनं इव. ॥ ५०७ ॥

अर्थः—माटे आ आत्माने कर्मोथी मलीन राखीने जे शरीरने शणगारवु, ते तो पुंठ ढांक्याविनाना मयूरपक्षीना नृत्यसरखुं (अशोभनीक) छे. ॥ ५०७ ॥

नाङ्गस्य भूषणैरात्मा भूष्यतेऽस्य तु भूषणैः । भूष्यतेऽखिलमप्यङ्गं नभोऽर्कस्य करैरिव ॥ ५०८ ॥

अन्वयः—अंगस्य भूषणैः आत्मा न भूष्यते, तु अस्य भूषणैः अखिलं अपि अंगं अर्कस्य करैः नभः इव भूष्यते. ॥ ५०८ ॥

अर्थः—शरीरनां आभूषणोवडे आत्मा शोभतो नथी, परंतु आत्माना आभूषणोथी सघळुं शरीर सूर्यना किरणोथी आकाशनीपेठे शोभी निकळे छे. ॥ ५०८ ॥

तत्कार्यः काममात्मायमकर्ममलमण्डलः । ज्ञानदर्शनचारित्रभूषणः कायभूषणः ॥ ५०९ ॥

अन्वयः—तत् अयं आत्मा कामं अकर्म मल मंडलः, ज्ञान दर्शन चारित्र भूषणः कायभूषणः कार्यः ॥ ५०९ ॥

अर्थः—माटे आत्माने सारीरीते कर्मोरूपी मेलना समूहविनानो, तथा ज्ञान, दर्शन अने चारित्रना आभूषणरूपी शरीरना शण-

गारवाळो करवो. ॥ ५०९ ॥

इत्यन्तर्ध्यायतस्तस्यात्मनि स्थिरतरं मनः। अदीप्यत यथा दीपो निर्वाते वेश्मनि स्थितः ॥ ५१० ॥

अन्वयः—इति अंतः ध्यायतः तस्य आत्मनि, यथा निर्वाते वेश्मनि स्थितः दीपः, तथा स्थिरतरं मनः अदीप्यत. ॥५१०॥

अर्थः—एवी रीते हृदयमां विचारता एवा ते रतिसारराजाना आत्मामां, वायुरहित घरमां रहेला दीपकनीपेठे वधारे स्थिर थयेलुं मन प्रकाशित थवा लाग्युं. ॥ ५१० ॥

शुक्लध्यानेऽवतीर्णेऽथ घातिकर्मेन्धनानले। उत्पेदे केवलं लोकत्रयत्रैकाल्यदर्पणः ॥ ५११ ॥

अन्वयः-अथ घाति कर्म इंधन अनले शुक्लध्याने अवतीर्णे, लोकत्रय त्रैकाल्य दर्पणः केवलं उत्पेदे. ॥ ५११ ॥

अर्थः—पछी घातिकर्मोरूपी इंधनोने (बाळवामां) अग्निसरखुं शुक्लध्यान प्राप्त थवाथी त्रणे लोकोना त्रिकालदर्पणसरखुं (तेमने) केवलज्ञान उत्पन्न थयुं. ॥ ५११ ॥

दत्तं शासनदेव्यैष मुनिवेषं समाश्रितः। तयैव विहिते तत्र काञ्चनेऽब्जे कृतासनः ॥ ५१२ ॥

त्वरायातैः सुरव्रातैः प्रणतः पुष्पवर्षिभिः। किमेतदिति साश्चर्यैः प्रेक्ष्यमाणः पुरीजनैः ॥ ५१३ ॥

अन्तःपुरीभिरेताभिरुद्भ्रान्तस्वान्तवृत्तिभिः। किमेतन्नाथ नाथेति मुहुरुत्तरमर्थितः ॥ ५१४ ॥

**दशनांशुमिषात्पुण्यं मूर्तिमत्तन्वतीमिव । स जिनो वृजिनोच्छेदावेशिनीं देशनां व्यधात् ॥ ५१५ ॥**

अन्वयः—शासनदेव्या दत्तं मुनिवेषं एषः समाश्रितः, तथा एव तत्र विहिते कांचने अब्जे कृतासनः, ॥ ५१२ ॥ त्वरा आयातैः पुष्पवर्षिभिः सुर व्रातैः प्रणतः, किं एतत् ? इति साश्चर्यैः पुरीजनैः प्रेक्ष्यमाणः, ॥ ५१३ ॥ उद्भ्रांत स्वांत वृत्तिभिः एताभिः अंतःपुरीभिः नाथ नाथ ! किं एतत् ? इति मुहुः उत्तरं अर्थितः, ॥ ५१४ ॥ सः जिनः दशन अंशु मिषात् मूर्तिमत् पुण्यं तन्वतीं इव वृजिन उच्छेद आवेशिनीं देशनां व्यधात् ॥ ५१५ ॥ चतुर्भिः कलापकं ॥

अर्थः—(पछी) शासनदेवीए आपेलो मुनिवेष तेमणे पहेर्यो, अने तेणीएज त्यां रचेला सुवर्णकमलपर ते बेठा, ॥ ५१२ ॥ पछी तुरत आवेला तथा पुष्पोनी वृष्टि करता एवा देवोना समूहोथी नमायेला, तथा आते शुं ? एम आश्चर्य पामेला नागरीकोथी जोवाता, ॥ ५१३ ॥ गभरायेली मनोवृत्तिवाळी (त्यां) आवेली राणीओवडे "हे स्वामी ! हे स्वामी !" आ शुं ? एम कही वारंवार उत्तर मेळववा माटे प्रार्थना कराता, ॥ ५१४ ॥ एवा ते केवली भगवान् दांतोना किरणोना मिषथी जाणे शरीरधारी पुण्यने विस्तारती होय नही ! एवी तथा अंतरंग शत्रुओना विनाशना आवेशवाळी धर्मदेशना देवा लाग्या. ॥ ५१५ ॥ च० क० ॥

**अहो महोद्धतैरेव भवसेवकजन्तवः । कर्मभिर्मर्मभिद्रूपैस्ताप्यन्ते सर्वथा कथम् ॥ ५१६ ॥**

अन्वयः—अहो ! महोद्धतैः मर्मभिद् रूपैः कर्मभिः एव भव सेवक जंतवः सर्वथा कथं ताप्यंते ? ॥ ५१६ ॥

अर्थः—अहो ! महा उच्छृंखल, अने मर्मस्थानोने भेदनारां स्वरूपवाळां, एवां कर्मोवडेज संसारी प्राणीओ सर्वथा प्रकारे केम

खेद पामी रह्या छे ! ॥ ५१६ ॥

तानि जानीत हे सन्तः संगतानि सदात्मभिः । अष्टसंख्यानि संसारकारणं नामभेदतः ॥ ५१७ ॥

अन्वयः—( हे ) संतः ! आत्मभिः सदा संगतानि, संसार कारणं, नाम भेदतः अष्ट संख्यानि तानि जानीत ? ॥ ५१७ ॥

अर्थः-हे सज्जनो ! आत्मा साथे हमेशां संग करनारां, अने संसारना कारणरूप, नामोना भेदथी आठ संख्यावाळां ते कर्मो जाणवां

ज्ञानावरणं दर्शनावरणं वेदनीयकम् । मोहायुर्नामगोत्रान्तरायं तानीति नामतः ॥ ५१८ ॥

अन्वयः—-ज्ञानावरणं, दर्शनावरणं, वेदनीयकं, मोह आयु नाम गोत्र अंतरायं, इति तानि नामतः ॥ ५१८ ॥

अर्थः-ज्ञानावरणीय, दर्शनावरणीय, वेदनीय, मोहनीय, आयु, नाम, गोत्र, अने अंतराय, एवीरीतनां तेओनां नामो छे. ५१८

मतिश्रुतावधिमनःपर्यायकेवलाभिधैः । आवृतैः पञ्चभिर्ज्ञानैराद्यं पञ्चविधं स्मृतम् ॥ ५१९ ॥

अन्वयः—आवृतैः मति श्रुत अवधि मनःपर्याय केवल अभिधैः पंचभिः ज्ञानैः आद्यम् पंचविधं स्मृतं ॥ ५१९ ॥

अर्थः—आच्छादित थयेलां एवां मति, श्रुत, अवधि, मनःपर्याय तथा केवल नामना पांच ज्ञानोवडे पहेलुं ज्ञानावरणीय कर्म पांच प्रकारनुं कहेलुं छे. ॥ ५१९ ॥

निर्मलापि यथा दृष्टिः पटच्छन्नाल्पदृश्वरी । तथात्माच्छादितस्तेन तत्तत्पटसमं विदुः ॥ ५२० ॥

अन्वयः—यथा निर्मला दृष्टिः अपि पटच्छन्ना अल्पदृश्वरी, तथा तेन आच्छादितः आत्मा, तत् तत् पट्टसमं विदुः ॥५२०॥

अर्थः—जेम निर्मल आंख पण आडो पाटो बांधवाथी स्पष्ट जोइ शकती नथी, तेम आ ज्ञानावरणीय कर्मथी आच्छादित थयेलो आत्मा पण जोइ शकतो नथी माटे तेने पाटा समान कह्यु छे. ॥ ५२० ॥

सागराणां स्थितिस्तस्य स्यात्त्रिंशत्कोटिकोटयः। ततो बध्नाति तत्कर्म पुनरात्मा सकल्मषः ॥५२१॥

अन्वयः-तस्य स्थितिः सागराणां त्रिंशत्कोटिकोटयः स्यात् , ततः पुनः सकल्मषः आत्मा तत्कर्म बध्नाति. ॥ ५२१॥

अर्थः—ते ज्ञानावरणीय कर्मनी स्थिति त्रीस कोडा कोडी सागरोपमनी छे, अने तेथी वळी मलीन आत्मा ते कर्म बांधे छे. ॥

दर्शनावरणीयं तु नवभेदैरिति स्मृतम्। पञ्च निद्राश्च चत्वारः स्युश्चक्षुर्दर्शनादयः ॥ ५२२ ॥

अन्वयः—दर्शनावरणीयं तु इति नवभेदैः स्मृतं, पंच निद्राः, च चत्वारः चक्षुर्दर्शनादयः स्युः. ॥ ५२२ ॥

अर्थः—वळी दर्शनावरणीयकर्म आवीरीते नव मकारनु कहेलुं छे, पांच प्रकारनी निद्रा, अने चार प्रकारनां चक्षुर्दर्शनआदिक जाणवां ॥ ५२२ ॥

तत्र निद्रा भवेद्यत्र प्रबोधः स्वल्पहेतुना। निद्रानिद्रात्मनो यस्यां भवेदुःखेन जागरः ॥ ५२३ ॥

अन्वयः—यत्र स्वल्प हेतुना प्रबोधः स्यात्, तत्र निद्रा, यस्यां आत्मनः दुःखेन जागरः भवेत्, निद्रानिद्रा. ॥ ५२३ ॥

अर्थः-जेमां स्वल्प कारणथीज जागी जवाय ते "निद्रा", तथा जेमां आत्मानुं मुश्केलीथी जागवानुं थाय, ते "निद्रानिद्रा" कहेवाय

ऊर्ध्वस्थितस्य जायेत या जन्तोः प्रचला हि सा । प्रचलाप्रचला सा तु भवेद्या पथि गच्छतः ॥५२४॥

अन्वयः—ऊर्ध्वस्थितस्य जंतोः या जायेत, सा हि प्रचला, या पथि गच्छतः भवेत् सा प्रचलाप्रचला. ॥ ५२४ ॥

अर्थः—उभां उभां तथा बेठां बेठां प्राणीने जे निद्रा आवे, ते खरेखर "प्रचला" कहेवाय, अने जे मार्गमां चालतां चालतां निद्रा आवे, ते "प्रचलाप्रचला" कहेवाय. ॥ ५२४ ॥

चिन्तितस्याह्नि कार्यस्य स्त्यानर्द्धिः साधका निशि । सा पुनर्जायते जन्तोरुदये क्लिष्टकर्मणः ॥ ५२५ ॥

अन्वयः-स्त्यानर्द्धिः अह्नि चिंतितस्य कार्यस्य निशि साधका, सा पुनः क्लिष्टकर्मणः उदये जंतोः जायते. ॥ ५२५ ॥

अर्थः—स्त्यानर्द्धिनामनी निद्रा दिवसे चिंतवेलां कार्यने रात्रिए साधनारी छे, अने ते क्लिष्ट कर्मना उदयथी प्राणीने थाय छे.

चक्षुराव्रियते येन तच्चक्षुर्दर्शनावृतम् । शेषेन्द्रियाणां वरणमचक्षुर्दर्शनावृतम् ॥ ५२६ ॥

अन्वयः—येन चक्षुः आव्रियते तत् चक्षुर्दर्शनावृतं, शेष इंद्रियाणां वरणं अचक्षुर्दर्शनावृतं. ॥ ५२६ ॥

अर्थः-जेथी चक्षु ढंकाइ जाय, ते चक्षुर्दर्शनावरणकर्म कहेवाय, अने बाकीनी इंद्रियोने आच्छादित करनारुं अचक्षुर्दर्शनावरणकर्म कहेवाय. ॥ ५२६ ॥

अवधिः स्याद्रूपिवस्तुमर्यादा तेन दर्शनम् । करणानपेक्षो बोधरूपो वावधिरुच्यते ॥ ५२७ ॥

अन्वयः-अवधिः रूपि वस्तु मर्यादा स्यात्, तेन दर्शनं, वा करण अनपेक्षः बोधरूपः अवधिः उच्यते. ॥ ५२७ ॥
अर्थः—अवधि एटले रूपिपदार्थनी मर्यादा कहेवाय, ते वडे दर्शन, अथवा इंद्रियनी अपेक्षाविनानो बोधरूप अवधि कहेवाय छे.

दर्शनं तेन सामान्यार्थग्रहोऽवधिदर्शनम् । तस्यावरणमवधिदर्शनावरणं स्मृतम् ॥ ५२८ ॥

अन्वयः—तेन दर्शनं सामान्य अर्थग्रहः अवधिदर्शनं, तस्य आवरणं अवधिदर्शनावरणं स्मृतं. ॥ ५२८ ॥
अर्थः—ते अवधिवडे दर्शन एटले सामान्य अर्थने ग्रहण करवारूप अवधिदर्शन कहेवाय, अने तेने आच्छादित करनारुं जे कर्म, ते अवधिदर्शनावरण कर्म कहेवाय छे. ॥ ५२८ ॥

विश्वं केवलसामान्यं लोकालोकस्य दर्शनम् । यदावृणोति तत्प्रोक्तं केवलदर्शनावृतम् ॥ ५२९ ॥

अन्वयः—विश्वं केवलसामान्यं लोकालोकस्य दर्शनं यत् आवृणोति, तत् केवल दर्शन आवृतं प्रोक्तं. ॥ ५२९ ॥
अर्थः—समस्तपणे केवल सामान्यरूपे लोक अने अलोकनुं जे दर्शन, ते केवलदर्शन कहेवाय, अने तेने जे आच्छादित करे, ते केवलदर्शनावरणीय कर्म कहेवाय. ॥ ५२९. ॥

यथा राज्ञः प्रतीहारोऽनभीष्टस्य जनस्य सः । अपि वीक्षितुकामस्य न दत्ते नृपदर्शनम् ॥ ५३० ॥
दर्शनावरणीयेन रुद्धो जीवोऽप्यसौ तथा । न पश्येद्वस्तु तत्तेन प्रतीहारसमं विदुः ॥ ५३१ ॥ युग्मम् ॥

अन्वयः—वीक्षितु कामस्य अपि अनभीष्टस्य जनस्य राज्ञः सः प्रतीहारः यथा नृप दर्शनं न दत्ते, ॥ ५३० ॥ तथा दर्शनावरणीयेन रुद्धः असौ जीवः अपि वस्तु न पश्येत्, तेन तत् प्रतीहारसमं विदुः. ॥ ५३१ ॥ युग्मं ॥

अर्थः—जोवाने इच्छता एवा पण पोताने अणगमता माणसने राजानो ते पेहेरेगीर जेम राजानुं दर्शन करावतो नथी, ॥५३०॥ तेम आ दर्शनावरणीयकर्मथी रुंधायेलो आ जीव पण पदार्थने जोइ शके नही, माटे ते कर्मने प्रतीहारसरखुं (पेहेरेगीरसरखुं) कहेलुं छे.

समवस्थितिरस्यापि दर्शनावृतिकर्मणः । सागरोपमकोटीनां स्युस्त्रिंशत्कोटयः क्रमात् ॥ ५३२ ॥

अन्वयः—अस्य दर्शनावृतिकर्मणः समवस्थितिः अपि क्रमात् सागरोपमकोटीनां त्रिंशत् कोटयः स्युः ॥ ५३२ ॥

अर्थः—आ दर्शनावरणीयकर्मनी स्थिति पण अनुक्रमे त्रीस कोडाकोडी सागरोपमनी छे. ॥ ५३२ ॥

सातासातभिदा वेद्यं द्विधा मुख्यं तयोः पुनः । असातं तिर्यग्नरके सातं मर्त्यामरालये ॥ ५३३ ॥

अन्वयः—सात असातभिदा वेद्यं द्विधा, तयोः पुनः मुख्यं असातं तिर्यग्नरके, सातं मर्त्य अमरालये. ॥ ५३३ ॥

अर्थः—साता अने असाताना भेदथी वेदनीयकर्म बे प्रकारनुं छे, अने तेओमां प्रायें असातावेदनीय तिर्यंच तथा नरकमां होय छे, अने सातावेदनीय मनुष्य तथा स्वर्गमां होय छे. ॥ ५३३ ॥

मधुलिप्तासिधाराया लेहनं सुखदुःखकृत् । यथा तथेदमप्यस्ति तत्तेनासिसमं जगुः ॥ ५३४ ॥

अन्वयः—मधु लिप्त असि धारायाः लेहनं यथा सुख दुःखकृत्, तथा इदं अपि अस्ति, तेन तत् असिसमं जगुः. ॥ ५३४ ॥

अर्थः-मध चोपडेली तलवारनी धारानुं चाटण जेम सुख अने दुःख, बन्नेने करनारुं छे, तेम आ वेदनीयकर्म पण सुखदुःख करनारुं छे, माटे तेने मधचोपडेली तलवारसरखुं कह्युं छे. ॥ ५३४ ॥

**अवस्थितिरमुष्यापि वेदनीयस्य कर्मणः । सागरोपमितीनां हि स्युस्त्रिंशत्कोटिकोटयः ॥ ५३५ ॥**

अन्वयः-अमुष्य वेदनीयस्य कर्मणः अवस्थितिः अपि हि सागरोपमितीनां त्रिंशत्कोटिकोटयः स्युः. ॥ ५३५ ॥

अर्थः-आ वेदनीयकर्मनी स्थिति पण खरेखर त्रीस कोडाकोडी सागरोपमनी छे. ॥ ५३५ ॥

**मोहनीयं भवेद् द्वेधात्राद्यं दर्शनमोहकृत् । चारित्रमोहनीयं तु द्वितीयं परिकीर्तितम् ॥ ५३६ ॥**

अन्वयः-मोहनीयं द्वेधा भवेत्, तत्र आद्यं दर्शनमोहकृत्, तु द्वितीयं चारित्रमोहनीयं परिकीर्तितं. ॥ ५३६ ॥

अर्थः-मोहनीयकर्म बे प्रकारनुं छे, तेमां पेहेलुं दर्शनमोहनीय, अने बीजुं चारित्रमोहनीयकर्म कहेलुं छे. ॥ ५३६ ॥

**प्रथमं त्रिविधं सम्यग्मिश्रमिथ्यात्वभेदतः । द्वितीयं पञ्चविंशत्या भेदैस्तदिति कीर्त्यते ॥ ५३७ ॥**

अन्वयः-प्रथमं सम्यक् मिश्र मिथ्यात्व भेदतः त्रिविधं, तत् द्वितीयं इति पंचविंशत्या भेदैः कीर्त्यते. ॥ ५३७ ॥

अर्थः-(तेमानुं) पेहेलुं दर्शनमोहनीयकर्म सम्यक्, मिश्र, अने मिथ्यात्व मोहनीयना भेदथी त्रण प्रकारनुं छे; अने ते बीजुं चारित्रमोहनीयकर्म आवी रीते पचीस भेदोवाळुं कहेवाय छे. ॥ ५३७ ॥

**क्रोधमानमायालोभाः स्युः कषायाश्चतुर्विधाः । तत्रैकैकश्चतुर्भेदैर्ज्ञेयः संज्वलनादिभिः ॥ ५३८ ॥**

अन्वयः—क्रोध मान माया लोभाः चतुर्विधाः कषायाः स्युः, तत्र एकैकः संज्वलनादिभिः चतुर्भेदैः ज्ञेयः. ॥ ५३८ ॥

अर्थः—क्रोध, मान, माया अने लोभ, ए चार प्रकारना कषायो छे, तेमानो एकेको कषाय संज्वलन आदिक चारचार भेदोनो जाणवो. ॥ ५३८ ॥

पक्षस्थायी कषायोऽसौ स्मृतः संज्वलनाह्वयः । प्रत्याख्यानः पुनर्मासचतुष्टयकृतस्थितिः ॥ ५३९ ॥

अन्वयः-असौ संज्वलनाह्वयः कषायः पक्ष स्थायी, पुनः प्रत्याख्यानः मास चतुष्टय कृत स्थितिः. ॥ ५३९ ॥

अर्थः-(तेमानो) आ संज्वलननामनो कषाय एक पखवाडीयांनी स्थितिवाळो छे, अने प्रत्याख्यानकषाय चार मासनी स्थितिवाळोछे.

अप्रत्याख्यानकः प्रोक्तः स्थितः संवत्सरावधिः । यावज्जीवं कृतस्थानः स्यादनन्तानुबन्धकः ॥ ५४० ॥

अन्वयः—अप्रत्याख्यानकः संवत्सर अवधिः स्थितः प्रोक्तः, अनंत अनुबंधकः यावत् जीवं कृतस्थानः स्यात् . ॥ ५४० ॥

अर्थः-अप्रत्याख्यानी कषाय एक वर्ष सुधी रहे छे, एम कह्युं छे, तथा अनंतानुबंधी कषाय जीवित पर्यंत रहेनारो छे. ॥५४०॥

घ्नन्त्यमी वीतरागत्वं यतित्वं श्राद्धतां क्रमात् । सम्यक्त्वमपि संसेव्यमाना जन्तोर्भवान्तरे ॥ ५४१ ॥

अन्वयः—सेव्यमानाः अमी, क्रमात् भवांतरे जंतोः वीतरागत्वं, यतित्वं, श्राद्धतां, सम्यक्त्वं अपि घ्नंति. ॥ ५४१ ॥

अर्थः—सेवाता एवा आ संज्वलनादिक कषायो अनुक्रमे प्राणीना वीतरागपणानो मुनिपणानो श्रावकपणानो तथा सम्यक्त्वनो पण नाश करे छे. ॥५४१॥

अमरत्वं मनुष्यत्वं तिर्यक्त्वं नरकं क्रमात्। यच्छन्त्येवंस्वरूपास्ते कषाया इति षोडश ॥ ५४२ ॥ युग्मं

अन्वयः—एवं स्वरूपाः ते भवांतरे क्रमात् अमरत्वं, मनुष्यत्वं, तिर्यक्त्वं, नरकं यच्छन्ति, इति षोडश कषायाः ॥ ५४२ ॥

अर्थः—एवीरीतना ते कषायो भवांतरमां अनुक्रमे देवगति, मनुष्यगति, तिर्यंचगति, तथा नरकगति आपे छे, ए प्रमाणे शोळ कषायो (जाणवा.) ॥ ५४२ ॥ युग्मं ॥

तथा हासो भयं शोको जुगुप्सा रत्यरत्यपि। पुंनारीक्लीबवेदाश्च नोकषाया इमे नव ॥ ५४३ ॥

अन्वयः–तथा हासः, भयं, शोकः, जुगुप्सा, रति अरति, अपि, च पुं नारी क्लीबवेदाः, इमे नव नोकषायाः ॥ ५४३ ॥

अर्थः—तथा हास्य, भय, शोक, जुगुप्सा, रति, अरति, तथा पुरुषवेद, स्त्रीवेद अने नपुंसकवेद, ए नव नोकषायो (जाणवा.)

इत्यष्टाविंशतिर्भेदा मोहनीयस्य कर्मणः। भव्यात्मनामपि प्रायो दुर्जराः स्युश्चिरं स्थिराः ॥ ५४४ ॥

अन्वयः–इति मोहनीयस्य कर्मणः अष्टाविंशतिः भेदाः चिरं स्थिराः, प्रायः भव्य आत्मनां अपि दुर्जराः स्युः ॥ ५४४ ॥

अर्थः—एरीते मोहनीयकर्मना अठ्ठावीस भेदो घणा काळसुधी स्थिर रहेता होवाथी प्रायें करीने भव्य प्राणीओ पण तेओने मुश्केलीथी नष्ट करी शके छे. ॥ ५४४ ॥

मद्यपानाद्यथा जन्तुः कृत्याकृत्यानि वेत्ति न। मोहनीयादपि तथा तत्तन्मद्यसमं विदुः ॥ ५४५ ॥

अन्वयः—मद्यपानात् जंतुः यथा कृत्य अकृत्यानि न वेत्ति, तथा मोहनीयात् अपि, तत् तत् मद्यसमं विदुः ॥ ५४५ ॥

अर्थः—मदिरापान करवाथी प्राणी जेम कार्य अकार्यने जाणी शकतो नथी, तेम आ मोहनीय कर्मना उदयथी पण ते जाणी शकतो नथी, माटे तेने मदिरा समान कह्युं छे. ॥ ५४५ ॥

**तत्तदेतस्य कर्मभ्यः सर्वेभ्योऽप्यधिका स्थितिः । भवेयुः सागराणां हि सप्ततिः कोटिकोटयः ॥ ५४६ ॥**

अन्वयः—तत् हि तत् एतस्य स्थितिः सर्वेभ्यः अपि कर्मभ्यः अधिका सागराणां सप्ततिः कोटिकोटयः भवेयुः ॥ ५४६ ॥

अर्थः–माटे खरेखर ते आ मोहनीयकर्मनी स्थिति ( बीजां ) सर्वे कर्मोथी अधिक एटले सीत्तेर कोडाकोडी सागरोपमनी थाय छे

**आयुश्चतुर्धा नरकतिर्यग्नृसुरसंभवैः । दुर्भेदबन्धभावेन तद्वज्रनिगडोपमम् ॥ ५४७ ॥**

अन्वयः—नरक तिर्यग् नृ सुर संभवैः आयुः चतुर्धा, दुर्भेद बंध भावेन तत् वज्र निगड उपमं. ॥ ५४७ ॥

अर्थः—नरक, तिर्यंच, मनुष्य, अने देवगतिना जन्मरूपे आयुकर्म चार प्रकारनुं छे, तेनुं बन्धन मुश्केलीए तोडातुं होवाथी ते वज्रनी बेडी सरखुं छे. ॥ ५४७ ॥

**आयुषः कर्मणोऽमुष्य स्थितिरित्थं प्रकर्षतः । सागरोपमितीनां हि त्रयस्त्रिंशद्भवे भवेत् ॥ ५४८ ॥**

अन्वयः–अमुष्य आयुषः कर्मणः इत्थं प्रकर्षतः स्थितिः भवे हि सागरोपमितीनां त्रयस्त्रिंशत् भवेत्. ॥ ५४८॥

अर्थः–आ आयुकर्मनी आ प्रकारनी उत्कृष्टी स्थिति संसारमां खरेखर तेंत्रीस सागरोपमनी थाय छे. ॥ ५४८ ॥

नामोक्तं प्रथमं भेदैर्द्विचत्वारिंशता ततः । सप्तषष्ठ्या त्रिणवत्या त्र्युत्तरेण शतेन वा ॥ ५४९ ॥

अन्वयः–नाम प्रथमं द्विचत्वारिंशता भेदैः, ततः सप्तषष्ठ्या, त्रिणवत्या, वा त्र्युत्तरेण शतेन उक्तं. ॥ ५४९ ॥

अर्थः—नामकर्मना प्रथम बेंतालीस, पछी सडसठ, पछी त्राणुं, अने पछी एकसो त्रण भेदो कह्या छे. ॥ ५४९ ॥

गतिजातिशरीराङ्गोपाङ्गबन्धननामकम् । संघातनं संहननं संस्थानं वर्ण गंधने ॥५५० ॥

रसस्पर्शागुरुलघु पराघातोपघातकौ । आनुपूर्वी तथोच्छ्वास आतपोद्योतमित्यपि ॥ ५५१ ॥

विहायोगतिस्त्रसाख्यं स्थावरं सूक्ष्मबादरम् । अपर्याप्तं च पर्याप्तं प्रत्येकानन्तकायकम् ॥ ५५२ ॥

सुभगं दुर्भगं चैव स्थिरास्थिरशुभाशुभम् । सुस्वरं दुःस्वरादेयमनादेयं ततः परम् ॥ ५५३ ॥

यशःकीर्त्ययशः कीर्तिनिर्माणं कीर्तितं ततः । नाम तीर्थकरं चैवं चत्वारिंशद्द्वयाधिका ॥ ५५४ ॥पं. कु.

अन्वयः–गति जाति शरीर अंगोपांग बंधननामकं, संघातनं संहननं संस्थानं वर्ण गंधने ॥ ५५० ॥ रस स्पर्श अगुरुलघु पराघात उपघातकौ, आनुपूर्वी तथा उच्छ्वास आतप उद्योतं इति अपि ॥ ५५१ ॥ विहायोगति, त्रसाख्यं स्थावरं सूक्ष्म बादरं अपर्याप्तं च पर्याप्तं, प्रत्येक अनंतकायकं ॥ ५५२ ॥ सुभगं दुर्भगं च एव स्थिर अस्थिर शुभ अशुभं सुस्वरं दुःस्वर आदेयं ततः परं अनादेयं ॥५५३॥ यशः कीर्ति अयशः कीर्ति निर्माणं ततः तीर्थकरं नाम कीर्तितं, च एवं द्वयाधिका चत्वारिंशत् ॥५५४॥पं. कु.

अर्थः—गति, जाति, शरीर, अंगोपांग, बंधन, संघातन, संहनन, संस्थान, वर्ण, गंध ॥ ५५० ॥ रस, स्पर्श, अगुरुलघु, पराघात, उपघात, आनुपूर्वी, उच्छ्वास, आतप, उद्योत, ॥ ५५१ ॥ विहायोगति, त्रस, स्थावर, सूक्ष्म, बादर, अपर्याप्त, पर्याप्त, प्रत्येक, अनंतकाय (साधारण), ॥ ५५२ ॥ सुभग, दुर्भग, स्थिर, अस्थिर, शुभ, अशुभ, सुस्वर, दुःस्वर, आदेय, अनादेय, ॥५५३॥ यशःकीर्ति, अयशःकीर्ति, निर्माण, तथा पछी तीर्थंकर नामकर्म कह्युं छे, एवी रीते प्रथमना बेंतालीस भेदो जाणवा. ॥ ५५४ ॥

**गतिश्चतुर्धा नरकतिर्यग्नृसुरलक्षणा । एकद्वित्रिचतुःपञ्चाक्षभेदैर्जातिपञ्चकम् ॥ ५५५ ॥**

अन्वयः—नरक तिर्यक् नृ सुर लक्षणा गतिः चतुर्धा, एक द्वि त्रि चतुः पंच अक्ष भेदैः जाति पंचकं. ॥ ५५५ ॥

अर्थः—नरक, तिर्यंच, मनुष्य, अने देवनामनी चारप्रकारनी गतिओ छे, तथा एकेंद्रिय, द्वींद्रिय, त्रींद्रिय, चतुरिंद्रिय अने पंचेंद्रिय, एम पांच प्रकारनी जातिओ छे. ॥ ५५५ ॥

**औदारिकं वैक्रियकमाहारकमतः परम् । तैजसं कार्मणं चेति शरीरं पञ्चधा स्मृतम् ॥ ५५६ ॥**

अन्वयः-औदारिकं, वैक्रियकं, आहारकं, अतःपरं तैजसं, च कार्मणं इति शरीरं पंचधा स्मृतं. ॥ ५५६ ॥

अर्थः—औदारिक, वैक्रिय, आहारक, त्यार पछी तैजस अने कार्मण, एम शरीर पांच प्रकारनुं कहेलुं छे. ॥ ५५६ ॥

**अङ्गोपाङ्गं त्रिधा शीर्षं पृष्ठं च हृदयोदरौ । ऊरुद्वयं करद्वन्द्वमित्यष्टावङ्गमुच्यते ॥ ५५७ ॥**

अन्वयः-अंगोपांगं त्रिधा, शीर्षं, पृष्ठं च हृदय उदरौ, ऊरुद्वयं, करद्वंद्वं, इति अष्टौ अंगं उच्यते. ॥ ५५७ ॥

अर्थः–अंगोपांग त्रण प्रकारनां छे. (तेमांथी) मस्तक, पीठ, हृदय, उदर, बे साथळ, अने बे हाथ, ए आठ अंगो कहेवाय छे.

अङ्गुल्याद्यमुपाङ्गं स्यादङ्गोपाङ्गं च तद्गताः । रेखाः स्युस्त्रयमेतत्तु भवेदाद्ये वपुस्त्रये ॥ ५५८ ॥

अन्वयः–अंगुली आद्यं उपांगं स्यात्, च तद्गताः रेखाः अंगोपांगं स्युः, तु एतत् त्रयं आद्ये वपुस्त्रये भवेत् ॥ ५५८ ॥

अर्थः—आंगळी आदिक उपांग कहेवाय, अने तेमां रहेली रेखाओ अंगोपांग कहेवाय. अने ए त्रणे पेहेलां त्रण शरीरोमां होय.

षोढा संहननं वज्रर्षभनाराचमादिमम् । तस्माद् वृषभनाराचं नाराचं तु तृतीयकम् ॥ ५५९ ॥

चतुर्थमर्धनाराचं कीलिकाख्यं च पञ्चमम् । सेवावर्तं भवेत्षष्ठमस्थ्यन्तस्पर्शलक्षणम् ॥ ५६० ॥ युग्मम् ॥

अन्वयः–संहननं षोढा, आदिमं वज्र ऋषभ नाराचं, तस्मात् वृषभ नाराचं, तु तृतीयं नाराचं, ॥ ५५९. ॥ चतुर्थं अर्ध नाराचं, च पंचमं कीलिकाख्यं, षष्ठं सेवावर्तं भवेत्, अस्थि अंत स्पर्श लक्षणं ॥ ५६० ॥ युग्मं ॥

अर्थः—संघयण छ प्रकारनां छे(तेमां) पेहेलुं वज्रऋषभनाराच, ते पछी बीजुं वृषभनाराच, तथा त्रीजुं नाराच, ॥ ५५९ ॥ चोथुं अर्धनाराच, अने पांचमुं कीलिका नामनुं, तथा छठ्ठुं सेवावर्तनामनुं संघयण जाणवुं. ज्यां हाडकांओना छेडा एकबीजाने अडकीने संधायेला होय, एवुं ते संघयणनुं लक्षण जाणवुं. ॥ ५९० ॥ युग्मं ॥

आद्यं समचतुरस्त्रमथ न्यग्रोधमण्डलम् । तदन्यथा पुनः सादि वामनं कुब्जकं तथा ॥ ५६१ ॥

हुण्डं चेति शरीरस्य संस्थानानि भवन्ति षट् । एतान्यौदारिकस्यैव नान्याङ्गानामसंभवात् ।५६२।युग्मम्।

अन्वयः-आद्यं सम चतुरस्रं, अथ न्यग्रोध मंडलं, पुनः तत् अन्यथा सादि, वामनं, तथा कुब्जकं, ॥५६१॥ च हुंडं इति शरीरस्य षट् संस्थानानि भवंति, एतानि औदारिकस्य एव, अन्य अंगानां असंभवात् न. ॥ ५६२ ॥ युग्मं ॥

अर्थः—पहेलुं संस्थान समचतुरस्र, पछी न्यग्रोधमंडल, अने तेथी विपरीत प्रकारनुं सादि, वामन, तथा कुब्ज, ॥ ५६१ ॥ अने हुंड, एरीते शरीरनां छ संस्थानो होय छे, वळी ते संस्थानो औदारिक शरीरनांज होय छे, बीजां शरीरोने संभव न होवाथी ते होतां नथी. ॥ ५६२ ॥ युग्मं ॥

आनुपूर्वी चतुर्धेत्थं यज्जंन्तोर्गच्छतोऽन्तरा । भवेषु नरकाद्येषु परिपाटिर्भवेद्गतेः ॥ ५६३ ॥

अन्वयः—इत्थं आनुपूर्वी चतुर्धा, यत् नरक आद्येषु भवेषु गच्छतः जंतोः अन्तरा गतेः परिपाटिः भवेत् . ॥ ५६३ ॥

अर्थः—ए रीते आनुपूर्वी चार प्रकारनी छे, के जे नरकआदिक गतिओमां जता प्राणीने वच्चे गतिनी परिपाटीरूपा (उचित आकर्षणरूप) थाय छे. ॥ ५६३ ॥

स्याद्विहायोगतिर्द्वेधा शुभाशुभविभेदतः । उपघातपराघातातपागुरुलघु स्मृतम् ॥ ५६४ ॥

अन्वयः—विहायोगतिः शुभ अशुभ विभेदतः द्वेधा स्यात् , उपघात पराघात आतप अगुरुलघु स्मृतं. ॥ ५६४ ॥

अर्थः-विहायोगति शुभ अने अशुभना भेदथी बे प्रकारनी होय छे. उपघात, पराघात, आतप, तथा अगुरुलघु (पण) कह्यां छे.

उच्छ्वासोद्योतौ चत्वारो वर्णाद्यास्त्रसविंशतिः । निर्माणं तीर्थकृच्चेति सप्तषष्टिरुदाहृताः ॥ ५६५ ॥

अन्वयः–उच्छ्वास उद्योतौ, वर्णाद्याः चत्वारः, त्रसविंशतिः, निर्माणं, च तीर्थकृत् , इति सप्तषष्टिः उदाहृताः ॥ ५६५ ॥

अर्थः—(तेमज) उच्छ्वास, उद्योत, वर्णआदिक चार, त्रसविंशक (त्रसदशक अने स्थावरदशक) निर्माण तथा तीर्थंकरनामकर्म, एम आ नामकर्मना सडसठ भेदो कह्या. ॥ ५६५ ॥

बन्धनं पञ्चधा पञ्च संघाता वर्णपञ्चकम् । अष्टौ स्पर्शा रसाः पञ्च गन्धद्वयमुदीरितम् ॥ ५६६ ॥

अन्वयः—बंधनं पंचधा, संघाताः पंच, वर्णपंचकं, स्पर्शाः अष्टौ, रसाः पंच, गंध द्वयं उदीरितं. ॥ ५६६ ॥

अर्थः—बंधन पांच प्रकारनां, संघात पांच, वर्ण पांच, स्पर्श आठ, रस पांच, अने गंध बे कह्या छे. (ए रीते त्रीस भेदो थया.)

कृष्णो वर्णेषु स्पर्शेषु गुरुस्तिक्तो रसेषु च । गन्धयोः सुरभिश्चैते भेदास्त्याज्याः पुरोदिताः ॥ ५६७ ॥

अन्वयः—वर्णेषु कृष्णः, स्पर्शेषु गुरुः, च रसेषु तिक्तः, च गन्धयोः सुरभिः, एते पुरोदिताः भेदाः त्याज्याः. ॥ ५६७ ॥

अर्थः–वर्णोमांथी काळो, स्पर्शोमांथी गुरु, अने रसोमांथी तीखो, तथा गन्धमांथी सुगन्धि, एम उपर कहेला त्रीस भेदोमांथी आ चार भेदो बाद करवा. ॥ ५६७ ॥

प्रागुक्तायाः सप्तषष्टेरस्याः षड्विंशतेरपि । मेलने जायते सेयं नवतिस्त्रिभिरुत्तरा ॥ ५६८ ॥

अन्वयः—प्राग् उक्तायाः सप्तषष्टेः अस्याः षड्विंशतेः अपि मेलने सा इयं त्रिभिः उत्तरा नवतिः जायते. ॥ ५६८ ॥

अर्थः—पूर्वे कहेला सडसठ भेदोमां आ छवीस भेदोने पण मेळववाथी ते आ त्राणु भेदो थाय छे. ॥ ५६८ ॥

पञ्चदशबन्धनेभ्यः पञ्च भेदाः पुरोदिताः । शेषैस्तु दशभिः क्षिप्तैर्जायते त्र्युत्तरं शतम् ॥ ५६९ ॥

अन्वयः—पंचदश बन्धनेभ्यः पंच भेदाः पुरा उदिताः, तु शेषैः दशभिः क्षिप्तैः त्र्युत्तरं शतं जायते. ॥ ५६९ ॥

अर्थः-बन्धनना पंदर भेदोमांथी पांच भेदो तो उपर कह्या छे, अने बाकी रहेला दश भेदो मेळववाथी एकसो त्रण भेदो थाय छे.

औदारिकौदारिककं तथौदारिकतैजसम् । औदारिककार्मणकं तुर्यमेतत्त्रयोद्भवम् ॥ ५७० ॥

वैक्रियवैक्रियाद्येवं ज्ञेयं बन्धचतुष्टयम् । इत्थमाहारकाहारकादिदेहचतुष्टयम् ॥ ५७१ ॥

तैजसतैजसं गात्रं ततस्तैजसकार्मणम् । कार्मणकार्मणं चेति बन्धाः पञ्चदश स्मृताः ॥ ५७२ ॥

अन्वयः--औदारिक औदारिककं, तथा औदारिक तैजसं, औदारिक कार्मणकं, एतत् त्रय उद्भवं तुर्यं, ॥ ५७० ॥ एवं वैक्रिय वैक्रिय आदि बंधचतुष्टयं ज्ञेयं, इत्थं आहारक आहारक आदि देह चतुष्टयं, ॥५७१॥ तैजसतैजसं गात्रं, ततः तैजस कार्मणं, च कार्मण कार्मणं इति पंच दश बंधाः स्मृताः ॥ ५७२ ॥ त्रिभिर्विशेषकं ॥

अर्थः-औदारिक औदारिक, तथा औदारिकतैजस, औदारिककार्मण, अने ए त्रणेथी उत्पन्न थयेलुं एटले औदारिकतैजसकार्मण-

नामनुं चोथुं, ५७० एवीज रीते वैक्रियवैक्रियआदिक चार बंधनो जाणवां, (एटले के-वैक्रियवैक्रिय) वैक्रियतैजस, वैक्रियकार्मण, तथा वैक्रियतैजसकार्मण जाणवां) तथा एवीज रीते आहारकआहारकआदि चार देह जाणवा, (एटले के-आहारकआहारक, आहाराक-तैजस, आहारककार्मण तथा आहाराकतैजसकार्मण जाणवां.) ॥५७१॥ (वळी तेरमुं तैजसतैजस शरीर, पछी (चौदमुं) तैजसकार्मण, अने (पंदरमुं) कार्मणकार्मण एम पंदर प्रकारना बंधो कह्या छे. ॥५७२॥ त्रिभिर्विशेषकं॥

**रम्यारम्याणि रूपाणि कुर्याच्चित्रकरो यथा । तथा नामापि जीवानां तत्तच्चित्रकरोपमम् ॥ ५७३ ॥**

अन्वयः—यथा चित्रकरः रम्य अरम्याणि रूपाणि कुर्यात्, तथा नाम अपि जीवानां, तत् तत् चित्रकरोपमं. ॥ ५७३ ॥

अर्थः-जेम चितारो सारां नरसां चित्रो चितरेछे, तेम (आ) नामकर्म पण जीवोना अनेक प्रकारना सारा नरसां स्वरूपो बनावे छे, अने तेथी ते नामकर्मने चित्रकारनी उपमा (कहेली छे.) ॥ ५७३ ॥

**एतस्य स्थितिरुत्कृष्टा भविनां नामकर्मणः । विंशतिः कोटिकोटीनां सागरोपममानतः ॥ ५७४ ॥**

अन्वयः—भविनां एतस्य नाम कर्मणः उत्कृष्टा स्थितिः विंशतिः कोटाकोटीनां सागरोपम मानतः ॥ ५७४ ॥

अर्थः—संसारी प्राणीओना आ नामकर्मनी उत्कृष्टी स्थिति वीस कोडाकोडी सागरोपमनी छे. ॥ ५७४ ॥

**गोत्रं द्विधा धिया लक्ष्म्या हीनोऽप्यर्हो भवी भवेत् । तदुच्चं सहितोऽप्याभ्यां नाच्यो नीचं तदुच्यते ५७५**

अन्वयः-गोत्रं द्विधा, धिया लक्ष्म्या हीनः अपि भवी अर्हः भवेत् तत् उच्चं, आभ्यां सहितः अपि अर्च्यः न, तत् नीचं उच्यते

अर्थः—गोत्र बे प्रकारनुं छे, बुद्धि अने लक्ष्मीथी रहित होवा छतां पण जेथी मनुष्य पूजाय छे तेने उच्च गोत्र (जाणवुं) अने ते बन्ने सहित होवा छतां पण जे पूजातो नथी ते नीचगोत्र जाणवुं. ॥ ५७५ ॥

यथा कुलालान्मृत्पिण्डः पूर्णकुम्भः सुराघटी । स्तुत्यो निन्द्यस्तथातः स्यादात्मा तत्तेन तत्समम् ५७६

अन्वयः—यथा मृत्पिंडः कुलालात् पूर्णकुंभः सुराघटी, तथा अतः आत्मा स्तुत्यः निंद्यः स्यात्, तेन तत् तत्समं. ॥ ५७६ ॥

अर्थः—जेम माटीनो पिंड कुंभारमारफते उत्तम घडारूप तथा मदिरा भरवानी हांडलीरूपे थाय छे, तेम आ गोत्र कर्मथी आत्मा पण प्रशंसापात्र तथा निंदनीक थाय छे, माटे ते कर्मने ते सरखुं कह्युं छे. ॥ ५७६ ॥

आत्मनि स्थितिरेतस्य गोत्रसंज्ञस्य कर्मणः । सागरोपमसंबद्धा स्यात्कोटीकोटिविंशतिः ॥ ५७७ ॥

अन्वयः–आत्मनि एतस्य गोत्रसंज्ञस्य कर्मणः स्थितिः सागरोपमसंबद्धा कोटीकोटिविंशतिः स्यात्. ॥ ५७७ ॥

अर्थः–आत्मानी अंदर आ गोत्र कर्मनी स्थिति वीस कोडाकोडी सागरोपमनी छे. ॥ ५७७ ॥

अन्तरायाभिधं कर्म भेदैः पञ्चभिरष्टमम् । स्याद्दानलाभभोगोपभोगसामर्थ्यलक्षणैः ॥ ५७८ ॥

अन्वयः–अंतराय अभिधं अष्टमं कर्म, दान लाभ भोग उपभोग सामर्थ्य लक्षणैः पंचभिः भेदैः स्यात्. ॥ ५७८ ॥

अर्थः–अंतराय नामनुं आठमुं कर्म दान, लाभ, भोग, उपभोग, अने वीर्यरूपे पांच भेदोवाळुं छे. ॥ ५७८ ॥

दानं विनीताद्दत्ते राड् भाण्डागारिकतो यथा । तथास्मादपि जीवोऽतस्तद्भाण्डागारिकतोपमम् ॥५७९॥

अन्वयः—यथा विनीतात् भांडागारिकतः राट् दानं दत्ते, तथा अस्मात् अपि जीवः, अतः तत् भांडागारिकता उपमं. ॥

अर्थः-जेम विनीत एटले न आपवानी इच्छाथी लुच्चाइ करता एवा भंडारी मारफत राजा दान आपे, (अर्थात् न आपी शके) तेम आ अंतराय कर्मथी पण जीव आपी शके नही, माटे ते कर्मने भंडारीपणानी उपमा (आपेली छे.) ॥ ५७९ ॥

अन्तरायाभिधानस्य स्थितिरेतस्य कर्मणः । सागरोपमसंख्यायां स्युस्त्रिंशत्कोटिकोटयः ॥ ५८० ॥

अन्वयः—एतस्य अंतराय अभिधानस्य कर्मणः स्थितिः सागरोपमसंख्यायां त्रिंशत्कोटिकोटयः स्युः. ॥ ५८० ॥

अर्थ—आ अंतराय नामना कर्मनी स्थिति त्रीस कोडाकोडी सागरोपमनी छे ॥ ५८० ॥

इत्यल्पं जल्पितोऽनल्पकालः कर्ममहागदः । शुद्धध्यानौषधप्राणैः सद्भिः शाम्योऽप्रमादिभिः ॥ ५८१ ॥

अन्वयः-इति अनल्प कालः कर्म महागदः अल्पं जल्पितः, अप्रमादिभिः सद्भिः शुद्ध ध्यान औषध प्राणैः शाम्यः. ॥५८१॥

अर्थः—एरीते अनादिकाळथी लागु पडेला आ कर्मरूपी भयंकर रोगनुं संक्षेपथी वर्णन कर्युं छे, माटे सज्जनोए प्रमाद छोडीने निर्मल ध्यानरूपी औषधना सत्त्वथी (ते रोगने) शांत करवो. ॥ ५८१ ॥

शुद्धं ध्यानमपि प्राप्यं कषायविषयोज्झनैः । संतोषरसिकैर्लोकैः स तु बीजं सुखस्य यत् ॥ ५८२ ॥

अन्वयः—शुद्धं ध्यानं अपि कषाय विषय उज्झनैः संतोषरसिकैः लोकैः प्राप्यं, यत् तु सः सुखस्य बीजं ॥ ५८२ ॥

अर्थः—शुद्ध ध्यान पण कषायो अने विषयोना त्यागथी संतोषमां लीन थयेला लोको मेळवी शके छे, केमके खरेखर ते संतोष-सुखना बीजरूप छे. ॥ ५८२ ॥

न सद्वाक्यात्परं वश्यं न कलायाः परं धनम् । नाहिंसायाः परो धर्मो न संतोषात्परं सुखम् ॥ ५८३ ॥

अन्वयः-सद्वाक्यात् परं वश्यं, कलायाः धनं न, अहिंसायाः परः धर्मः न, संतोषात् परं सुखं न. ॥ ५८३ ॥

अर्थः-उत्तम वचनथी बीजुं वशीकरण नथी, हुन्नरथी बीजुं धन नथी, दयाथी बीजो धर्म नथी, अने संतोषथी बीजुं धन नथी.

सेव्यसारस्य तस्यापि जननी विरतिर्ध्रुवम् । सापि केवलिभिः प्रोक्ता सर्वतो देशतोऽपि वा ॥ ५८४ ॥

अन्वयः-सेव्यसारस्य तस्य अपि जननी ध्रुवं विरतिः. सा अपि केवलिभिः सर्वतः वा देशतः अपि प्रोक्ता. ॥ ५८४ ॥

अर्थः—सेववालायक एवा ते संतोषनी पण माता तो खरेखर विरतिज छे, अने ते विरति पण केवलीओए सर्वथी अथवा देश-थी पण कहेली छे. ॥ ५८४ ॥

तदस्यां विरतौ सद्भिर्मतिमद्भिः सुखार्थिभिः । स्तुत्यकृत्यमहाविघ्नः प्रमादः कार्य एव न ॥ ५८५ ॥

अन्वयः-तत् अस्यां विरतौ मतिमद्भिः सुखार्थिभिः सद्भिः स्तुत्य कर्म महाविघ्नः प्रमादः न एव कार्यः. ॥ ५८५ ॥

अर्थः-माटे आ विरति ग्रहण करवामां बुद्धिवान अने सुखनी इच्छावाळा सज्जनोए, शुभ कार्यमां महाविघ्न करनारो प्रमाद नज करवो.

**आयुषः क्षण एकोऽपि नाप्यते रत्नकोटिभिः । तत्कथं हार्यते हन्त प्रमादरजसा नरैः ॥ ५८६ ॥**

अन्वयः—आयुषः एकः क्षणः अपि रत्नकोटिभिः न आप्यते, हंत नरैः प्रमादरजसा तत् कथं हार्यते ? ॥ ५८६ ॥

अर्थः—आयुनो एक क्षण पण क्रोडोगमे रत्नो ( आप्याथी ) मळतो नथी, अरे रे ! माणसो प्रमादरूपी रजने साटे ते क्षणने केम हारी जाय छे ! ! ॥ ५८६ ॥

**इति धर्मगिरं कर्मगिरिदम्भोलिसंनिभाम् । श्रुत्वा तत्त्वावबोधेन शुभः शस्यजनोऽजनि ॥ ५८७ ॥**

अन्वयः—इति कर्म गिरि दंभोलि संनिभां धर्मगिरं श्रुत्वा तत्त्व अवबोधेन शस्यजनः शुभः अजनि ॥ ५८७ ॥

अर्थः—एरीते कर्मोरूपी पर्वतने (तोडवामां) वज्र सरखी धर्मवाणी सांभळीने तत्त्वज्ञान थवाथी भव्य माणसो शुभपरिणामवाळा थया.

**अन्तःपुर्यः सुबन्धुश्च तदा भेजुर्महाव्रतम् । घनैश्चान्यैर्जनैस्तत्र जगृहे गृहिणां व्रतम् ॥ ५८८ ॥**

अन्वयः—तदा अंतःपुर्यः च सुबंधुः महाव्रतं भेजुः च अन्यैः घनैः जनैः तत्र गृहिणां व्रतं जगृहे. ॥ ५८८ ॥

अर्थः—ते वखते ते त्रणे राणीओए तथा सुबंधुव्यापारीए (पण) चारित्र अंगीकार कर्युं, अने बीजा घणा लोकोए त्यां गृहस्थीनां व्रतो अंगीकार कर्यां. ॥ ५८८ ॥

**इत्थं प्रबोध्य सुहृदो विहृत्य वसुधां क्रमात् । वितत्य धर्मं भगवान् रतिसारः शिवं ययौ ॥ ५८९ ॥**

अन्वयः—इत्थं सुहृदः प्रबोध्य, वसुधां विहृत्य, धर्मं वितत्य भगवान् रतिसारः क्रमात्शिवं ययौ. ॥ ५८९ ॥

अर्थः—एवी रीते मित्रोने प्रबोधीने, पृथ्वीपर विचरीने, तथा धर्मनो विस्तार करीने (ते) रतिसार केवली भगवान् अनुक्रमे मोक्षे गया.

इत्यद्भुतस्य दानस्य प्रभावाद्भुक्तभूतलः। कुशलो दलयत्याशु संसारं रतिसारवत्॥ ५९०॥

अन्वयः—इति अद्भुतस्य दानस्य प्रभावात् भुक्तभूतलः कुशलः रतिसारवत् आशु संसारं दलयति.॥ ५९०॥

अर्थः—एवी रीते अद्भुत एवां दानना माहात्म्यथी पृथ्वीपर राज्यसुख भोगवीने चतुर माणस आ रतिसारनीपेठे तुरत संसारनो नाश करे छे.

॥ इति श्रीदानफलमहात्म्योपदर्शने श्रीरतिसारचरित्रं समाप्तं. आ चरित्र श्रीवर्धमानसूरि-विरचित श्रीवासुपूज्यचरित्रनामना महाकाव्यमांथी स्वपरना श्रेय माटे तेना अन्वय तथा गुजराती भाषांतर सहित जामनगर निवासी पंडित श्रावक हीरालाल हंसराजे पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्युं छे.॥ श्रीरस्तु॥

॥ इति श्री रतिसार चरित्रं समाप्तम् ॥